
Barid baran Mukerji.
College Road, Calcutta,

THE NIRUKTALOCHANUM.

A

Guide to Jaska's Nirukta.



BY

ACHARYA SATYAVRATA SAMASRAMI,

Associate-Member of the Asiatic Society of Bengal; Editor, Author, Commentator, Annotator, Compiler, Translator, & Publisher of different Vedic Works &c &c.

SECOND EDITION.

(REVISED & ENLARGED)


PRINTED & PUBLISHED BY

P. HITAVRATA SAMAKANTHA, SATYA PRESS.

No. 27, Ghose's Lane, CALCUTTA.

1907.

[All Rights RESERVED.]



R.M.I.C. LIBRARY
20957

॥ ॐ ॥

॥ निरुक्तालोचनम् ॥

अर्थतः

भगवद्यास्कमुनिप्रणीतस्य 'निरुक्त'-नाम-वेदाङ्गस्य
नामप्रयोजनप्रणयनकालविज्ञानविषयतत्त्वादीनां निरूपणाय
यत्नतो गवेषणम् ।



अद्यतनैकसामगाचार्य-सर्ववेदविज्ञानादिभास्करेण
सामश्रमीतिलब्धयशोनामश्रीसत्यव्रताचार्य्येण
विरचितम् ।



॥ द्वितीयसंस्करणम् ॥
(परिवर्त्तितं परिवर्द्धितञ्च)

॥ एतत्सत्त्वं सम्राड्विधिना स्वायत्तीकृतम् ॥

कलकत्ता—सत्ययन्त्रे
(नं० २७, घोषेस् लेन)
पं० द्विजव्रतसामकण्ठेन मुद्रितं प्रकाशितञ्च ।
॥ सं० १९१३ । १९०७ ई० ॥

॥ ओ३म् ॥

॥ प्रकाशकोक्तिः ॥

गोत्रे कश्यपजे कुले सुविदिते गाङ्गीतिचट्टान्वये,
जातश्चावसथः सदाशिवमुनिस्तस्यैव वंश्यो महान् ।
वेदानामधिदैवतार्थकरणे चैकोऽत्र यो भारते ,
चातुर्वेद्यविधिज्ञवैदिकगुरुः सत्यव्रतो मे पिता ॥ १ ॥
ज्ञात्वा यत्सत्यनिष्ठां प्रमुदितगुरुणाऽऽख्यायि सत्यव्रतो यः,
बुन्दीशोऽप्याह तुष्टः सदसि परिचयाद् यं हि सामश्रमीति ।
हारिश्चन्द्रीयपत्ने जयपुरसमिती येन लब्धाः प्रतिष्ठाः ,
माध्यस्थ्यं येन काश्यां कृतमुभयमतं श्रीदयानन्दवादे ॥ २ ॥
शास्त्रीश्रीभक्तरामो लवपुरवसतिर् , दाक्षिणात्यश्च शास्त्री-
रावः श्रीनारसिंहो , ऽमृतसरनिलयः श्रीजगन्नाथ आर्यः ।
श्यां वङ्गे च गौडे जय-शिव-कनकाः, गुर्ज्जरेऽप्यत्रयाद्याः,
राणाद्याः सनीडा हित-शिव-भवका यस्य शिष्याश्च शस्ताः ॥ ३ ॥
सामान्यानभृता ऋचाश्च यजुषां विन्नाह्मणाना मपि ,
येनाकारि सतां मुदे विवरणं वङ्गानुवादस्तथा ।
टीका देवगिरा दृशापि रचिता वेदेषु सूत्रेषु च ,
त्रय्याद्याः प्रथितास्त्रिवेदमथिता ग्रन्थाश्च यस्याष्टकौ ॥ ४ ॥
प्राच्यापाच्यबुधा अवाच्यविबुधा औदीच्यविद्याधनाः ,
सान्त्रां श्रियितुः प्रशस्तिलिपिभिर्गायन्ति यस्योद्यशः ।
सत्यार्थाध्ययनप्रवृत्तिवशगा आयान्ति ते यत्पठे ,
तेनेदं रचितं त्रिवेदगमकं नैरुक्तनेत्राञ्जनम् ॥ ५ ॥

आयान्तस्य सामगाचार्यस्य प्राच्योदीच्यापाच्यावाच्यभारतीय-
महामहोपाध्यायादिधीमल्लिखितानि बहूनि
प्रशस्तिपत्राणि, तेषा मेकतमादिह
उद्धरामि श्लोकद्वयम्—

"आ रत्नाकरमेखलावनितले द्वीपे त्वितोऽन्यत्र च,
न स्पर्द्धी न च यक्षमोऽपि च बुधो सद्वेदविद्यागुणैः।
अर्थाना मनिशं चमत्कृतिमतां कोशोऽनिशं दर्शकः,
विद्वन्मूर्द्धकिरीटरत्ननिचये चिन्तामणिस्थायणीः॥

× × × ×

विद्याविद्युदुदारदीप्तिनिचयैर्भूमण्डलं रोचयन्,
स्वान्तध्वान्तमदान्यशान्तजनुषां सद्यः समुन्मोचयन्।
वेदव्याकृतिजैमिनीयजटिलान् भावान् सदालोचयन्,
कोऽप्याम्नाययया जयत्यतितरां सत्यव्रतः सामगः॥"—इति।

चम्पारण्यवास्तव्य—पण्डितवरस्य "श्रीचन्द्रशेखरधरपुत्रस्य":—१८. ६. ०४."

कलिकाता, वङ्गवेदविद्यालयः। संवत् १८६३। } (सामकण्ठेतिलब्धयशोनामा), श्रीहितव्रतशर्म्मा। प्रकाशकः।

———

॥ ओ३म् ॥

॥ प्रकाशकोक्तिः ॥

गोत्रे काश्यपजे कुले सुविदिते गार्हीतिचट्टान्वये,
जातश्चावसथः सदाशिवमुनिस्तस्यैव वंश्यो महान् ।
वेदानामधिदैवतार्थकरणे चैकोऽस्य यो भारते ,
चातुर्वेद्यविधिज्ञवैदिकगुरुः सत्यव्रतो नः पिता ॥ १ ॥
ज्ञात्वा यत्सत्यनिष्ठां प्रमुदितगुरुणाऽऽख्यायि सत्यव्रतो यः,
बुन्दीशोऽप्याह तुष्टः सदसि परिचयाद् यं हि सामश्रमीति ।
हारिश्चन्द्रीयपत्ते जयपुरसमिती येन लब्धाः प्रतिष्ठाः,
माध्यस्थ्यं येन काश्यां कृतमुभयमतं श्रीदयानन्दवादे ॥ २ ॥
शास्त्रीश्रीभक्तरामो लवपुरवसतिर् , दाक्षिणात्यश्च शास्त्री-
रावः श्रीनारसिंहो , ऽमृतसरनिलयः श्रीजगन्नाथ आर्यः ।
काश्यां वङ्गे च गौडे जय-शिव-कनकाः, गुर्ज्जरेऽप्यच्चयाद्याः,
द्वाराणाद्याः सनीडा हित-शिव-भवका यस्य शिष्याश्च शस्ताः ॥ ३ ॥
सामाम्नानभृता ऋचाश्च यजुषां विभ्राजमाना मपि ,
येनाकारि सतां मुदे विवरणं वङ्गानुवादस्तथा ।
टीका देवगिरा दशापि रचिता वेदेषु सूत्रेषु च ,
तस्याद्याः प्रथितास्त्रिवेदमथिता ग्रन्थाश्च यस्याष्टकौ ॥ ४ ॥
प्राच्यापाच्यबुधा अवाच्यविबुधा औदीच्यविद्याधनाः ,
साक्षां शिक्षयितुः प्रशस्तिलिपिभिर्गायन्ति यस्योद्यशः ।
सत्यार्थाध्ययनप्रवृत्तिवशगा आयान्ति ते यन्मठे ,
तेनेदं रचितं त्रिवेदगमकं नैरुक्तनेत्राञ्जनम् ॥ ५ ॥

न्यायाम्भस्य सामगाचार्यस्य प्राच्योदीच्यापाच्यावाच्यभारतीय-
महामहोपाध्यायादिधीमल्लिखितानि बहूनि
प्रशस्तिपत्राणि, तेषा मेकतमादिह
उद्धरामि श्लोकद्वयम्—

"आ रत्नाकरमेखलावनितले द्वीपे त्विनोऽन्यत्र च,
न स्पर्द्धी न च यत्समोऽपि च बुधो सद्वेदविद्यागुणैः।
अर्थाना मनिशं चमत्कृतिमतां कोशोऽनिशं दर्शकः,
विद्वन्मूर्द्धकिरीटरत्ननिचये चिन्तामणिस्यायणीः॥

× × × ×

विद्याविद्युदुदारदीप्तिनिचयैर्भूमण्डलं रोचयन्,
स्वान्तध्वान्तमदान्नयान्तजनुषां सद्यः समुन्मोचयन्।
वेदव्याकृतिजैमिनीयजटिलान् भावान् सदालोचयन्,
कोऽप्यान्नाययशा जयत्यतितरां सत्यव्रतः सामगः॥"—इति।

चम्पारण्यवास्तव्य—पण्डितवरस्य "श्रीचन्द्रशेखरधरशर्म्मणः—१८. ६. ०४."

कलिकाता, वङ्गवेदविद्यालयः। संवत् १८६३।

(सामकण्ठेतिलब्धयशोनामा), श्रीव्रतव्रतशर्म्मा।
प्रकाशकः।

———

॥ अथ निरुक्तालोचनविषय सूची ॥

विषय:	पृ०
अथ निरुक्तालोचनोपक्रम: ...	१
यास्कप्रतस्यास्य निघण्टुभाष्यस्य निरुक्तत्वप्रतिपादनारम्भ:	१
षड्ङ्गानां सायणोक्तलक्षणानि	१
शिक्षायन्थपरिगणनादि ...	४
निघण्टोरपि निरुक्तत्वम् ...	५
निघण्टोर्निरुक्तत्वखण्डनपराणां छान्दोग्य-गोपथ-प्रातिशाख्य-दितीयवृत्ति-मनुटीका-महाभारत-यास्कीयनिरुक्त-भाजानामश्लोक-पातञ्जल-गणपाठ-हरिकारिका-निघण्टुनिर्वचन-निरुक्तवृत्ति-प्रस्थानभेदवाक्यानां यवहारस्य च प्रामाण्यतया प्रदर्शनारम्भ:	६
प्रथमाध्यायादे: षष्ठाध्यायत्वादि	१३
अथ निघण्टुनिरुक्तयो: क्रमात् समाम्नायत्ववेदाङ्गत्वे ...	१६
वेदाङ्गानां षट्त्वाख्यानम् ...	१६
अथ निघण्टुनिरुक्तयो: प्रणेतारौ	२२
प्रस्थानभेदमतखण्डनपूर्वकं सायण-देवराज-दुर्गाचार्य-महाभारत-क्रमतेन पुराकल्पश्रुतवचनेन च निघण्टोरनिर्दिष्टकालीनत्वम्	२२
पुराकल्पश्रुतस्य व्याख्यानम् ...	२४
निरुक्तस्य कर्तृनिर्णय:	२६
अथ यास्कपरिचयारम्भ: ...	२७
ब्राह्मण-छन्दोग्यग्रन्थ-ऋक्प्रातिशाख्य-पाणिनिसूचोक्तिभ्यो ऽन्योऽयमिति निर्णय: ...	२७
महाभारतीययास्क एवायम्	३१
अथ यास्कस्य मुख्यर्षित्वं नास्त्यपि मुनित्व मस्तीति प्रतिपादनम्	३२
मुख्यर्षिलक्षणम्, द्रष्टृत्वकर्तृत्वयोरभिन्नत्वम्, ब्राह्मणग्रन्थकृता मातिदेशिकर्षित्वम्, ऋषिवंशप्रभवत्वेन ऋषित्वं न लभ्य मिति प्रतिपादनाय प्रत्यावाश्वोपाख्यानावतरणम्, ऋषित्वे विध्यवर्णनम्, महाभारतवीजोल्लेख:, आश्वलायनीयग्रन्थसूत्रे मुख्यामुख्यर्षीणां नामस्मरणप्रदर्शनञ्च ...	३२—४४
अथ निरुक्तस्य द्वादशाध्यायाना मेव यास्कीयत्वनिरूपणारम्भ:	४५
देवराजमते द्वादशाध्यायित्वम्	४५
दुर्गाचार्यमते सायणाचार्यमते च	

निरुक्तस्य त्रयोदशाध्यायित्वम् ४६
कात्यायनपतञ्जल्योर्नायेऽपि तथा ४६
अथ यास्कस्यास्य जीवितसमय-
निर्णयाय यत्नारम्भः ... ५०
कालनिर्णयोपयोग्यार्षैतिह्यासिक-
ग्रन्थानां दुर्लभता ... ५०
कालनिर्णये संहिताग्रन्थानाम् ५१
——ब्राह्मणवचनानाम् ... ५२
———पौराणिकवचनानाम् ५३
———षड्गुरुशिष्यादीनाम् ... ५५
———सुखाद्यादीनाम् ... ५६
निरुक्तस्यास्य प्रचलितमहाभार-
तात्, भाष्यकारात् पतञ्ज-
लेश्च, प्रचलितमनुसंहितातो-
ऽपि प्राचीनत्वनिर्णयः ५७—६१
पतञ्जलेः ४५०० खृ० पू० महाभाषा-
प्रणयन मिति निर्णयः ६४—७२
——चन्द्रगुप्तकालीनत्वखण्डनम् ७३
——पुष्यमित्रयाजित्वखण्डनम् ७४
——यवनावरोधसमकालीनत्वख०७६
——पाणिनिसमकालीनत्वख० ७८
———वासवदत्तोत्तरभवत्वख० ७६
पतञ्जलेः योगशास्त्रकृत्-वैद्यशास्त्र-
कृद्भ्यां भिन्नत्वाख्यानम् ... ८२
कात्यकृत्स्न-पाराशर्य-कण्वभाल्ल-
स्थविर-कपिल-पाशुपतकार-
चार्वाक-जलूक-कात्यायनेभ्यः
परकालीनत्वाख्यानम् ८४—८८
मनुसंहितायाः ८०० खृ० पू०
प्रणयनकालनिरूपणम् ८८—६४
आदिपतञ्जलि-पाराशर्य-काश्य-
कृत्स्न-जैमिनि-कण्वाश्व-गौतम-
कपिल-आसुरि-वार्षिककार-
कात्यायनेभ्यः परकालीनत्वम् ६५
घसां दर्शनानां पौर्वापर्यम् ६७
कात्यायनस्य १२०० खृ० पू० आक-
रणवार्त्तिकप्रणयनम् १००—१०३
——यास्कात् परभवत्वनिर्णयः १०२
पाणिनेः २३०० खृ० पू० सर्वतो-
मुखादिशाकटायनप्रणयनकालः १०४
——यास्कात् पूर्वजत्वनिर्णयः १०५
——आदिशाकटायनकर्तृत्वम् १०७
——ऋक्संहिताकारपरभवत्वम् १०६
——क्रमसंहिताकृद्भ्यश्चावरत्वं ११०
——चातुर्याननप्रभृतिभ्यश्च १११
—अष्टाध्यायिकेभ्यपि प्राचुर्यम् ११४
——माहेशसूत्रस्यातत्यत्वनिर्णयः ११६
——अत्रिप्रभृतिभ्यः परभवत्वम् ११६
कुमारशाकटायनस्य प्राचीनत्वम् ११७
कवि-पाणिनेस्तु शाकटायनभाष्य-
कृतः पतञ्जलेरप्यर्वाचीनत्वं ११७
——युधिष्ठिरादिभ्यः परभवत्वेऽपि
शुक्लात् पूर्वजत्वम् ... ११८
शाकेः पाणिनेः परजत्वं कात्याय-
नतो यास्काच्च पूर्वजत्वम् ११६
शौनकस्य २००० खृ० पू० ऋक्-

प्रतिशाख्यप्रणयनकालः ... १२२
——शाङ्किसमकालिकत्वम् ... १२२
प्रातिशाख्यात् प्राक् प्राग्निवेशीयम् १२५
प्रातिशाख्यकृच्छौनकस्यर्क्तन्त्रद्रष्टृ-
मण्डलद्रष्टृ-कल्पकारशाखाकार-
ग्रिह्यादृभ्यः शौनकेभ्यो विभिन्नत्वं परजत्वञ्च १२६
प्राचीनार्याणां गोत्रनामव्यवहार
एव नामविभ्रमहेतुः ... १२८
ऋग्वेदिवताकृच्छौनकः प्रातिशाख्यकृत्; शौनकात् आक-
रणकृत्प्राग्निवेश्यावरजः ... १२९
यास्कस्य १९००खृपूर्वजत्वम् १३०
बोधलिङ्गीयारोतिरिवावलम्बिता १३१
अथ मन्त्रार्थबोधायैव निरुक्तम् १३२
ब्राह्मणार्थबोधाय चेत्यन्यमतम् १३३
अथ वेदशब्दार्थादिनिर्णयः ... १३४
वेदः = विद्या १३४
श्रुतिः = प्रवादः १४०
आम्नायः = अभ्यस्तः १४२
त्रयी = त्रिविधरचनामयः ... ११६
ऋग्यजुस्सामाथर्वसंहितानां
समकालत्वनिर्द्धारणम्: १४७
संहितानां त्रयीत्वम्··· ... १५१
अथर्वनामर्षेर्वेदविभाजकत्वम् १५३
ऋगादीनामधिकारिणां यथोद्दियमाणान्यभिधानानि ... १५४
छन्दः = प्रबन्धः १५६
स्वाध्यायः = सव्यगाधीयः ... १६५
आगमः आदेशः १६५
निगमः = निगमनम् १६५
मन्त्रभागस्यैव मुख्यं निगमत्वम्,
ब्राह्मणभागस्य तु तद्व्याख्या-
ग्रन्थत्वेनेति प्रतिपादनम् ... १६६
यास्क-जैमिनि-पूर्वस्वामि-
कृतानि मन्त्रलक्षणानि १७०
मन्त्राणां त्रयोदशविधत्वाख्यानम् १७२
मन्त्रभागः = संहिता १७४
संहितापाठप्रकारपरिगणनम् १७
शाखोत्पत्तिहेतुकथनम् ... १७
ऋग्वेदीयशाखाः १७५
यजुर्वेदीयशाखाः १७६
सामवेदीयशाखाः १७६
अथर्ववेदीयशाखाः १७७
एकस्य वेदस्यैकशाखाध्ययनेनैव
सर्वशाखाध्ययनं सम्पद्यते ... १७७
यजुःशाखानां द्वैविध्यम् ... १७८
यजुषो द्वैविध्यहेतुकथादि ... १७८
सर्वे संहिताना मेककालजत्वम् १७९
ऋग्वेदीयद्वितीयमण्डलस्यापेक्षा-
कृतार्वाचीनत्वमतखण्डनम् १८०
ऋग्वेदीयदशममण्डलस्य परिग्रिष्टरूपत्वमतखण्डनम् ... १८५
सामवेदीयाना मूढमन्त्राणा
मूढतत्वमतखण्डनम् ... १८७
ब्राह्मणलक्षणानामुपपादनम् १८९

ब्राह्मणवाक्यानां दशविधत्वम् १६२
——दशविधातिरिक्तत्वमपि १६३
अर्थवादविचारः १६५
ब्राह्मणग्रन्थसंस्थानां संहिता-
सङ्ज्ञानानुगतत्वम् १६७
निदानसूत्रेभ्यो वेदाङ्गानि ... १६८
अनुब्राह्मणग्रन्थपरिचयः ... १६६
सायणाचार्यस्यासामग्रत्वम् ... २०२
आरण्यकानां प्रायस्त्रयन्तर्गतत्वं २०३
उपनिषदाञ्च कासाञ्चित्त्रयात्वं २०७
निरुक्तस्य पाणिनियास्कादि-
विदितत्वोपपादनम् ... २०८
अथ वेदोत्पत्तिकालनिर्णययत्नः २१०
तदुत्पत्तिकालनिर्णयस्याग्राह्यता २११
अज्ञातकालिकर्षिकृतत्वम् ... २१३
धौमतक्रतत्वसूचको मन्त्रः ... २१४
ब्राह्मणकालनिर्णयाग्रः ... २१७
शतपथब्राह्मणस्यातिप्राचीनत्व
मितिमतस्य खण्डनम् ... २१६
अथ निरुक्तप्रतिपाद्यविषयाः २२३
निरुक्तशास्त्रस्य अनिर्दिष्टकालि-
कत्वसूचकबीजकथनम् ... २२३
निरुक्तोक्तविषयाणां मनुक्रमेण
सङ्क्षेपतो वर्णनम् ... २२४
निरुक्तप्रतिपाद्यानां विंशेषार्थानां
परिगणनारम्भः २२४—२६१
तत्र विज्ञानोदाहरणानि २४६—२५५
अथ देवराजदुर्गाचार्ययोःसमयौ २६२
रामानुजस्वामिनो जन्म संवत् १०१२
उवटभट्टस्य १००२ संगते
मन्त्रभाष्यप्रणयननिरूपणम् २६३
दुर्गाचार्यो देवराजादवरः ... २६५
——सायणाचार्यस्तु प्राग्भवः २६५
सायणाचार्यस्य सं० १४०० गते
वेदभाष्यप्रणयननिरूपणम् २६६
महीधरमिश्रस्य सं० ११७६—
१२०० मध्ये यजुर्भाष्यप्रणयनम् २६७
देवराजस्य सं० ११५१—११७५ मध्ये
निघण्टुनिर्वचनप्रणयनं २६८
यथालब्धतत्परिचयारम्भः ... २६६
निघण्टुनिर्वचननामहेतुः २७०
हरदत्तमिश्रस्य, स्कन्दस्वामिनः,
भवस्वामिनः, गुहदेवस्य,
उवटभट्टस्य, औव्विनासस्य,
माधवदेवस्य, वेङ्कटाचार्यस्य,
विनायकभट्टस्य, भास्करमिश्रस्य,
भास्करभट्टस्य, भरतस्वामिनश्च
परिचयः ... ... २७०—२७७
देवराजस्य प्रशंसा निन्दा च २७७
——अलब्धनिरूपणभ्युपगमः २७६
ब्राह्मणवचनानाञ्च निगमत्वम् २७६
दुर्गाचार्यस्य दाक्षिणात्यत्वम् ... २८०
——व्याख्यानप्रशंसोदाहरणानि २८०
व्याख्यानदूषणोदाहरणानि २८१-२६०

Parid baran Mukerji.
1 College Row. Calcutta,

॥ अथ निरुक्तालोचनम् ॥

"साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य: उपदेशेन मन्त्रान्सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिलग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च" (१. ६. ५.)

अथेदमालोचयामः।— किमिदं निरुक्तम्? तस्येतस्य वेदाङ्गत्व मस्ति नास्ति वा? एतन्मूलस्य कः प्रणेता, को वेतस्य? कः किल यास्कः? अस्य ऋषित्व मस्ति नास्ति वा? कियांश्च ग्रन्थो यास्कीयः? कश्च कालस्तस्य यास्कस्य? कैमर्थिकी तस्यैषा प्रवृत्तिः? कोऽयं वेदः? वेदकालनिर्णयः; ग्रन्थोऽग्रन्थो वास्माकम्? के विषयास्चैतन्निरुक्तप्रतिपाद्याः? प्रसङ्गतो देवराज-सायणाचार्यदुर्गाचार्याणाञ्च कालादिकं किञ्चिदालोच्य मिति दादश्च॥

(१)

तत्रादौ किमिदं निरुक्त मिति। ऋग्भाष्यभूमिकायां सायणस्त्वेव माह— "अतिगम्भीरस्य वेदस्यार्थं सम्बोधयितुं शिक्षादीनि षड्ङ्गानि प्रवृत्तानि। अत एव तेषा मपरविद्या-रूपत्वं मुण्डकोपनिषद्याथर्वणिका आमनन्ति— 'द्वे विद्ये वेदि-तव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिष मिति; अथ परा यया

तदक्षर मधिगम्यते'–इति। साधनभूतधर्मज्ञानहेतुत्वात् षड़ङ्ग-सहितानां कर्मकाण्डाना मपरविद्यात्वम्; परमपुरुषार्थभूत-ब्रह्मज्ञानहेतुत्वात् उपनिषदां परविद्यात्वम्।

(१) वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा। तथाच तैत्तिरीया उपनिषदारम्भे समामनन्ति— 'शिक्षां व्याख्या-स्यामः। वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तः शिक्षा-ध्यायः'–इति। ०—०। तस्मात् स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः।

(२) कल्पस्त्वाश्वलायनापस्तम्बबोधायनादिसूत्रम्; कल्प्यते समर्थ्यते यागप्रयोगोऽनेति व्युत्पत्तेः। ०—०। अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठान मुपदिश्योपकरोति। ०—०। तस्मात् शिक्षेव कल्पोऽप्यपेक्षितः।

(३) व्याकरण मपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थ-निश्चयायोपयुज्यते। ०—०। तस्मादियं वाक् इदानी मपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः। ०—०।

(४ क) अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्नि-रुक्तम्। 'गौः ग्मा ज्मा क्ष्मा क्षा क्षमा'–इत्यारभ्य 'वसवः वाजिनः देवपत्नयो देवपत्नाः'–इत्यन्तो यः पदानां समाम्नायः समाम्नातः, तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते; एतावन्ति पृथिवीनामानि, एतावन्ति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्ट मभिहितत्वात्। तदेतन्निरुक्तं त्रिकाण्डम्। ०—०। पञ्चाध्यायरूपे काण्डत्रयात्मके एतस्मिन् ग्रन्थे परनिरपेक्षितया पदार्थस्योक्तत्वात् तस्य ग्रन्थस्य निरुक्तत्वम्।

(४ ख) तदुव्याख्यानञ्च 'समाम्नायः समाम्नातः'— इत्या-

रभ्य 'तस्यास्तस्यास्याङ्गाद्य मनुभवत्यनुभवति'-इत्यन्तैर्द्वादशभिरध्यायैर्यास्कां निर्ममे, तदपि निरुक्तं मुच्यते ; एकैकस्य पदस्य सम्भाविता अवयवार्थास्तत्र निःशेषेणोच्यन्त इति व्युत्पत्तेः।०—०। तस्माद् वेदार्थावबोधायोपयुक्तं निरुक्तम्।

(५) तथा छन्दोग्रन्थोऽप्युपयुज्यते, छन्दोविशेषाणां तत्र तत्र विहितत्वात्। ०—०। 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति, वाध्यापयति वा, स्थाणुं वर्च्छति, गर्त्तं वा पद्यति, प्र वा मीयते, पापीयान् भवति, यातयामान्यस्य छन्दांसि भवन्ति ; तस्मादेतानि मन्त्रे मन्त्रे विद्यात्'-इति श्रूयते (सा० आ० ब्रा० १प्र० १ख०)। तस्मात्तावद्वेदनाय छन्दो ग्रन्थ उपयुज्यते।

(६) ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रन्थे विहितम्—'यज्ञकालार्थसिद्धये'-इति। कालविशेषविधयश्च श्रूयन्ते—'संवत्सरमेतद्व्रतं चरत्संवत्सरमुख्यं भूत्वेत्येवमादयः संवत्सरविधयः। वसन्ते ब्राह्मणोऽग्नि मादधीत, ग्रीष्मे राजन्य आदधीत, शरदि वैश्य आदधीतेत्याद्या ऋतुविधयः। मासि मासि सत्पृष्ठान्युपयन्ति, मासि मास्यतिग्राह्या गृह्यन्त इति मासविधयः। यं कामयेत वसीयान्भूयादिति तं पूर्वपक्षे याजयेदित्याद्याः पक्षविधयः। एकाष्टक्यायां दीक्षेरन् फल्गुनीपूर्णमासे दीक्षेरन्नित्याद्यास्तिथिविधयः। प्रातर्जुहोति सायं जुहोतीत्याद्याः प्रातःकालादिविधयः। कृत्तिकास्वग्नि मादधीतेत्याद्या नक्षत्रविधयः। अतः कालविशेषान् अवगमयितुं ज्योतिष मुपयुज्यते।

एतेषां वेदार्थोपकारिणां षण्णां ग्रन्थानां वेदाङ्गत्वं शिक्षाया मेव मुदीरितम्—'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ

पठ्यते। ज्योतिषा मयनं चक्षुर्निरुक्तं श्रोत्र मुच्यते। शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्ग मधीत्यैव ब्रह्मलोके महीयते'-इति"-इति।

अथात्र किञ्चित् प्रासङ्गिक मप्युच्यते। सायणीयभाष्ये यदुद्धृतो दृश्यते 'शिक्षाम्' इति ह्रस्वेकारपाठः, मूलविरुद्ध इति स नूनं लेखकमुद्राकरप्रमादजः; तैत्तिरीयारण्यकोपनिषदि हि 'शीक्षाम्'-इति दीर्घेकारश्रवणात्। किञ्च औपनिषदः शिक्षाध्यायस्तु शिक्षणीयविद्यानां नामबोधक एव। तथाच शिक्षाग्रन्थेषु वर्णाऽकारादिः, स्वर उदात्तादिः, मात्रा ह्रस्वादिः, बलं स्थानप्रयत्नौ, साम निषादादिः, सन्तानः विकर्षणादिः; एषां बोधन मेव शिक्षाग्रन्थप्रयोजन मित्युपदेशः फलितः। ते तु शिक्षाग्रन्थाः सन्ति बहवः; तत्र विंशतिसङ्ख्याका अस्माभिर्दृष्टाः। तेषां नामानि यथा—

(१) याज्ञवल्क्यशिक्षा, (२) वासिष्ठी शिक्षा,
(३) कात्यायनी शिक्षा, (४) पाराशरी शिक्षा,
(५) माण्डव्यशिक्षा, (६) अमोघानन्दिनी शिक्षा,
(७) लघ्वमोघानन्दिनी शिक्षा, (८) माध्यन्दिनीयशिक्षा,
(९) लघुमाध्यन्दिनीयशिक्षा, (१०) अमरेशी शिक्षा,
(११) केशवीशिक्षा, (१२) खराङ्कुशशिक्षा,
(१३) षोडशश्लोकी शिक्षा, (१४) अक्षरनिर्णयशिक्षा,
(१५) स्वरभक्तिलक्षणशिक्षा, (१६) क्रमसन्धानशिक्षा,
(१७) गलष्टक्शिक्षा, (१८) मनःस्वारशिक्षा,
(१९) प्रातिशाख्यप्रदीपशिक्षा, (२०) वेदसूत्रपरिभाषाशिक्षा,
(२१) यजुर्विधानशिक्षा, (२२) स्वराष्टकशिक्षा,

(२३) क्रमकारिका शिक्षा, (२४) पाणिनीयशिक्षा,
(२५) नारदीयशिक्षा, (२६) गौतमी शिक्षा,
(२७) लोमशी शिक्षा, (२८) माण्डूकी शिक्षा,
(२९) गौनकीया शिक्षा, (३०) आथर्वणशिक्षा चेति।

नैता: सर्वा एव शिक्षा: सर्वासा मेव वेदशाखानाम्, नापि चैकविषया:; प्रत्युत सर्वा एव मिथोविभिन्नविषयप्रधाना:, अपि विभिन्नवेदशाखीया:। यथा— सामवेदीयस्वरसामसन्तानादि-विज्ञानाय 'नारदीया', 'लोमशी', 'गौतमी' चेत्येता: तिस्र: शिक्षा: सामवेदमात्रस्यैव। सर्वासा मेवासां शिक्षाणां तैत्ति-रीयान्नात-वर्णस्वराद्यन्यतमविषयत्वेन शिक्षेत्येकेनैव पदेन ग्रह-णीयत्व मिति सर्वासा मेव शिक्षानामाङ्गत्वम्। एवं कल्पग्रन्थाना मप्यनेकत्वं शाखाभेदजन्यं नूनं स्वीकार्यम्! तत्राद्याप्यविलुप्ता: एकस्य सामवेदस्यैव त्रय: कल्पग्रन्था:— लाट्यायनसूत्रम्, द्राह्यायण-सूत्रम्, उपग्रन्थसूत्रञ्चेति; तैत्तिरीयकाना मपि बोधायनापस्तम्बे। तथा सन्ति व्याकरणान्यपि बहूनि। तत्र पाणिनीयस्यैवैकस्यादि-सर्वतोमुखत्वम्, प्रातिशाख्यानान्तु नामत एवावगम्यते प्रतिशाख मेकैकत्व मिति। विशेषतस्तु सामवेदस्य स्वरस्तोभविकर्षणाद्यु-पदेशाय बहूनि व्याकरणानि समाम्नातानि। तेषा मिमान्येवा-स्माभिरधीतानि— सामतन्त्रम्, ऋक्तन्त्रम् पुष्पसूत्रम्, पञ्चविध-सूत्रम्, निदानसूत्रम्, अनुपदसूत्रम्, तण्डालक्षणसूत्रम्, छल-सूत्रञ्चेत्यष्टौ। निघण्टुनामा निरुक्तमूलग्रन्थस्त्वेक एव चिरात् सुविदित:। निरुक्त मपीदानी मेक मेव यास्कीयं सुप्रसिद्ध मिति॥

अथ सर्ववेदभाष्यकारस्य सायणाचार्यस्य नये तु द्वे निरुक्ते; तत्र मूलं पञ्चाध्यायी, तद्व्याख्यानं द्वादशाध्यायीति। तत्र निरुक्त-

शब्दव्युत्पत्तिप्रकारश्च द्विविध एव; 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'-इति, 'एकैकस्य पदस्य सम्भाविता अवयवार्था यत्र निःशेषेणोच्यन्ते तन्निरुक्तम्'-इति च। तथाच मुण्डकोपनिषदादौ यच्छ्रूयते निरुक्त मिति पदम्, सायणमते तदुभयोरेव बोधकम्; शिक्षावचनतोऽपि यद् ज्ञायते निरुक्तस्य वेदश्रोत्रत्वम्, तन्मते तदप्युभयविधस्यैव। ततश्चास्य नये द्वयोरेव वेदाङ्गत्वं समम्; द्वयोरेव निरुक्त मित्येवैकनाम्ना बोधाच्च अज्ञानां षट्सङ्ख्यात्व मप्यवितथ मेवेति।

तदिदानीं सायणोक्तं तदेव परीक्षितु मेष प्रबन्धोऽवतार्यते।—

श्रूयते ह्येवं छान्दोग्योपनिषदि—"स वा एष आत्मा हृदि, तस्य तदेव निरुक्तए हृदय मिति तस्माद्धृदयम् (८. ३. ३.)"-इति। तदेतत् हृदयनिर्वचनं क्वास्ति निघण्टौ, यास्कीये वा? न क्वापि। निघण्टौ तु तादृग्निर्वचनदर्शनस्य सम्भावनैव नास्ति; यास्कीये निघण्टुभाष्यरूपे निरुक्तग्रन्थे ऽपि हृदयशब्दनिर्वचनावसरस्तु बहुत्र विद्यते (९. ३. १२., १०. ३. ११., १३. १. १३., २. ७., ४. ४.), परं न क्वापि तन्निर्वचनं क्वत मस्ति। ततश्चेमे सुव्यक्ते— नेदं यास्कीयं निरुक्तं प्रादुरभूत् छान्दोग्योपनिषदः पुरस्तात्, 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'-इति सायणीयं मान्यं निरुक्तलक्षणं च नाभिमतं छान्दोग्योपनिषत्प्रवक्तुरिति।

श्रूयते चैवं गोपथब्राह्मणे— "ओङ्कारं पृच्छामः ०—० किन्निरुक्तम्? ०—० आपेरोङ्कारः सर्वं माप्नोतीत्यर्थः (१. १. १४—३०.)"-इत्यादि। तदेतदोङ्कारनिर्वचनं निघण्टौ, यास्कीये वा क्वास्ति? एतत्प्रश्नोत्तरं चेद मेव वक्तव्यं न

क्षापीति। निघण्टो तु तादृशनिर्वचनदर्शनस्य सम्भावनैव नास्ति ; निघण्टुभाष्यात्मके यास्कीये निरुक्तेऽपि ॐशब्दनिर्वचनावसरस्तु विद्यते (१३. १. १०.) परं न च तत्र तन्निर्वचनं कृत मस्ति। तथाच अत्रापीद मेव द्वयं सुव्यक्तम्— नेदं यास्कीयं निरुक्त माविरभूत् गोपथब्राह्मणतः पुरस्तात् , न च 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'–इति सायणीय मार्षं निरुक्तलक्षण मभिमतं गोपथब्राह्मणप्रवक्तुरिति।

बह्वृक्प्रातिशाख्यद्वितीयवृत्तिकारः खलु देवमित्रपुत्रो विष्णुमित्रोऽप्येव माह— "निरुक्तं पदविभागमन्त्रार्थदेवतानिर्वचनार्थं शास्त्रम् (१ प०)"–इति। अतो ज्ञायते तस्यापि सायणीय मन्त्यं निरुक्तलक्षण मेव सम्मत मिति ; आद्यलक्षणलक्षिते निघण्टुसमाम्नाये मन्त्रार्थप्रभृतिनिरूपणोपायस्यादर्शनादिति।

मनुसंहिताया अन्यतमटीकाकारस्य कुल्लूकभट्टस्य मतेऽपि निर्वचनमूलक एव निरुक्तशब्दप्रयोग उपलभ्यते। तथाहि— "आढ्यभुग् वृषलीतल्पम् (३ , २५०)"–इति श्लोकस्य व्याख्यानावसरे प्रोक्तं तेन "वृषलीशब्दोऽत्र स्त्रीपर इत्याहुः। निरुक्तञ्च कुर्वन्ति— वृषस्यन्ती चपलयति भर्त्तार मिति वृषली। ब्राह्मणस्य परिणीता ब्राह्मण्यपि वृषलीति"–इति। नैतद् यास्कीयं वचन मिहोद्धृतं कुल्लूकेन , नापि मानवम् (८. १६.) ; अपि तु केषाञ्चिदपरटीकाकारादीनां मत मेव मित्येव प्रदर्शितम्। यास्कस्तु— "वृषलो वृषशीलो भवति वृषाशीलो वा (२. ३. ४.)" –इत्येव निरवोचत्। अत्र त्वेतदेव समालोच्यं यदनतिप्राचीनस्य पण्डितस्य कुल्लूकस्यापि प्रयोगे निरुक्तं न निघण्टुपर मिति। एव मपरत्रापि तत्रैव। तथाहि— "मां स भक्षयितामुत्र यस्य

मांस मिहाम्यहम् । एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः (५. ५५.)"-इत्यस्य मानववचनस्य व्याख्यानावसरे श्लोकं तेनैव कुल्लूकभट्टेन— "एतत् मांसशब्दस्य निरुक्तं पण्डिताः प्रवदन्ति । इति मांसशब्दस्य निर्वचन मवैधमांसभक्षणपापफलकथनार्थम्"-इति । इहापि कुल्लूकभट्टमते ऽपि निर्वचनपर मेव निरुक्तम्, न तु निघण्टुपाठपर मित्येव प्रदर्शन मस्माकं मिष्टम् । प्रदर्शित-निर्वचनन्तु न यास्कोक्तम् ; अपि मनुसंहिताकारकालिकैः कैश्चिद्विद्वद्भिरनुमोदितं तत्संहिताकृतैव कृतम् । यास्कस्तु मनु-संहितोक्तो ऽपि बहुप्राचीनः, तत्काले तु मांसशब्दस्य निर्वचन मन्यथैव प्रचलित मासीदित्यन्यदेतत् । तथाहि— "मांसं माननं वा मानसं वा मनोऽस्मिन् सीदतीति वा (४. १. ३.)"-इति यास्कीयं निरुक्तम् । "एतद्वै परम मन्नाद्यं यन्मांसम्"-इति च शतपथीया श्रुतिर्यास्कीयस्य तन्निर्वचनस्य साधिका भवितु मर्हति वेति कथान्तरम् । प्रकृते तु कुल्लूकस्यापि सायणीयं द्वितीय-निरुक्तालक्षण मेवाभिमतम् ; न त्वाद्यलक्षणं निघण्टुपर मित्ये-वेहास्माभिरियं प्रदर्शितम् ।

आख्यायते महाभारते चादिपर्वणि— "महत्त्वाद् भारवत्त्वाच्च महाभारत मुच्यते । निरुक्त मस्य यो वेद सर्वपापैः स मुच्यते (१. १. २७०.)"-इति । एवञ्चेद मेव प्रतीयते— सायणीयं द्वितीयं निरुक्तालक्षण मेवाभिमतं महाभारतकारस्यापि ; न त्वाद्यम् । तत्र मोक्षधर्मेऽपि— "अर्जुन उवाच । भगवन् भूत-भव्येश सर्वभूतसृगव्यय । लोकधाम जगन्नाथ लोकानां मभयप्रद । यानि नामानि ते देव कीर्त्तितानि महर्षिभिः । वेदेषु सपुराणेषु यानि गुह्यानि कर्मभिः । तेषां निरुक्तं त्वत्तोऽहं श्रोतु मिच्छामि

वेशव। न ह्यन्यो वर्णयेद्वाक्यां निरुक्तं त्वा ऋते प्रभो !। श्रीभगवानुवाच। ०—०। गौणानि तत्र नामानि कर्मजानि च कानि चित्। निरुक्तं कर्मजानां त्वं शृणुष्व प्रयतोऽनघ !। ०—०। नराणां मयनं ख्यात मह मेकः सनातनः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं मम तत् पूर्वं मतो नारायणो ह्यहम्।०—०। नामानि चैव गुह्यानि निरुक्तानि च भारत !। ऋषिभिः कथितानीह यानि सङ्कीर्त्तितानि ते (३४१, ३४२ अ० १—५६, १—१३८ श्लो०)"—इति। एव मपीद मेव प्रतीयते— सायणीयं द्वितीयं निरुक्तलक्षण मेवाभिमतं मोक्षधर्मलेखकालेऽपि ; न त्वाद्यम्। तत्रैव निघण्टुनाम चाख्यातं दृश्यते, परं न तन्निरुक्तपर मपि तु पदपाठात्मकग्रन्थविशेषपर मेव। तथाहि— "निघण्टुकपदाख्याने विद्धि मां वृष मुत्तमम्। कपिवराङ्गः श्रेष्ठस्य धर्मस्य वृष उच्यते। तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः (३४२ अ० ८६, ८७. श्लो०)"—इति। पठितश्चात्र निघण्टौ "वृषाकपिः"—इति (४. ६. १६.)। तदेवं निघण्टोर्निरुक्तत्वं नेष्टं महाभारतकारस्येत्यपि सुवचम्।

यास्कीयेऽत्र निरुक्ते च निरुक्तस्योल्लेखो बहुत्रैवोद्घोषितः, परं न तत्र क्वापि निघण्टोर्ग्रहणं विवक्षितम्। तथाहि— "इतीमानि चत्वारि पदजातान्युक्तान्तानि— नामाख्याते चोपसर्गनिपाताश्च। तत्र नामाख्यातजानीति शाकटायनो नैरुक्तसमयश्च (१. ४. १.)"—इत्येवमादीनि द्रष्टव्यानि। निघण्टोस्तु निघण्टुनाम्नैव व्यपदेश आदृतः ; न क्वापि निरुक्तत्वेन। तथाहि ग्रन्थारम्भे एव— "निगमनान्निघण्टव उच्यन्ते (१. १. १.)"—इति। अन्यभूमिकायां (१. ६. ५.) निघण्टोः स्वरूपं पारि-

भाषिकलक्षणं च प्रदर्शितम्, तदप्यत्र समालोचनीय मेव। तथाहि—"एतावन्तः समानकर्माणो धातवः, ०—०, एतावन्त्यस्य सत्त्वस्य नामधेयानि, एतावता मर्थाना मिद मभिधानं नैघण्टुक मिदं देवताना मप्राधान्येनेद मिति; तदुदात्तदैवते मन्त्रे निपतति नैघण्टुकं तत्"–इत्यादि। किञ्चात्र द्वितीयाध्याय-प्रथमपादे यन्निरुक्तशास्त्रप्रयोजनं वर्णितम् (२. १. १—७.), तदपि निघण्टुपाठादेव न सम्भवति। अतः सायणीये द्वितीयनिरुक्तलक्षणे एव भगवतो यास्कस्यापि सम्मतिर्न्यायी; न त्वाद्ये।

भगवता कात्यायनेनाप्युक्तम् श्राद्धसूत्रमश्लोकग्रन्थे—

"बाहुलकं भवत्यनुदृष्टेर्नैगमरूढिभवं हि सुसाधु।
नाम च धातुज माह निरुक्ते व्याकरणे शकटस्य च तोकम्"–इति।

तदेतच्छ्लोकपर्य्यालोचनेन च बुध्यते सायणीयं द्वितीयं निरुक्तलक्षण मेव भगवतः कात्यायनस्यापि सम्मतम्; न त्वाद्यं लक्षण मिति;— द्वितीयलक्षणलक्षिते यास्कीये (१. ४. १.) एव ग्रन्थे तथोक्तदर्शनादिति।

तस्यैव श्लोकस्य व्याख्यानावसरे भगवान् पतञ्जलिराह—"नाम खल्वपि धातुज मेव माहुर्नैरुक्ताः (३अ० २पा० ३आ०)"–इत्यादि। ततश्चावगम्यते तस्य भगवतोऽप्यभिमतं सायणीयं द्वितीयनिरुक्तलक्षण मेव; न त्वाद्यम्;— आद्यलक्षणलक्षितेऽखिलनिघण्टौ तथादर्शनादिति।

अस्ति चेयं हरिकारिका—

"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"–इति।

तदित्थं भगवता खलु माङ्गलिकेनाचार्येण पाणिनिना

"पृषोदरादीनि यथोपदिष्टम् (६. ३. १०९.)"-इति सूत्रेण यत्सर्वं सङ्क्षेपेण विहितम्, तदपि निरुक्ते विशदीकृत्य प्रदर्शित मिति फलितम्। तथाचोक्तं तत्र महाभाष्ये— "पृषोदरादीनीत्युच्यते, कानि पृषोदरादीनि ? पृषोदरप्रकाराणि। कानि पुनः पृषोदरप्रकाराणि ? येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्यन्ते (६अ० ३पा० ३आ०)"-इति। लोपागमवर्णविकारादयो बोधितास्येह यास्कीय-निरुक्ते। तदत्र "अथ निर्वचनम्" -इत्यारभ्य "एकपदानि निर्ब्रूयात्"-इत्यन्तं (२. १. १—४.) द्रष्टव्यम्। तथा चेद मवश्यं वक्तुं शक्यते यत् श्रीमतो भर्तृहरेरपि सायणीयं द्वितीयं निरुक्तलक्षण मेवाभिमतम्; न त्वाद्यम्;—आद्यलक्षणलक्षिते हि निघण्टौ लोपागमादीनां बोधनादर्थनादिति।

निघण्टुनिर्वचनकारस्य देवराजयज्वनोऽपि सायणीये द्वितीयनिरुक्तलक्षणे एवाभिमतिः प्रतीयते। तथाहि तत्र भूमिकाया मेव— "निरुक्तविद्यानिगमप्रतिष्ठाम् अवाप यास्कः"-इति, "प्रणमामि यास्कभास्करं यो हृत्तमसः प्रकाशितपदार्थः"-इति, "भगवता यास्केन ०—० निरुक्तानि"-इति, "तत्र प्रदर्श्य कतिचिदेव निरुक्तानि"-इति, "स्कन्दस्वामी च तत एव निरुक्त मनुजगाम" -इति, "भाष्यकारेण (यास्केन) बह्ववक्तव्यत्वात् प्रकरणश्च एव निरुक्तानि"-इति, "अतो ऽन्येषां यथाक्रमेणानिरुक्ते"-इति, "पदानां (निघण्टुस्थितानाम्) भाष्यकारेण (यास्केन) निरुक्तानाम्" -इति, "भाष्यकारेणैव ०—० निरुक्तानि"-इति, "निर्वचनञ्च निरुक्तं ०—० निरीक्ष्य क्रियते"-इति, "स्कन्दस्वामिकृतां निरुक्तटीकाम्"-इति, "निरुक्तकारोक्तनिर्वचनसामान्यलक्षण मनुसृत्य निरुक्तिः क्रियते"-इति द्वादशवारं प्रयुक्तं निरुक्तपदम्; परं नैक-

त्रापि सायणीयाद्यलक्षणलक्षितस्य निघण्टोर्बोध उपयुज्यते । ग्रन्थमध्येऽपि बहुधैव निरुक्तस्योल्लेखः कृतः । तथाहि— "तथाच निरुक्तम्— "योनिरन्तरिक्षं महानवयवः परिवीतो वायुना (१. ३. ३.)"–इति । दृश्यते चैतत् यास्कीये एव निरुक्तद्वितीयाध्यायीयद्वितीयपादतुर्यखण्डे ; न तु निघण्टौ । यत्र यत्र तु निघण्टोर्बोधन मेवाभीप्सितम् , तत्र सर्वत्रैव निघण्टुरिति समाम्नाय इति च प्रयुक्तम् । तथाहि तत्रैव भूमिकायाम्— "समाम्नायं ०—० निर्ब्रुवता"–इति , "तेन च समाम्नायपठितानां पदानां मन्त्रेभ्यः (प्रसङ्गान्निरुक्तेभ्यः) व्याख्यार्थं किञ्चिच्चिकीर्षितं कृतम्"–इति , "क्षीरस्वाम्यनन्ताचार्यादिकृतां निघण्टु-व्याख्याम्"–इति च ; एव मन्यत्राप्यूह्य मिति ।

निरुक्तवृत्तिकारस्य श्रीमद्दुर्गाचार्यस्यापि सायणीयं द्वितीयनिरुक्तलक्षण मेवाभिमतम् ; न त्वाद्यम् । तथाहि तदीयमङ्गलाचरणे एव दृश्यते—"पञ्चाध्यायी-निघण्टोश्च निरुक्त मुपरिस्थितम्" –इति । एवञ्च तन्मते खलु पञ्चाध्यायात्मकग्रन्थस्य कस्य चित् निघण्टुरिति नाम, तद्व्याख्यानग्रन्थस्य च निरुक्त मिति स्फुटम् । ततश्च भूमिकाया मपि अङ्गग्रन्थप्रयोजनकथनावसरे— "अतः ०—० निरुक्तं नामेद मङ्ग मारभ्यते । ०—० । अथास्यैव मखिलपुरुषार्थोपकारवृत्तिसमर्थस्य सङ्ग्रहः । तद्यथा— नामाख्यातोपसर्गनिपातलक्षणम् , ०—० इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः"–इत्युक्त मस्ति । एतच्चाव गम्यते यास्ककृतभाष्यरूपस्यैव ग्रन्थस्य निरुक्तत्वं तत्सम्मतम् ; न हि पञ्चाध्यायीरूपस्य निघण्टुनामग्रन्थस्य नामाख्यातोपसर्गनिपातलक्षणादयश्चिन्ताविषया दृश्यन्ते । स्पष्टश्चोक्तं तत्तदनुपद मेव— "तस्य (यास्कीयनिरुक्तस्य) एषा गवाद्या

देवपत्नात्मा पञ्चाध्यायी सूत्रसङ्ग्रहः"–इत्यादि नि०टी०भू० द्रष्टव्यम्।

मधुसूदनसरस्वतीकृते प्रस्थानभेदनामग्रन्थे प्रथमन्तूक्तम्— "एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वे ज्ञाते वैदिकमन्त्रपदानां मर्थज्ञानाकाङ्क्षायां तदर्थं भगवता यास्केन 'समाम्नायः समाम्नातः स व्याख्यातव्यः'–इत्यादि त्रयोदशाध्यायात्मकं निरुक्तमारचितम्"–इत्यादि। तथा च तस्यापि सायणीये द्वितीयनिरुक्तलक्षणे एव सम्मतिर्बुध्यते; न त्वाद्यलक्षणे। तत उत्तरम् "एवं निघण्टवोऽपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव"–इत्युक्तम्। तदेतन्निघण्टोर्वेदाङ्गत्वसाधनायैवानन्यगत्योक्तम्; न तु तत् स्वप्रमाणसिद्धमिति।

व्यवहारतस्तु ज्ञायते सायणीयं द्वितीयं निरुक्तलक्षणमेव सङ्गतम्; न त्वाद्यमिति। तथाहि— बह्वीनां निघण्टुपुस्तकानां मध्ये 'निघण्टौ प्रथमाध्यायः' इत्यादि, अन्तेऽपि 'निघण्टुः समाप्तः'–इत्येवमादयः पुष्पिका दृश्यन्ते; न क्वचिदपि निघण्टुपुस्तके निरुक्तशब्दोल्लेखो दृष्टः केनचिदद्यापि। एवं निघण्टुनिर्वचनग्रन्थे च 'निघण्टुनिर्वचने प्रथमोऽध्यायः' इत्यादि, 'निघण्टुनिर्वचनं समाप्तम्' इत्येवमादयः पुष्पिका एव दृश्यन्ते॥

ननु निरुक्तवृत्तिकृता भगवद्दुर्गाचार्येण तु निरुक्तप्रथमाध्यायीयप्रथमपादव्याख्यानान्ते पुष्पिकायाम् "इति जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ निरुक्तव्याख्यायां षष्ठस्याध्यायस्य प्रथमः पादः"–इति यास्कीयप्रथमाध्यायस्यैव निरुक्तषष्ठाध्यायत्वं बोधितम्; एव मुत्तरत्रापि; ग्रन्थान्ते च "इति सपादसप्तदशाध्यायी ऋज्वर्था नाम निरुक्तवृत्तिः समाप्ता"–इति यास्कीयसपादद्वादशाध्याया एव सपादसप्तदशाध्यायीत्वं ज्ञापितम्। ततश्च तन्मते

निघण्टु निरुक्तयोरैकात्म्य मेव प्रतीयते । तथा सत्युपपन्न मेव निघण्टोश्च निरुक्तत्व मिति तन्न्यते सायणीय माद्यं निरुक्तलक्षण मपि सुसङ्गतम् ?-इति चेन्न ; उपक्रमोपसंहारविरोधप्रसङ्गात् । उक्तं ह्युपक्रमे "पञ्चाध्यायीनिघण्टोश्च निरुक्त मुपरि स्थितम्"-इति, "अयञ्च तस्या द्वादशाध्यायीभाष्यविस्तरः (१. १. १. टी.)" -इति च ; एवञ्च निघण्टोः पञ्चाध्यायीत्वम् , तद्व्याख्यात्मकस्य निरुक्तस्य द्वादशाध्यायीत्वं सुतरां तयोः पार्थक्यस्वीकृत मेव ; प्रतिपादीयद्वस्त्युपसंहरणे ग्रन्थोपसंहरणकाले च उभयोरैकात्म्यमूलकं निरुक्तस्यैव सपादसप्तदशाध्यायीत्वं स्वीकृत मिति स्वीकारे तु उपक्रमोपसंहारयोर्विरोधोऽपरिहार्य एव प्रसज्येत । अतस्तद्विरोधप्रसक्तिभिया इद मेवावधारित मस्माभिः ,— सूत्र-भाष्यरूपयोः निघण्टु निरुक्तयोः उभयोरेव वृत्ती कृते दुर्गाचार्येण ; तत्र सूत्रात्मकस्य निघण्टोरेव प्राथम्यात् प्रथमं स एव व्याख्यातः , तत उत्तरञ्च निरुक्तग्रन्थः ; निरुक्तावबोधे च क्वचित् क्वचित् निघण्टु-पेक्षा विद्यत एवेत्यनयोः पूर्वापरीभावेनैकत्र संस्थानञ्च तस्य वृत्तिकृतोऽभीप्सित मिति उभयवृत्त्योरैकात्म्यं मत्त्वा सपादसप्त-दशाध्यायीत्वं व्यपदिष्ट मिति भवतु नाम तदीयवृत्तिग्रन्थस्य सपादसप्तदशाध्यायीत्वं तेन किं निरुक्तस्येति ।

तथापि "निरुक्तव्याख्यायां षष्ठस्याध्यायस्य"-इत्याद्युक्तयः कथ मुपपद्येयुः ? —इति चेदत्र ब्रूमः ,— यथा च महाभारतादौ तथै-वात्रापीत्येवं व्यवहारो न ग्रन्थहेतुरिति । तथाहि महाभारते आदिपर्वण्येव— "पौलोमपर्वणि एकादशोऽध्यायः"-इति । न तत्र पौलोमस्यैव पर्वणः एकादशोऽध्यायो गत इति बुध्यते ; अपि तु तत्रैकाध्यायात्मक मनुक्रमणिकापर्व , तत एका-

ध्यायात्मकं पर्वसङ्ग्रहपर्व, तत एकाध्यायात्मकं पौष्यं पर्व, ततोऽष्टाध्यायात्मकं पौलोमपर्व, तत्सङ्कलनयैवैकादशत्वं सम्भवति। एव मुत्तरत्रापि तत्रान्यत्र च सर्वत्रैव। एव मिहापि निरुक्तवृत्तिग्रन्थस्य निघण्टुव्याख्याने पञ्चमाध्यायेऽतीते निरुक्तप्रथमाध्याय एव षष्ठत्वेन व्यपदिष्ट इति नैव ग्रन्थाप्रसङ्ग इति। दृष्ट मेव मन्यत्रापि,— अस्ति मगधादिषु सुप्रचलित मेकं व्याकरणम्, तस्य एकार्द्धस्य सारस्वत मिति नाम, अपरार्द्धस्य तु चन्द्रिकेति। नेमौ भागौ एककालिकौ एककर्तृकौ वा, अतो विभिन्नग्रन्थाविवेव प्रसिद्धौ; परं तट्टीकाकृद्भिर्भट्टमाधवप्रभृतिभिः सारस्वतस्य व्याकरणपूर्वार्द्धत्वं चन्द्रिकाया व्याकरणपरार्द्धत्वं च व्यवस्थाप्य उभयोरेवैका टीका सिद्धान्तरत्नावल्यादिका प्रणीता; परं न हि तट्टीकया सारस्वतचन्द्रिकयोरैकात्म्यं सम्पन्नम्,— सारस्वतस्तु सारस्वत इत्येव, चन्द्रिका च चन्द्रिकेत्येवाद्यापि व्यपदिश्यते लोके; एव मप्युभयोर्यथाकृतपूर्वापरीभावतोऽधिगमनेनैव व्याकरणबोधो भवेदित्येव बोधितम्। एव मत्रापि उभयवृत्तेरैकात्म्यतया न हि निघण्टुनिरुक्तयोरैकात्म्यतासम्भवो न च तदिष्टं दुर्गाचार्यस्य; परं वृत्तिबोधितपूर्वापरीभावतोऽधिगमनेनैव भवेद् वेदपदार्थबोध इत्येव बोधित मिति।

तदेवं निरुक्तवृत्तिकारस्यापि सायणीये द्वितीयनिरुक्तलक्षणे एवाभिमतिर्नान्यो इति यदुपन्यस्तं पुरस्तादिह, तत्समीचीन मेवेति वृत्तिक्रमतो व्यवहारः खलु सायणीयाद्यलक्षणखण्डनेऽननुकूल इति च नाशङ्क्यम्। तदुक्तावेव हि पञ्चाध्याया निघण्टुरित्येव लोकव्यवहार इति च स्पष्ट मेव स्वीकृतम्। तथाहि— "त एते गवादयो देवपत्न्यन्ता निघण्टवः, तदेकदेशो नैघण्टुकं

प्रकरण मिति निघण्टु सञ्ज्ञया व्यवहारो लोके ;— निघण्टु मधीमहे निघण्टु मध्यामहे इति (१. ६. ६. टी०)"–इति । एवञ्च लोकव्यवहारादपि सम्यक् ज्ञायते निघण्टुर्निघण्टुरेव, निरुक्त मेव निरुक्त मिति ।

सिद्ध मित्थं प्राचीनतमानां प्राचीनाना मनतिप्राचीनाना माधुनिकानाञ्च सर्वेषा मेवार्यग्रन्थकाराणाम्, ग्रन्थसमाप्त्यादिलेखसमालोचकानां व्यवहारविदां च सर्वेषा सायणीयं द्वितीयं निरुक्तलक्षण मेवाभिमतम् ; तथान्यलक्षणन्तु सर्वथानभिमत मिति । तथाच "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"–इति सायणस्वकपोलकल्पितं लक्षणं निर्मूल मेवेति निघण्टुभाष्यात्मकस्यास्य यास्कीयस्यैकस्यैव निरुक्तत्वं सर्वसम्मतम् ; निघण्टोस्तु निघण्टुत्व मेवेति दिक् ॥

———

(२)

अथेतर्हि विचार्यते ,— निघण्टुनिरुक्तयोरुभयोरेव वेदाङ्गत्व मुतान्यतमस्य ? अन्यतमस्यैवेति चेत्, कस्य ? इति । वेदाङ्गग्रन्थास्तु षडेव ; श्रूयते हि गोपथब्राह्मणे— "षडङ्गविदस्त्वथाधीमहे (१. १. २७.)"–इति । पातञ्जलमहाभाष्यादौ स्मर्यते च "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ज्ञेयो ज्ञेयश्च"–इति पस्पशायाम् । एष चागमः कात्यायनानुमत एव ; यतोऽस्येतदार्त्तिकम् "दृष्टोह्यागमलक्ष्यसन्देहाः प्रयोजनम्"–इति ।

पाणिनिशिक्षादावपि वेदाङ्गानि षडेवेति निर्णीतं दृश्यते (३ पृ०)। प्रस्थानभेदेऽप्युक्तम्— "वेदाङ्गानि षट्"-इति । तत्र शिक्षा, कल्पः, व्याकरणम्, छन्दः, ज्योतिष मिति षडङ्गानि तु सर्वसम्मतान्येव; निघण्टुनिरुक्तयोः उभयोरेव वेदाङ्गत्वे षट्त्वं व्याहन्येत; अन्यतमस्य वेदाङ्गत्वेऽन्यतमस्य तदभावः सुतरां सम्पद्यते; तत् कस्य वेदाङ्गत्व मिष्टं कस्य नेत्यय विचारः प्रवर्त्तते।

प्रस्थानभेदे उभयोरेव वेदाङ्गत्व मङ्गीकृतम्। कथं न तथा षट्त्वं व्याहत मित्यत्राह च तत्र "एवं निघण्टवोऽपि वैदिकद्रव्यदेवताप्रकरपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव"-इति। न च तत्कथनमात्रेणैव उभयोर्वेदाङ्गत्वसाधनायैव वा वादिनस्तथा स्वीकुर्युः; वादी भद्रं न पश्यतीति हि प्रसिद्ध मेव।

ऋग्भाष्यभूमिकायां सायणाचार्योऽपीमां विपत्तिं परिलक्ष्यैव निघण्टोरपि निरुक्तत्वसम्पादकं प्रदर्शित माद्यलक्षणं (२ पृ०) व्यरचयत्। तथाच निघण्टोश्च निरुक्तत्वेनैव ग्रहणात् समाना मप्येषां ग्रन्थानां वेदाङ्गत्व मुपपद्येत, न च वेदाङ्गानां षट्त्वं व्याहन्येतेति। प्रशंसनीयैवैषा तस्य चातुरी! परं किं कुर्मो वयम्,— तदेतन्मतं न सर्ववादिसम्मतं नापि विचारसह मिति प्रतिपादितं पुरस्तादिहैवेति।

पाणिनिशिक्षायान्तु "निरुक्तं श्रोत्र मुच्यते"-इति दर्शनात् निरुक्तस्यैव वेदाङ्गत्वं सिध्यति, न तु निघण्टोः। न चेदं सहसा श्रद्दधामहे; परकालजस्य भाष्यस्य वेदाङ्गत्व मस्ति, अतिपूर्वकालजस्य मूलस्य तन्नास्तीति वदत एवाश्रद्धोत्पादात्। ननु भवान् पाणिनिवचनेऽपि कथ मश्रद्दधते? अत्र ब्रूमः— न चेदं पाणिनिवचनम्; न हि पाणिनिः स्वय मेव "अथ शिक्षां प्रवक्ष्यामि पाणि-

नीयं मतं यथा"-इत्युपक्रान्तु महेंत्, नापि हि "येनाक्षरसमाम्नायमधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः"-इत्याद्युक्तिभिरुपसंहर्त्तुं वाहेंदिति ।

निरुक्तहस्तिक्लमते तु निरुक्तस्यैव वेदाङ्गत्वम्, निघण्टोस्तु मात्राच्छन्दोधर्मित्व मेवेति किमुक्तं भवेद् वेदाङ्गत्वेनेति नात्रातिदिष्टछन्दस्त्वेऽस्माक मयमवसरः । तथाच— "अतः ०—० निरुक्तं नामेद मङ्ग मारभ्यते । प्रधानस्येद मितरेभ्योऽङ्गेभ्यः"-इत्याद्युक्तिभिः निरुक्तस्य वेदाङ्गेषु प्राधान्यं स्थापितम्; "तस्यैषा गवाद्या देवपत्नान्ता पञ्चाध्यायी सूत्रसङ्ग्रहः । सा च पुनरियं ०—० ऋषिभिः ०—० छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता । सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव; यथा यथापन्नास्ता गौर्गोधर्म्मा"-इत्युक्त्या तु निघण्टोश्छन्दस्त्व मव्याहत मेवेति च वर्णितम् । 'यथा' च 'अयथापन्ना' अप्रकृतविपन्ना परं सामान्यविपन्ना, 'अस्ता' यूथपरिभ्रष्टा, 'गौः' 'गोधर्म्मा' एव; न हि तस्या यूथपरिभ्रष्टत्वेन गोत्वं नष्टम्; तथैव छन्दोभ्यः समाहृता एषा पञ्चाध्यायी छन्द एव, समाहरणहेतुत एव न ह्यस्या छन्दस्त्वं तिरोभूत मिति भावः (निरु०टी०भू०)। तथाच निघण्टुनामकानि समाम्नायात्मकानि पदानि तु बहुपूर्वकालत एव विश्रुतानि; तान्येव पदान्यनुसृत्य यास्को द्वादशाध्यायात्मकं निरुक्ताख्यं ग्रन्थं निर्ममे, तस्य च वेदार्थबोधोपयोगितया तदानीन्तनैरार्यैर्वेदाङ्गत्वं स्वीकृत मित्येव निरुक्तहस्तिक्लदाशयः फलितः ।

यास्कस्य पूर्वश्रुतिलेखदर्शनात्त्ववगम्यते निघण्टोर्नास्ति वेदाङ्गत्वम्, नापि वेदत्व मिति । तथाहि— "उपदेशाय ग्लायन्तोऽवरे विद्यामग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च"-इति

(१. ६. ५.)। अत्र "इमं ग्रन्थम्"-इत्युक्त्या निघण्टोरेव ग्रहण मिष्टम्, न तु निरुक्तस्यास्य; प्रणीयमाने हि निरुक्ते समाम्नासिषुः"-इति परोक्षातीतप्रयोगानुपपत्तेः। अपरञ्च निरुक्त मासीत् शाकपूणादिप्रोक्तम्, तदभिलक्ष्यैव तथा क्रिया प्रयुक्तेत्यपीह वक्तुं न युज्यते; अनुपद मेव "एतावन्तः समानकर्माणो धातवः"-इत्याद्युक्त्या निघण्टुपरिचयस्यैवोपलब्धेः। अतएवात्र वृत्तिः 'इमं ग्रन्थं गवादि देवपत्नान्तं समाम्नातवन्तः"-इति; गवादिः देवपत्नान्तश्च निघण्टुग्रन्थ एव। किञ्चात्रापर मपि विवेच्य मस्ति — न चेदं वचन मेतस्य हि निरुक्तस्य कर्तुर्यास्कस्य, यथा चेम मिति एतन्निरुक्तं गृह्णातेति; अपि त्वेतद् वचनं प्राचीन मेव यास्केनेहानूक्त मिति गम्यते। अतएव "बिल्मं भिल्मं भासन मिति वा"-इति बिल्मशब्दस्य निर्वचनप्रदर्शनं सङ्गच्छते यास्कस्य; न हि स्वय मेव दुरूहं शब्दं प्रयुज्य तद्व्याख्यानाय च यतितुं प्रवर्त्तते कश्चिद्। स्वपदवर्णन मेव भाष्यलक्षणम्, निरुक्तस्य च निघण्टु भाष्यत्वं सर्वसम्मत मिति स्वपदव्याख्यान मपीह न दोषायेत्यपि वक्तुं न युज्यते; यदत्र बिल्मशब्दस्य भिल्म मिति प्रतिशब्द मुक्तापि अर्थान्तरं वदति भासन मिति, वेति संशय मपि ध्वनयति; तदेवाचार्यप्रवृत्तिर्ज्ञापयति— न ह्येवेदं स्वपदवर्णन मिति; न हि स्वपदव्याख्याने स्वज्ञान-वैकल्पिकत्व-प्रकटन मुपयुज्यते क्वचिदपीति। एतस्मिन् खलु वचने बहूनि समालोच्यानि सन्ति, तानि चोपरिष्टाद् वक्ष्यामः; साम्प्रतन्तु वेदाङ्गेभ्यः पृथगेव निघण्टोर्ग्रहणं यास्कस्याप्यभिमत मित्येवेह प्रदर्शन मस्माभिष्टम्।

नन्वत्र वृत्तिग्रन्थे "वेदाङ्गानि च इतराणि (१. ६. ५. टी०)"-इति लिपिभङ्गितो निघण्टोरपि वेदाङ्गत्वं ध्वनित मेवेति

चेत्, ध्वनयतु नाम स तथैव किन्तेन ; न हि वृत्तिकारोऽभ्रान्त एवेत्यस्माकम् । वस्तुतो यदि नाम 'इतराणि'-इति पदप्रयोगात् तथैव ध्वनितं गम्येत, तर्हि तादृग्वचनस्यैकदेश्युक्तित्व मेव स्वीकार्यम् ; प्रदर्शितभूमिकोक्तविरोधात् । महाभाष्ये भगवतोऽशेषशेमुषीसम्पन्नस्य पतञ्जलेरप्येवं बहुत्वैकदेश्युक्तयः प्रदर्शिता लघुशब्देन्दुशेखरादौ नागेशभट्टप्रभृतिभिः, तत् किं मस्य वृत्तिकृतः स्वल्पधियो हि दुर्गाचार्यस्येति । वस्तुतो दुर्गाचार्यस्य निरुक्तवृत्तिभूमिकायां दृष्टं यास्कीयस्य निरुक्तस्य वेदाङ्गत्वम्, तन्मूलस्य निघण्टोस्तु न तत्त्व मपि छन्दोधर्मित्व मेवेत्येव युक्ततरं प्रतिभात्यस्माक मिति ।

अथाचापरापि च शङ्का समुत्पद्येत नाम । तथाहि— प्रदर्शितयास्कपूर्वश्रुतिसमालोचनादवगतं नास्ति निघण्टोर्वेदाङ्गत्व मिति वाढम् ! परं तथैवेद मप्यवगम्यते यास्कप्रणीतैतन्निरुक्तात् बहुपूर्व मेव वेदाङ्गानि निर्वृत्तानीति कथं तत्र वेदाङ्गेषु तदानीं प्रणीयमानस्यैतस्य निरुक्तस्यान्तर्भावः शक्यते वक्तु मपि ? वदत एव हि व्याघातः स्फुट मिति । इहास्माक मीदृगस्ति गुरूपदेशः,— प्रदर्शितगोपथश्रुत्यादिभ्योऽवगम्यते षडेव वेदाङ्गानीति ; प्रदर्शितशिक्षावचनादिभ्यश्च ज्ञायते निरुक्तस्य च वेदाङ्गान्यतमत्वम् ; यास्कीयेऽत्रैव निरुक्ते "नैरुक्ताः", "शाकपूणिः" -इत्यादिपर्यालोचनया च बुध्यते तत्पूर्व मपि चासन् बहवो निरुक्तविदस्तथा बह्वनि निर्वचनापरपर्यायाणि निरुक्तानि चेति ; तेषा मेव साजात्यहेतुक मस्य यास्कीयस्यापि ग्रन्थस्य यथा निरुक्तत्वं तथैव वेदाङ्गत्व मपीति ।

एतदेवाभिप्रेत्याह बह्वृक्प्रातिशाख्यकारः शौनकोऽप्याह

"शास्त्रापवादात् प्रतिपत्तिभेदात् निन्द्यत्वकृत्स्नेति च वर्णगिल्लाम् । नैतेन शास्त्रेण विशिष्यतेऽन्यैः कृत्स्नश्च वेदाङ्ग मनिन्द्य मार्षम् (१४. १८, १९.)"-इति। तथैतत्तृतीयवृत्तिकृतोक्तटेन च स्वारब्धवृत्त्युपक्रमे शौनकीयस्यास्य प्रातिशाख्यस्यापि वेदाङ्गत्व मिथमाणेनैतदुक्तम्— "अङ्गता चास्यान्यशास्त्रासव्यपेक्षस्य नैव स्यादकृत्स्नत्वात् ? कृत्स्नतां वेदाङ्गता मनिन्द्यता मार्षताञ्च स्वय मेव शौनको दर्शयिष्यति— 'कृत्स्नश्च वेदाङ्ग मनिन्द्य मार्षम्'-इति। अनयोः पक्षयोर्यतरः पक्षः श्रेयान्, ततरो ग्रहीतव्यः"-इति।

अथापरञ्च ;— यद्यपि प्रदर्शितयास्कपूर्वश्रुतवचनोत्तरांशे वेदशब्देन ब्राह्मणभाग एवेष्ट इति बुध्यते ब्राह्मणत्वं निघण्टो-र्निराकृतम् ; तत्पूर्वांशे मन्त्रभागस्यापि पृथक् श्रुतेः मन्त्रत्व मपि वारितम् ; तथापि तत्रैव 'समाम्नासिषुः'-इति क्रियादर्श-नात् समाम्नायत्व मव्याहत मेव। अतएव "समाम्नायः समा-म्नातः स व्याख्यातव्यः"-इति निरुक्तयत्यारम्भवाक्यस्थ, तत्रत्य 'मैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव"-इति दुर्गाचार्यप्रबन्धस्य च नासङ्गतिप्रसङ्गः।

तदित्थ मसौ निघण्टुर्न हि मन्त्रग्रन्थः, न च ब्राह्मणग्रन्थः, नापि वेदाङ्गान्यतमः ; अपि तु मन्त्रेभ्यः सङ्गृहीतपदसमूहात्मको ऽतिप्राचीनः समाम्नायविशेष एवेति यास्कस्याशयः, तत्पूर्व-तनानाञ्च सम्मतः ; किञ्चास्यैव निघण्टुभाष्यस्य निरुक्तत्वं तदनुगतं वेदाङ्गत्वञ्चेति शम्।

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE LIBRARY

(३)

अथैतर्हि विचार्य मेतत् ,— निरुक्तमूलसूत्ररूपस्य निघण्टोः कः समाम्नाता कौ वा प्रणेता तद्भाष्यरूपस्य निरुक्तस्य ?–इति।

अनतिप्राचीनानां मार्यकोविदानां मन्यतमः स्वर्गतो विमुक्तो वा ख्यातो मधुसूदनसरस्वती सङ्ख्याहैकं प्रबन्धं प्रस्थानभेदनामेति। तत्रेदं लिखितं दृश्यते— "भगवता यास्केन 'समाम्नायः समाम्नातः स व्याख्यातव्य"–इत्यादि ०—० निरुक्त मारचितम्"–इति। नात्र वादो दृश्यते अस्माभिः। ततः उत्तरं लिखित मस्ति— "निघण्टुसञ्ज्ञाकः पञ्चाध्यायात्मको ग्रन्थो भगवता यास्केनैव कृतः"–इति। तदेतल्लिखनं तदीय मेतद्विषयकं ध्वान्त मेव प्रकटयति। हन्त भो वेदान्तिन् मधुसूदन ! खोदृतं 'समाम्नायः समाम्नातः स व्याख्यातव्यः'–इति वचन मपि किं नालोचितम् ?–अद्ययुगीयेन कृतस्य ग्रन्थस्य कथं भवेत् समाम्नायत्वम् ? अथवा सम्भव एवैवं भवादृशानां सर्वभ्रमवादिनां वेदान्तिनाम्। एवं हि तल्लिखितं निघण्टोर्निरुक्तान्तर्भूतत्व मपि (१७ पृ०) कथं नाम भवेत् अतश्चेयं तदिरुद्धबहुप्रमाणदर्शिना मित्यपि ध्येयम्।

सायणाचार्यस्त्वत्र सम्यगेवालेखीत्—"गौः ग्मा जमा क्ष्मा च क्ष्मेत्यारभ्य ०—० पदानां समाम्नायः समाम्नातः"–इति, "तद्व्याख्यानञ्च समाम्नायः समाम्नात इत्यारभ्य ०—० यास्को निरमिमे"–इति च (ऋ० सं० भा० भू०)। तदेवं सायणमते हि निघण्टोः समाम्नायत्वेनानादित्वम्, निरुक्तस्य तु तद्भाष्यरूपत्वं यास्कीयत्वञ्चेति प्रतिपन्नम्।

देवराजयज्वकृत-निघण्टुटीकाया भूमिकायाञ्च तथैव। तथाहि

—"भगवता यास्केन समाम्नायं नैघण्टुक-नैगम-दैवताकाण्डरूपेण त्रिविधं गवादि देवपर्यन्तं निर्बुवता"–इत्यादि द्रष्टव्यम्। एवञ्चैतत्त्रयेऽपि निघण्टोः समाम्नायत्वेनानादित्वम्, तन्निर्वचनात्मकस्यैतस्य निरुक्तस्य यास्कीयत्वं च स्फुटम्।

निरुक्तवृत्तिकारः खलु दुर्गाचार्यस्तु यद्यपि स्वग्रन्थभूमिकायां निरुक्तवर्णनसमये केन कृतं तदिति नोक्तवान्; पर मनुपदं प्रथमखण्डव्याख्यानावसरे एवाह— "आचार्यः अयं यास्को निरुक्तकारः"–इति; एव मन्यत्रापि। निघण्टुकर्तृनिर्णयविषये तूक्तं तदृभूमिकाया मेव। तथाहि— "सा (पञ्चाध्यायी निघण्टुः) च पुनरियं साक्षात्कृतधर्मभ्यो महर्षिभ्यः उपदेशेन मन्त्रार्थं मुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्य मपेक्ष्य तदनुजिघृक्षया वाच्यार्थसामर्थ्यादभिधेयानुन्नीय मन्त्रार्थावबोधाय कृच्छ्रेभ्यः समाहृत्य समाहृत्य समाम्नाता"–इति। एतच्च सर्वं निरुक्तोक्तसारभूत मेव। एवं हि वृत्तिकृतो दुर्गाचार्यस्य मतेऽपि निघण्टोः समाम्नायत्वेनानादित्वम्, निरुक्तस्यैतस्य यास्कीयत्वं च सुव्यक्तम्।

महाभारतीये मोक्षधर्मपर्वणि 'शिपिविष्ट'-नामनिर्वचनप्रसङ्गे ये त्रयः श्लोकाः (३४२ अ० ६९, ७०, ७१ श्लो०) दृश्यन्ते, तैश्च ज्ञायते यास्ककृत मेवेतन्निरुक्तम्। तथा हि—

"शिपिविष्टेति चाख्यायां हीनरोमा च यो भवेत्।
तेनाविष्टन्तु यत् किञ्चित् शिपिविष्टेति च स्मृतः।
यास्को मा मृषिरव्यग्रोऽनेकयज्ञेषु गीतवान्।
शिपिविष्ट इति श्रुत्वा गुह्यनामधरो ह्यहम्।
स्तुत्वा मां शिपिविष्टेति यास्क ऋषिरुदारधीः।
मत्प्रसादादधीनष्टं निरुक्त मभिजग्मिवान्"–इति।

अस्यैव सूत्रे निघण्टुभाष्ये शिपिविष्ट-निर्वचनञ्च द्विविधम् (५. २. २, ३, ४.)। तत्रैव किञ्चिदुत्तरं द्वाभ्यां श्लोकाभ्यां (३४२ अ० ८६, ८७ श्लो०) निघण्टुकर्तृनाम च प्रकटितम्। तथाहि — "हृषो हि भगवान् धर्म्मः ख्यातो लोकेषु भारत।

निघण्टुकपदाख्याने विद्धि मां हृष मुत्तमम्।

कपिर्वराहः श्रेष्ठश्च धर्मश्च हृष उच्यते।

तस्माद् हृषाकपिं प्राह कश्यपो मां प्रजापतिः"-इति।

अस्यैव सूत्रे निघण्टौ दैवतकाण्डे द्युस्थानदेवताख्यानेषु हृषाकपिरिति पदपाठश्च (५. ६. १३.)। इतश्चाधार्य्यते यस्य खल्वेतस्य निघण्टुग्रन्थस्य कर्तृपदं पाणिनिरोऽप्यवरजाय यास्काय दातु मुद्यतः प्रस्थानभेदकारः, स हि वेदाङ्गानां मुत्पत्तितो बहु प्रागेव, अपि ब्राह्मणग्रन्थानाञ्चोत्पत्तितोऽपि प्राक् महर्षिणा कश्यपेन समाम्नात इति; तदानीन्तनस्यैव कश्यपस्य प्रजापतित्वश्रवणात्, निघण्टूत्पत्तिज्ञापकस्य यास्कानूक्तवचनस्यापि तत्रैव तात्पर्यावबोधाच्च।

तथा चानूक्तं भगवता यास्केन पुराकल्पश्रुतवचन मिदम्— "साक्षात्कृतधर्माण ऋषयो बभूवुः (मन्त्रद्रष्टारः); तेऽवरेभ्यो-साक्षात्कृतधर्मभ्यः (शाखाप्रवक्तृभ्यः) उपदेशेन मन्त्रान् सम्प्रादुः; उपदेशाय ग्लायन्तो ऽवरे (निघण्टु-ब्राह्मण-वेदाङ्गकाराः) विद्याग्रहणायेमं ग्रन्थं (निघण्टुम्) समाम्नासिषुः, वेदञ्च (ब्राह्मणञ्च), वेदाङ्गानि च"-इति (१. ६. ५.)। एतस्माच्च श्रुतेः समासत इमानि पञ्च ज्ञायन्ते;-(१) पुराकल्पेऽपि मन्त्राणा मुत्पत्ति-रनिर्णितेवेति प्रथमम्। (२) पूर्वं मन्त्रा विकीर्णा एव स्थिताः, ततो ग्रन्थीभूतानामेव तेषां मध्ययनाध्यापनतः शाखाः समुद्भूताः,

ततः सर्वशाखागतानां नैघण्टुकादिपदानां सुखबोधार्थं निघण्टु-नामको ग्रन्थः समाम्नातः, ततः तन्मात्रेण मन्त्रार्थज्ञानेऽकृत-कृत्यतां संलक्ष्य मन्त्रभागीयदुरवबोधपदादीनां तात्पर्यादिवेदनाय ब्राह्मणग्रन्थाः समाम्नाताः, तत उत्तरं ब्राह्मणग्रन्थैरपि मन्त्रार्थ-बोधो न पर्याप्त इति निरुक्तादीनि अङ्गानि समाम्नातानीति द्वितीयम्। एतादृशक्रमोत्पत्तिज्ञाने तादृशक्रमश्रुतिरेव मानम्। किञ्च यतोऽत्र "मन्त्रान् सम्प्रादुः"-इति कथनानन्तरं पुनरुक्तं 'वेदञ्च'-इति, अतो ज्ञायते, नेह वेदशब्देन मन्त्राणां बोधोऽपि तु तदतिरिक्तभागानां ब्राह्मणाना मेव। वेदशब्देन ब्राह्मणग्रन्थ-मात्राणां ग्रहणाच्च वेदाङ्गत्वं न विलीयते निरुक्तादीनाम्; यदर्थं हि प्रवृत्ता वेदाः (ब्राह्मणग्रन्थाः), तदर्थ मेव चेमानि प्रवृत्तान्यङ्गानीत्येव मेषा मङ्गाङ्गिभावोपपत्तेः। ननु 'इमं ग्रन्थं' कीदृशम्? तदुत्तर मेव श्रुतं 'वेदम्'-इति, तथाच निघण्टो-र्वेदत्वातिदेशायैव प्रयुक्त मत्रैतद् वेद मिति चेन्न; विशेषफला-भावात् ब्राह्मणग्रन्थोल्लेखाभावापत्तेश्च। तथा हि — समाम्नायत्वं तु सिद्ध मेवास्य निघण्टोः, 'समाम्नासिषुः'-इति क्रियादर्शनात्; वेदतुल्यत्व-समाम्नायत्वयोश्च नास्ति कार्यकृतो विशेषः; किञ्च तथा सति श्रुतावत्र मन्त्राणाम्, वेदतुल्यस्यास्य निघण्टोः, वेदाङ्गानाञ्च सर्वेषां श्रवणं सम्यक्त्वम्; परं ब्राह्मणग्रन्थानाल्लेखो नैव सम्पद्ये-तेति तादृशवादिना मसमीक्ष्यकारितैव प्रतिपद्येतेति। (३) यथा चेह मन्त्राणां पृथक् श्रुतेः वेदशब्देन मन्त्रातिरिक्तानां ब्राह्मणानां बोध उपलभ्यते, तथैव वेदाङ्गानां पृथक् श्रवणाच्च ब्राह्मणेष्वपि वेदाङ्गे-तरवाक्याना मेव ग्रहणीय तेति तृतीयम्। (४) निरुक्तादिवेदा-ङ्गानां सर्वेषा मेव षण्णां बीजादिरूपतयैतन्निरुक्तोऽपि प्रागस्तित्व

मिति चतुर्थम् । (५) मन्त्राणा मर्थज्ञानसौकर्य्यायैव यथाज्ञानं निघण्टोः ,— यथा च वेदाङ्गानां निरुक्तादीनाम् ; तथैव तदानी मपि स्वीकृत मासीद् वेद इति प्रसिद्धानां ब्राह्मणानाञ्च ; ततः कालभूयस्त्वानुसारत एव ब्राह्मणानां मन्त्रसमत्वं जात मिति पञ्चमम् ।

एवञ्चैतस्माच्छ्रुतेर्निघण्टोः खलु ब्राह्मणग्रन्थेभ्योऽपि प्रागाम्नातत्वं गम्यते ; तादृग्समाम्नायत्वमूलक मतिपुराकालिकत्वं च सुव्यक्त मेव ; ततः प्रदर्शितमहाभारतस्त्र कश्यपप्रजापतिकृतत्वञ्च तस्य लब्ध मिति योगतः सम्पन्नस्तत्कर्तृनिर्णय इत्यस्माकम् ।

तस्यैव निघण्टोर्भाष्यरूपस्यैतस्य निरुक्तस्य कर्त्ता तु यास्कः । अत्रैतिह्य मेव मानम् , न हि तद्ग्रन्थस्य आरम्भे मध्येऽन्ते वा क्वचिदपि तथा प्रत्यायकं वाक्यादिक मस्ति । देवताप्रणामादिभिर्मङ्गलाचरणादिकं येषु ग्रन्थेषु दृश्यते , प्रायस्तेषु ग्रन्थकृद्भिः स्वय मेव स्वाख्यान मप्याख्यात मस्ति ; बहुत्र तु प्रकरणसमाप्तौ ग्रन्थसमाप्तौ च ग्रन्थकृन्नामोल्लेखो दृश्यत एव ; कथाप्रसङ्गतोऽपि ग्रन्थकृन्नामावमर्शो भवत्यनेकत्र । इह तु नास्ति तथा मङ्गलाचरणम् , नास्ति पादादिसमाप्तौ च तथोल्लेखः, नास्ति च मन्त्रादाविव कथाप्रसङ्गः ; अतोऽत्रैतिह्य मेव शरणं ग्रन्थकृन्नामविज्ञानाय । टीकाकृत्प्रभृतीनां लेखोऽपि तदनुगत एव । प्रदर्शितमहाभारतवचनान्यप्येतस्यैव ग्रन्थस्य कर्त्तासीद्यास्कः कश्चनेति निःसंशयबोधने नालम् ; तत्रैतदीयस्यैकाचरस्यापि यथावदुद्धृतिविरहात् ; वरं तत्रापि एष एव यास्कः कीर्तित इत्यवगमे , एतस्य यास्ककृतत्वप्रवाद एवैकं बीजम् । तदेव मेतादृग्ग्रन्थकर्तृनिर्णये ऽनन्यगत्या प्रवाद एव शरणम् ; तथा च यत एव मस्ति प्रवादस्थिर-

मनः ,— इदं निरुक्तं यास्कप्रोक्त मिति, अत एव श्रूयतेऽस्य निरुक्तग्रन्थस्य प्रणेता भगवान् यास्क इति शम्।



(४)

अथास्य निरुक्तस्य कर्तृविषये त्वन्यदपि किञ्चिद् विचार्य मस्ति ;- कोऽयं यास्कः ? इति; कस्यापि परिचयोऽस्य प्राप्यते न वेति भावः।

एको हि यास्कः श्रूयते शतपथब्राह्मणे उभयत्र (१४. ५. ५. २०, २१.—७. ३. २६. २७.)। तथा हि— "अथ वंशः। तदिदं वयं (शतपथब्राह्मणप्रवक्तारः) शौर्पणार्य्यात्, शौर्पणार्य्यो गौतमात् ,०—० भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्च"- इति। "तत्र प्रथमान्तः शिष्यः, पञ्चम्यन्त आचार्यो बोद्धव्यः"- इति च तदीयव्याख्यानं द्विवेदगङ्गकृतम्। एवञ्च शतपथीयो यास्कः शतपथब्राह्मणप्रवक्तुः षड्विंशपुरुषादप्यधिकः पूर्वतनः, किञ्च मधुविद्यायाः सम्प्रवक्ता चाभूदिति सम्पद्यते। नायं निरुक्तकारः; एतस्य निरुक्तकारस्य हि पाणिनेरपि परभवत्वनिर्णयादद्ययुगीयत्वात्, मधुविद्याप्रवक्तृत्वाप्रसिद्धेः, ब्राह्मणकालानन्तर मेव वेदाङ्गकाल इति शास्त्रतो युक्तिबुद्धितश्च सुसिद्धाचेति। तदनुपद मेव क्रमात् स्फुटिष्यति।

पिङ्गलोक्ते छन्दोग्रन्थेऽपि स्मर्यते चैकत्र यास्क इति। तथाहि- "उरोबृहती यास्कस्य (५. १०.)"-इति। अय मपि यास्को नैतन्निरुक्तकारः; अत्र तथादर्शनात्। यस्य खलु यास्कस्य ग्रन्थे

विहिता 'उरो बृहती'-इति संज्ञा, स एव यास्कः तत्र पिङ्गल-सूत्रे स्मृतः; स च छन्दःसूत्रकारादेतस्माच्च पिङ्गलात् पूर्वतनः, तत्समकालिको वेति विचारविषयश्च। परं तत्र निरुक्ते क्वापि नोपलभ्यते उरोबृहतीत्याख्यान मिति सिद्ध मेव नायं सः; अपि तु पिङ्गलोक्तो यास्कः खलु कश्चित् भिन्न एवेति। स च छन्दः-शास्त्रीयग्रन्थकारो भवितु मर्हतीत्यपि सम्भाव्यते। अत एव बह्वृक्प्रातिशाख्यस्य द्वितीयवृत्तौ शास्त्रप्रयोजनश्लोकव्याख्यानावसरे उक्त मुव्वटेन— "तथा सर्वैः छन्दोविचित्यादिभिः पिङ्गल-यास्क-सैतवप्रभृतिभिः यत् सामान्येनोक्तं लक्षणम्"-इत्यादि।

कश्चिदाह,-शौनकीये प्रातिशाख्यग्रन्थे चैकत्र दृश्यते यास्क-नाम, स एव यास्कोऽस्य निरुक्तस्य प्रणेतेति। परं तत्र "वैयास्कः", "यास्कः" वा इति राजते सन्देहोऽद्यापि। तथाहि— "न दाग्रतय्येकपदा काचिदस्तीति वैयास्कः। अन्यत्र वैमद्याः सैका-दग्निनी मुखतो विराट् (१७.२५.)"-इति, "दाग्रतये भवा दाग्रतयी काचित् एकपदा नास्ति इति वैयास्क आचार्यो मन्यते" -इत्यादि चोव्वटकृतं तद्व्याख्यानम्। तदेतदुव्वटव्याख्यादर्श-नात्तु प्रतीयते तत्र वैयास्कस्यैवोल्लेखः; अन्यथा हि व्याख्याकाले-ऽपि मूलानुरूप एव वैपूर्वो यास्कः कथं नाम दृश्येत। अस्तु वा तत्र यास्कस्यैव ग्रहणम्, परं सोऽपि खलु 'यास्को नैतन्निरुक्तकारो भवितु मर्हति; अत्रापि हि तथादर्शन मेव हेतुः; सपरिशिष्टे-ऽखिलनिरुक्ते हि न क्वापि वैमद्या ऋग्व्यतिरिक्ता काचिदेकपदा दाग्रतयी नास्तीत्येतदर्थकं वाक्यं ध्वननं वा यास्कीयं दृश्यते। एव मपि यद्युच्येत अय मेव यास्कः प्रातिशाख्यकृतः शौनकस्य लिपि-विषयताकृत इति, तथा च प्रकारान्तरेण शौनकस्यानृतभाषित्व

मुग्धप्रलापित्वं वोक्तं भवेत् ; तस्मात्याकल्पनातो वरं यास्कान्तर-कल्पनैवेत्यस्माकम् ।

पाणिनिसूत्रेष्वपि नायं यास्कः परिचितः । यद्यप्यस्त्येकं सूत्रं पाणिनीयं "यास्कादिभ्यो गोत्रे (२. ४. ६३.)"-इति, परं न तत् निरुक्तकारयास्कपरिचयायालम् ; तत्र श्रुतेन यस्केन यास्कस्य बहुपार्थक्यात् । तत्र हि साक्षाद् विश्रुतो यस्कः ; न तु यास्कः ; यास्कात् न यस्कः ; अपि तु तद्गोत्रीयः ; तादृशयास्केस्वप्यतनीयोऽप्यस्त्येव । सूत्रे 'गोत्रे'-इति दर्शनादिदन्तु प्रतीयत एव ,—यस्कगोत्रस्य ज्ञानं पाणिनेरवश्यं स्थित मिति । "अपत्यं पौत्र-प्रभृति गोत्रम् (पा० ४. १. १६२.)"-इति शासनाच्च ज्ञायते , यस्कस्योपरितनतनीयपुरुषनोऽद्यतनीयास्ताः सर्व एव यस्कगोत्राः, तथाच सर्वेषा मेव यास्क इति व्यवहारः पाणिन्यादिसम्मतः ; बहुत्वे त्विद मेव सूत्रं लुग् विधत्ते इत्यन्यदेतत् ।

ननु चेयं तत्सूत्रवृत्तिः— "एभ्योऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे , न तु स्त्रियाम् (भ० दी०)"-इति । एवञ्च यस्क-स्यानन्तरापत्यस्य यास्कस्यास्यैव तत्र पाणिनेर्बोध उपलभ्यते ?-इति चेत् , दृश्यता मिह नागेशभट्टकृतं तद्व्याख्यानम्— " 'अपत्य-प्रत्ययस्य'-इति प्रवराध्यायप्रसिद्धघटकस्येत्यर्थः ; अपत्याधिकारा-दन्यत्र लौकिकं गोत्र मिति भावः"-इति । तथा च दीक्षित-वृत्तौ अपत्येत्यस्यापि गोत्रेत्यर्थ एव सुतरां सम्मतः ; वस्तुतो गोत्रो-ऽप्यपत्य मेव । तदेवं तत्सूत्रस्य यस्कगोत्र एव विषय इति स्थिरम् ; अपि गोत्रज्ञाननिर्णयेऽपि नैव भवेदस्यज्ञाननिर्णयः किं मस्यत्र विचार्यं नाम ।

किञ्च "शिवादिभ्योऽण् (४. १. ११२.)"-इति सूत्रीये शिवा-

दिगणेऽपि यस्क एव पठ्यते । तेनैव च सूत्रेण यस्कशब्दात् अपत्येऽर्थेऽणि यास्कः पदं सिध्यति । तथाच यथा यस्कस्यानन्तरापत्यं यास्कः, तथैव यस्कस्य शततमापत्यं सहस्रतमापत्यं च यास्क एव । लघुशब्देन्दुकार-नागेशभट्टमते तु इहापि गोत्रार्थे एव प्रत्यय इष्टः । तथा हि— "शिवादिभ्योऽण्"–इति (४. १. ११२.) पाणिनिसूत्र मस्ति । अत्रेयं दीक्षितकृता वृत्तिः – "गोत्रे इति निवृत्तम् शिवस्यापत्यं शैवः । गार्ग्यः"–इति । अत्राह नागेशः— "निवृत्त मितीदं वृत्त्यनुरोधेन ; यूनि लुक् सूत्रभाष्ये गोत्रसञ्ज्ञासूत्रपर्यन्तं गोत्राधिकार इति ध्वनितत्वात् । तत्र भाष्ये"–इत्यादि । "शास्त्रीयगोत्रञ्च युवत्वानक्रान्तपौत्रप्रभृत्यपत्यरूपम्"–इति, "लौकिकञ्च प्रवराध्यायप्रसिद्धम्; लोके तत्रैव गोत्रव्यवहारात्" –इति द्विविधं गोत्रलक्षणञ्च तत्रैवोक्तम् , तदपीह पर्य्यालोच्यम् ।

अतएव च "वान्यस्मिन् (पा० ४. १. १६५.)"–इति सूत्रीयभाष्यव्याख्यानावसरे कैयट आह— 'यस्कस्यापत्यं गोत्र मिति शिवादयण्'–इत्यादि । एवञ्च यस्कगोत्रीयः कश्चन यास्कोऽस्ति लोके इत्येवं ज्ञान मासीदेव पाणिनेरिति स्वीकारेऽपि कथं नामेदं स्वीकृतं भवेत् यस्कगोत्रीयोऽयं निरुक्तकारः पाणिनेः परिचित एवेति ? 20957

अपरिचित एवायं यास्क इत्यपि कथ मिति चेदुपरिष्टात्तत् प्रतिपादयिष्यामः कालनिर्णयप्रसङ्गे ; इह तु वचनमात्रेणैव बोधयामो नेति । तस्माद्यत मस्मद्वचनादेव स्वीकार्य मेतत्— पाणिनिसूत्रपरिचितोऽपि नायं यास्कः, परं पाणिनिशासनावधारणादेवैतत्तु विज्ञायत एव यस्कगोत्रीयोऽय मिति । 'आसीच्च गोत्रकारो यस्कः कश्चनातिप्राचीनतमः प्रायः कश्यपादिसमकालज एव ;

आश्वलायनीयश्रौतसूत्रान्तिमेऽध्याये दशम्यादिषु कण्डिकासु गोत्राः प्रवरा निरूपिताः, तत्र दशम्यां (आ० श्रौ० उ० ६. १०. १०.) यस्कस्यापि स्मरणात्। तस्यैव ग्रहण मिह पाणिनिसूत्रे इति तु सुव्यक्त मेव।

तदेवं पाणिन्यादौ खल्वस्य यास्कस्य परिचय मप्राप्य खिद्यमाना वयं ततोऽप्यधिकान्वेषणपराः सन्तो दृष्टवन्त एकं यास्क निरुक्तकारत्वेन परिचितं महाभारतैककोणे। ततस्तेभ्य एव पूर्वप्रदर्शितमहाभारतश्लोकेभ्यो ऽनुमीयते यास्कोऽय मेव वा भवेत्तस्य महाभारतकारस्य परिचित इति।

ततो बहुषु सपरिशिष्टनिरुक्तपुस्तकेषु केषुचित् सर्वान्ते "नमः पारस्कराय नमो यास्काय (१३. ४. ८.)"-इति पाठोऽपि दृश्यते। तथा च तत्र केनचित् पारस्करायेति यास्कपरिचयायैवोक्त मिति चानुमीयते। सत्येवं पारस्करोऽयं यास्क इत्यपि लभ्य। पर मिह पारस्करज्ञान मपि न सुगमम्। आसीदेकः पारस्करो गृह्यसूत्रकृत् प्रसिद्धः; आसीच्च पारस्करो धर्मशास्त्रीयान्यविधानकृत् रघुनन्दनशूलपाणि-प्रमाणभूतो निर्णयसिन्धादौ कीर्त्तितश्च। तथाहि शुद्धितत्त्वे— "त्रयहपिण्डदाने आदिपुराणोक्तात् पक्षान्तर माह पारस्करः— 'प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः। द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा"-इत्यादि। अथापि पारस्करशब्देऽत्रास्त्येव सन्देहभावः, पातञ्जले हि महाभाष्ये "पारस्करो देशः" -इति निर्णयात्। तथा ह्यस्त्येकं सूत्रं पाणिनीयम्— "पारस्करप्रभृतीनि च सञ्ज्ञायाम् (६. १. १५७.)"-इति। तत्रैवं भाष्य मास्ते— "अविर्द्धितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः। पारस्करो देशः, कारस्करो वृक्षः, रथस्या नदी, किष्किन्धा गुहा,

किञ्चु:"-इति । तत्रेय मस्मदाशङ्का— गृह्यक्रमत् पारस्कर एव निरुक्तक्रमतोऽस्य यास्कस्य पूर्वपुरुष इति चेत् कथं न महाभाष्यकारस्य पतञ्जले: परिचित: ? न हि यास्कस्यास्य ततोऽप्यर्वाचीनत्वसम्भव इति च प्रतिपादयिष्याम उपरिष्टात् ; तत्पूर्वपुरुषस्य पारस्करस्य तु का कथा । अथवा देशनामत एव तस्य गृह्यक्रमतो नाम इति हेतुत एव मूलपरिचयार्थमेवोक्तं तेन भगवता , पारस्करो देश इति । सत्येव मस्य यास्कस्योभय मेव ज्ञातम् ; निवासोऽभिजनो वा देश: , पूर्वपुरुषश्च ।

शतपथीय: खलु यास्कोऽप्यस्यातिपूर्वपुरुष इत्यपि भवितु मर्हति ; तस्यापि यस्कगोत्रीयत्वेनावगमात् । ततश्चास्य यजुर्वेदित्व मपि सम्भवति ।

तथाचायम्— यस्कगोत्र:, पारस्करदेशीय:, पारस्करवंशधर: , यजुर्वेदी च निरुक्तक्रत् यास्क इत्येतावन्त: परिचया: यथाकथ मपि लभ्यन्त इति शम् ।

---

(५)

अथ इदानी मिद मपि विचार्यम् ,— अस्य यास्कस्य ऋषित्व मस्ति नास्ति वेति । अनुभूयते हि त्रिविध मृषित्वम् , — मुख्य मार्षदेशिकं तार्त्तीयीकञ्चेति । तदेतत्त्रिविधाना मन्यतम मस्यास्त्वेव चेत् किंविध मित्येव निर्णेतु मवतार्यतेऽयं प्रबन्ध: ।

मुख्यर्षिलक्षणन्तु स एव स्वय मेव माह— "ऋषि: , दर्शनात् । स्तोमान् ददर्शेत्यौपमन्यव: । तद्यदेनांस्तपस्यमानान्

ब्रह्म स्वयम्भवभ्यानर्षत् तदृषीणा मृषित्व मिति विज्ञायते (२. ३. २.)"–इति। अत्रोक्तं तथदेनानित्यादिकं ब्राह्मणमत मेवेह प्रमाणत्वेनोपन्यस्तम् ; तदुक्तं तत्रैव वृत्तिकृता दुर्गाचार्येण— "ब्राह्मण मपि चैतस्मिन्नर्थे दर्शयति 'तथदेनांस्तपस्यमानान्'–इत्यादि। 'तत्' एतत् उच्यते यत्कृत मृषीणा मृषित्वम्"–इत्यादि। अपरत्रापि "ऋषिः कुत्सो भवति, कर्त्ता स्तोमानाम्— इत्यौपमन्यवः (३. २. ५.)"–इति च तन्निदर्शनं प्रदर्शित मेतेनैव यास्केन। किञ्च तत्पूर्वतनाना मपि तथैव व्यवहार इति च प्रदर्शितं तेनैव। तथाहि— "साक्षात्कृतधर्माण ऋषयो बभूवुः"–इत्याद्युक्त मालोचनोचितम् (२४ पृ०)। तत्रैव "ऋषन्ति अमुष्मात् कर्मण एव मर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैतल्लक्षणं फलविपरिणामो भवतीत्यृषयः"–इति च ऋषिपदनिर्वचनं कृतं दुर्गाचार्येण। एवञ्च मन्त्रद्रष्टृणा मेव मुख्य मृषित्व मिष्टम् ; तथा चादि कल्पजाना मतिप्राचीनतमानां वसिष्ठ-वामदेवादीना मेव ताट्टर्षित्व मुररीकार्य मिति प्रतीयत एव।

द्रष्टृत्वं कर्तृत्वञ्चाभिन्न मेव प्रायः ; तत्र अतीवप्राचीनाना मत्रेयकालिकाना मेव कृते दृष्ट मिति व्यवहारो नान्यत्रेत्येव विशेषः। तदिमानि "दृष्टं साम (४. २. ७.)"–इत्यादि-पाणिनिसूत्रीयाणि "वसिष्ठेन दृष्टं वासिष्ठं साम"–इत्यादीनि वृत्तिकृदुदाहरणादीनि द्रष्टव्यानि ; तथैव "य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्, स ऋत्समदो द्वितीयं मण्डल मपश्यत्"–इत्येवमादीन्यनुक्रमणीवचनादीनि च। किञ्चैतन्निरुक्तकारोऽप्याह तथा—,"ऋषेरचपरिद्यूनस्यैतदार्षम् (६. १. ८.)"–इति। "मन्त्राणां जाल मापन्नाना मेतदार्षम् (६. ५. ४.)"–इत्यादि च।

दृष्टे तत्रैवार्थे कृत इति व्यवहारोऽपि नादृष्टचरः। तथा ह्यैतरेयके ब्राह्मणे— "देवा ह वै सर्वचरी सत्रं निषेदुस्ते ह पाप्मानं नापजघ्निरे। तान् होवाचार्वुदः कादृवेयः सर्प ऋषि मन्त्रकृत् (६. १. १.)"–इति। निरुक्ते ऽप्येवं दृष्टान्तो न दुर्लभः। तथाहि – "इदञ्च मेऽदादिदञ्च मेऽदादित्यृषिः प्रसङ्गाद्याह सुवास्त्वा अधि तुग्वनि (४. २. ७.)"–इत्यादि च। यास्कपूर्वप्रवादा अप्यत्र सङ्गृहीताः सन्ति, तत्राप्यस्त्वेव कृतकत्वप्रसिद्धिर्मन्त्राणाम्। तथाहि— "तत्रेतिहास माचक्षते— विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव। ०—०। स वित्तं गृहीत्वा विपाट्छुतुद्र्योः सम्भेद मायया वनुययुरितरे। स विश्वामित्रो नदीं तुष्टाव गाधा भवतेत्यपि, द्विवदपि बहुवत् (२. ७. २.)–इत्यादि। तथा "धातोः कर्मणः समानकर्तृकादिच्छायां वा (३. १. ७.)"–इति पाणिनीयस्य सूत्रस्य व्याख्यानावसरे प्रसङ्गतो भगवता पतञ्जलिनापि भाषितम्— "ऋषिः पठति— 'शृणोत ग्रावाणः'–इति"–इति। स्तवनपठनादिकञ्च कृतिविशेष एव; तदेवं मन्त्रकर्तृत्वं मन्त्रद्रष्टृत्वञ्च वस्तुतोऽभिन्न मिति स्फुटम्।

तदित्थं मन्त्रद्रष्टृत्वं त्वृषीणा मेव, तथा ऋषित्व मपि मन्त्रद्रष्टृत्वानुगत मेवेत्यपि स्थिरम्। एव मृषित्व-मन्त्रद्रष्टृत्वयोः सामानाधिकरण्यं सर्वसम्मत मिति मन्त्रद्रष्टृत्वमूलक मेव मुख्य मृषित्व मित्यत्र च न कोऽपि संशयः। अथ कस्या मपि संहितायां यास्ककृत एकोऽपि मन्त्रो न दृष्टचरः, न चाद्ययुगीयस्यास्य यास्कस्य मन्त्रकर्तृत्वसम्भवोऽपि; तदेव मस्य यास्कस्य मन्त्रकर्तृत्वाभावात् मुख्य मृषित्वन्तु नास्त्येव।

ब्राह्मणकर्तृणां ताण्ड्यादीनां मन्त्रकर्तृत्वाभावेऽपि मन्त्रकर्तृत्व-

तुल्यतया मातिदेशिक मृषित्वन्तु स्वीकृत मेव यास्कपूर्वतनैरपि। तथाहि— "साक्षात्कृतधर्माण ऋषयो बभूवुः ०—० उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं वेदाङ्गानि च (१. ६. ५.)"–इति। अत्र 'अवरे'–इति पदात् ऋषय एव गम्यन्ते; तथाच निघण्टुकारस्य, ब्राह्मणापरपर्यायाणां वेदानां प्रवक्तृणाम्, वेदाङ्गानाञ्च कर्तृणा मपि ऋषित्वव्यवहार आर्षसम्मत एवेति तत्र ध्वनितम्। तदत्र, यास्कस्य निघण्टुकर्तृत्वं नैवेति पूर्वमेव प्रतिपादित मस्माभिः; ब्राह्मणप्रवक्तृत्व मपि नास्त्येव; वेदाङ्गकर्तृत्वं त्वस्ति, परं न तद् वेदाङ्ग मिदं निरुक्तम्, यत्कृत मृषित्वं स्यादेतत्कर्तुर्यास्कस्य; प्रदर्शितयास्कानूक्तश्रुतितोऽपि यास्क-पूर्वप्रचलितनिरुक्तादिकर्तृणा मेव ऋषित्वावगमात्। तदेतावतेद मेव निष्पन्नम्, यास्कस्यास्य त्वेव मातिदेशिक मृषित्व मपि नोपयुज्यते इति।

अथ प्रदर्शिते शतपथब्राह्मणवचने व्यक्त मेवास्य पूर्वपुरुषस्य मधुविद्याप्रवक्तृत्वम्, मधुविद्या च ब्राह्मणान्तर्गतैव; तथाच तादृशस्य ब्राह्मणप्रवक्तुः वंशधरत्वेनैवास्यापि यास्कस्य मुख्यर्षित्व मापाद्य मेवेत्यपि वक्तुं न युज्यते; लोकवेदव्यवहारविरोधात्; न च लोके नापि वेदे ऋषिवंशप्रभवत्वेनैवर्षित्वं क्वचिदपि हि व्यवहृतं दृश्यते।

लोके तावत्— वयन्तु कश्यपर्षिवंशप्रभवा एव, परं कः खलु भारते ऽस्मान् प्रति ऋषय इमे इति व्यवहरन्ति? किं बहुना यदि हि वंशप्रभवत्वेनैव ऋषित्व माप्यं भवेत्तर्हि अद्यतनीया अप्यार्याः सर्व एव प्राय ऋषय एवोक्ताः स्युः; सर्वेषा मेव कश्यप-भरद्वाज-वसिष्ठादि-वंशीयत्वात्; न ह्येवं व्यपदेशो दृश्यते लोके क्वापीति नैवं व्यवहारो लौकिक इति स्फुटम्।

वैदिकव्यवहारतस्याधिगम्यते नावाप्य ऋषित्व ऋषिवंशप्रभवत्वे नैवेति । तथा हि—

"अर्चनानाः पुरातेयो दाल्भ्योऽन रथवीतिना ।
आर्त्विज्याय हुतो यज्ञे वितते हौत्र आस्थितः ।
रथवीतिसुतां कन्यां ददर्श पितुरन्तिके ।
ययाचे स्वकुमाराय श्यावाश्वाय च तां सुताम् ।
स प्रदानमना भार्या मपृच्छत् किं प्रयच्छसि ।
इति पृष्टा पुनः प्राह कथ मस्मै प्रदास्यसि ।
इतः पूर्वं सुता दत्ता नासीदृषये क्वचित् ।
तत्तथैवेति निश्चित्य प्रत्याचष्टार्चनानसम् ।
श्यावाश्वः संस्थिते यज्ञे तेन राज्ञा निराकृतः ।
तत्प्रत्याशान्वितो विप्रस्तप्तेपे सुदारुणम् ।
ब्रह्मचर्यरतः शान्तो भिक्षार्थं पर्यटन् द्विजः ।
तरन्तमर्षिणीं साध्वीं बिभिदेऽसौ शशीयसीम् ।
सा तमाप्यान्तिकं पत्युः प्रोवाचागतवानृषिः ।
इत्युक्तो नृपतिर्भार्यां प्रत्याहैनं प्रपूजय ।
सानुज्ञाता गवां यूथं प्रादादाभरणानि च ।
तरन्तोऽपि पुनस्तस्मै प्रादाद्धन मपेक्षितम् ।
दत्त्वा च पुरुमीढस्य स्वानुजस्यान्तिकं प्रति ।
प्रेरयामास त मृषिं सोऽपि त्वां मानयिष्यति ।
तथेति राज्ञो वचनं निशम्य तद्भार्यया दर्शितसर्वमार्गः ।
गच्छन् शनैरध्वपथे मरुद्गणान् समानरूपान् स्वदिदृक्षयागतान् ।
विलोक्य विप्रः सभयः प्रणम्य कृताञ्जलिः कण्टकिताङ्गसङ्गः ।
तुष्टाव हृष्टान् मरुतो विशिष्टैरर्थैर्वचोभिः परितुष्टचित्तः ।

सम्प्राप्य सर्वं स्वमनीषितं तदा मरुद्गणेभ्यो मुदितात्मवङ्गः ।
तदाभवद्दृषिः सूक्तद्रष्टा श्यावाश्वनामकः ।
पश्चात् पुनर्गेहं गत्वा भूयो लब्ध्वा गवां शतम् ।
दाल्भ्या मन्त्रदृशे राज्ञा चोदितः स्वसुतां ददौ ।
पुरुमीढस्तरत्तश्च तद्भार्या च शचीयसी ।
दाल्भ्यो यो रथवीत्याख्यः सप्त ये मरुतां गणाः ।
ते तस्मै यद्दुस्तुष्टास्तत् कैठेत्यत्र वर्ण्यते ॥"—

इति शौनकीय-बृहद्देवतोक्तं सायणलिखितं पुराहृत्तं 'कैठा'-इति सूक्तीयोपोद्घातम् । तच्च सूक्त मेकोनविंशत्यृच सृक्संहिताया: पञ्चममण्डलीय पञ्चमाध्यायस्य पञ्चमम् । एवञ्च यद्यपि अत्रिवंश-प्रभव: अर्चनाना: , ऋषिरिति प्रसिद्ध: , तथापि तत्पुत्र: श्यावाश्वो न ऋषिशब्दव्यपदेशभाक् पितृनामकृत इति सुव्यक्त मत्र ।

अर्चनानस: ऋषित्वं तु तत्रैवाग्ये स्पष्ट मुक्तम् । तथाहि , तत्र सूक्तीयसप्तदशर्ग्व्याख्यानप्रसङ्गे च पुन:—

"सम्यक्ऋषिभावस्य श्यावाश्वस्यार्चनानस: ।
रथवीतिसुतायाश्च विवाहं शौनकोऽब्रवीत् ।
कथम् ? मरुत्सु तु प्रयातेषु श्यावाश्व: सुमहायशा: ।
प्रादुर्भूतार्ष मात्मानं ज्ञात्वात्रिकुलनन्दन: ।
रथवीतेर्दुहितर मगच्छन्मनसा तदा ।
स सत्य मृषि मात्मानं प्रवक्ष्यन्नथवीतये ।
'एतं मे स्तोमम् (५.५.५.१७,१८.)'-इत्याभ्यां दौत्ये रात्रिं न्यवेदयत् ।
ऋषेर्नियोग माज्ञाय देव्या रात्र्या प्रचोदित: ।
आदाय कन्यकां दातु मुपेयायार्चनानसम् ।
पादौ तस्योपसङ्गृह्य स्थित्वा प्रह्व: कृताञ्जलि: ।

रथवीतिरहं दाल्भ्य इति नाम शशंस सः ।
मया संयोग मिच्छन्तं त्वां प्रत्याचक्षि यत् पुरा ।
तत् क्षमस्व नमस्तेऽस्तु मे मास्म भगवन् ! क्रुधीः ।
ऋषेः पुत्रः स्वयं ऋषिः पितासि भगवानृषेः ।
हन्त प्रतिगृहाणेमां स्नुषा मित्येन मब्रवीत् ।
तस्मै ददावश्वशतं स राजा स्वलङ्कृतां चापि सुतां स्नुषार्थम् ।
विवाहकालेऽपि ददौ नरेन्द्रः शतं श्यानां दुहितुः सहस्रम ।
गवां सहस्रं वसु च प्रभूतं तप्तुं तपोऽन्तेऽथ वनं जगाम"–इति ।

एवञ्च श्यावाश्वस्य, पितुः पितामहस्य च ऋषित्वेऽपि न ऋषित्वव्यवहारोऽभूत् ; अपि तु मन्त्रद्रष्टृत्वेनैवेति सुव्यक्त मेव ।

ऋक्संहितायान्तु श्यावाश्वस्य सप्तदश सूक्तानि (५.५२—६१ ; ५. ८१ ; ५. ८२ ; ८. ३५—३८ ; ८. ३२.), तत्र च १७७ ऋचः श्रूयन्ते ; अत एव तस्य ऋषित्वम् । तत्पितुः अर्चनानसतु त्रीणि सूक्तानि (५. ६३ ; ५. ६४ ; ८. ४२.), तत्र च २० ऋचः श्रूयन्ते ; अत एव तस्यापि ऋषित्वम् । तत्पितुश्च अत्रेर्भौमस्य चतुर्दश सूक्तानि (५. २७ ; ५. ३७—४३ ; ५. ७६ ; ५. ७७ ; ५. ८३—८६.) तत्र च १२२ ऋचः ; अपरसूक्तेषु च तस्यैवात्रेः खलु नव (८. ६७. १०—१२ ; ८. ८६. ४१—४५ ; १०. १३७. ४.) ऋचः श्रूयन्ते ; अतएव तस्यापि ऋषित्वम् । अत्रिश्च ऋक्संहिताया मेको भौमोऽपरः शाङ्ग्रः ; तदत्र न ज्ञेयः कतरोऽस्य श्यावाश्वस्यादिपुरुषः ? परं शाङ्ग्रस्याप्यत्रेरस्ति षड्ऋचमेकं सूक्तम् (८. १४३.) ; अतस्तस्याप्यृषित्वम् । तदित्थं तस्य हि यास्कस्य सुस्थर्षिवंशप्रभवत्वेऽपि सुस्थर्षित्वं सुदुर्लभ मेव ।

नन्वेवं महाभारते कथं मुक्तं दृश्यते "यास्को मा सृषिरव्ययः"

-इति, "यास्क ऋषिरुदारधीः"-इति (२३ पृ०) च ? अत्र ब्रूमः— तत्तु महाभारतकारस्य स्वस्य यथा ऋषित्वं तथैव पूजनीयत्वापरपर्यायक मेव ; तादृश ऋषित्वमद्यापि वर्त्तत एवेति। वस्तुतो मन्त्रद्रष्टृत्वेनैव आदिवसिष्ठादीना ऋषित्वं मुख्यम् ; तादृग्ऋषित्वन्तु ताण्डयादीनां ब्राह्मणप्रवक्तृणा मपि नास्ति ; तत् महाभारतरामायणादिकर्तृणान्तु कथा दूरपराहतैव। तत्तुल्यत्वेन च ऋषित्वं द्वितीयम् ; तदेवाह महाभाष्ये भगवान् पतञ्जलिः—

"न तावदनृषिः कश्चित् स्मर्यते कल्पसूत्रकृत्।
कर्तृत्वं यद्दर्शनान्तु तत् सर्वं मन्त्रकृत्-समम् (१.३.१०.)"-इति।

तदेवं द्वितीय ऋषित्वम्, ब्राह्मणभागप्रवक्तृणाम् अनुब्राह्मणप्रवक्तृणाम्, ब्राह्मणान्तर्गतानां किञ्च प्रायोलुप्तानां— कल्पादिवेदाङ्गशास्त्राणां प्रवक्तृणाम्। ईदृग्ऋषित्व मपि नास्ति तेषा मद्यप्रचलितेतन्महाभारतकारादीनाम्। बहुज्ञत्वात्, बहुमानत्वादितस्यादरातिशय्यप्रकाशकवचन मिदम् "अय ऋषिः"-इति यत्र प्रयुज्यते, तस्य त्वृषित्वं पूजनीयत्वापरपर्य्यायकं तृतीयम्। तादृग्ऋषित्व मेव व्यासवाल्मीक्यादीनाम्। तत् तार्त्तीयीक ऋषित्व मेव यास्कस्यास्य स्थित मिति मन्यते चेन्न तत्रास्माक मसम्मतिः ; परं मुख्य ऋषित्वं ते तस्य नासीदेव, द्वितीयर्षित्व मपि न सम्भाव्यते।

अपि च गणपाठे शिवादिषु (४. १. ११२.) यस्कपाठदर्शनाच्चेद मपि ज्ञायते,— यद्यामतोऽस्य नाम यास्क इति, तस्याप्येतदादिपुरुषस्य नासीत् ऋषित्व मिति ; सति हि तस्य ऋषित्वे ऋष्यणा (४. १. ११४.) एव यास्केति सिद्धौ तत्पाठफल माकाशकुसुमायित मेव स्यात्। अत एव "यास्को मुनिः"-इति दृश्यते मुग्धबोधादौ ; न तु "यास्क ऋषिः"-इति।

यास्कस्य मुख्यर्षित्वविचारस्तु दूरे आस्ताम् ,— विकृतिवल्ली-कारः खलु यास्कपूर्वजो व्याडिश्चाह स्वगुरोः शौनकस्य प्रातिशाख्य-कारस्यापि मुनित्व मेव। तथाहि— "नत्वादौ शौनकाचार्यं गुरुं ०—० मुनीन्द्रम्"-इति (वि० १. २.)। "पुनः किं विशिष्टम् ? 'मुनीन्द्रम्' मननशीला मुनयः , तेषु श्रेष्ठम्"-इति च तत्र तट्टीकाकारः। तथा पाणिनि-कात्यायन-पतञ्जलीना मपि मुनित्व मेव सर्वत्र व्यवहृतं गम्यते , न क्वाप्यृषित्वम्। तथा हि— "मुनित्रयं नमस्कृत्य"-इत्याह दीक्षितः ; किञ्च "योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन। योऽपाकरोत् तम् प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि"-इत्यत्रापि पत-ञ्जलेर्मुनिप्रवरत्व मेव स्मर्यते। तथा "तच्च दृष्टिरादैजित्याद्यध्याया-ष्टकात्मकं महेश्वरप्रसादेन भगवता पाणिनि नैव प्रकाशितम्। अत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्त्तिकं विरचितम् , तदार्त्तिकस्योपरि च भगवता पतञ्जलिना महाभाष्य मारचितम्। तदेतत् त्रिमुनि व्याकरणं वेदाङ्गं माहेश्वर मित्याख्यायते"-इति चाह प्रस्थानभेदकर्त्ता मधुसूदनोऽपि।

वेदाङ्गेषु षट्सु , यासु शिक्षाः तैत्तिरीयब्राह्मणादौ श्रूयन्ते , तासा मेव ऋषिकृतत्वम् ; छन्दोविधानानि च यानि सामवेदीयानु-ब्राह्मणादौ श्रूयन्ते , तेषा मेव ऋषिकृतत्वम् ; व्याकरणानि च पदपाठाद्यात्मकानि पुरा स्थितानि , यानि चेदानीं पाणिनीया-र्कप्रभातोऽदृश्यानि ,—अहनि सहस्ररश्मिप्रभातस्तारकामण्डला-नीव किञ्च शाकटायनीयकौन्त्यादीनि च यानी दानी मपि ज्योतिरिङ्गना इव वरीवर्त्तन्ते , तेषा मृषिकृतत्व मेव ; निरुक्तानि च यानि ब्राह्मणेषु दृश्यन्ते , अनुब्राह्मणेषु च स्थितानीत्यनुमीयन्ते,

निदानसूत्रेषु चोपलभ्यन्ते, शाकपूण्यादिकृतान्यासन्निति च यास्कवचनादितोऽवगम्यन्ते, तेषां मृषिकृतत्व मेव; पैङ्गयादीना मतिप्राचीनतमकल्पसूत्राणान्तु प्रायो ब्राह्मणसमकालिकत्व मेव पाणिनिशासनादिभिरवगम्यते, तत्तेषा मृषिकृतत्वे तु नास्त्येव सन्देहावसरः। यतश्च पैङ्गयादीनि प्राचीनतमानि कल्पसूत्राणि चिरादेव ब्राह्मणतः पृथगेव प्रोक्तानि, प्रायस्तत्समकालिकानि चेति तेषा मार्षत्वं निर्विवाद मेव; अतो भाष्योद्धृतायां सङ्गृहीतकारिकायां 'न अनृषिः कल्पकृत्'-इति कल्पकृता मेवानृषित्वशङ्का निवारिता; न हि तत्रोक्तं श्रूयते 'न अनृषिः वेदाङ्गकृत्'-इति। एवं हि निष्पन्न मेतत्,— ब्राह्मणानुब्राह्मणान्तर्गतानां निरुक्तादीनां वेदाङ्गाना मार्षदेशिकार्षत्व मस्त्येव; शाकपूण्यादिकृतानाञ्च स्यात् तथैव, परं यास्कीयस्यास्य ग्रन्थस्यार्षत्वं तु महाभारतादिग्रन्थाना मिव तार्त्तीयीक मेवेति।

विकृतिकौमुद्यादौ यत् पाणिनिपरजस्यापि व्याडेः ऋष्याख्यानं दृश्यते— "व्याडिनैव महर्षिणा"-इति (१. ४ श्लो०), तदपि तथाभिप्रायेणैव; तेषां तु नये मन्त्रादिकर्तृयोग्यतैवर्षित्वे निदानम्। तादृशी योग्यता तु नूतनवेदाङ्गानां तदङ्गानाञ्चापि कर्त्तृणां पाणिनि-व्याडि-शौनक-यास्कादीना मासीदेवेति तेषा मप्यृषित्वं मन्तव्य मेवेति भवेत्तदपि तार्त्तीयीक मेव; तद् भवतु नामास्यापि न नोऽत्र विवादः। बह्वृक्प्रातिशाख्यकृत् शौनकोऽपि तार्त्तीयीक मार्षत्व मेवाभिप्रेत्योक्त मेवम्— "कृत्स्नञ्च वेदाङ्ग मनित्य मार्षम्' इति-(पा०सू०३.२.६.)। अपि च व्याडेर्मुख्यर्षित्वे तु क्रौड्यादिगणे व्याडिशब्दस्य पाठो वैयर्थ्य मेवापद्येत; "क्रौड्यादिभ्यश्च (पा० ४. १. ८०.)"-इतिसूत्रस्य ज्ञानार्षविषयत्व मेव

निर्णयात् ; तस्य हि "अणिञोरनार्षयोः० (४. १. ७८.)"-इत्येतत्सूत्रीयप्रपञ्चभूतत्वात् । अत एव "गोत्रावयवात् (पा० ४. १. ७९.)"-इति सूत्रस्य भाष्ये – "अष्टाशीति सहस्राण्यूर्ध्वरेतसा ऋषीणां बभूवुः, तत्रागस्त्याष्टमैः ऋषिभिः प्रजननोऽभ्युपगतः, तत्र भवतां यदपत्यं तानि गोत्राणि, अतोऽन्ये गोत्रावयवाः ।०—०। कथं येभ्यः अगुरुपोत्तमेभ्य इष्यते ? सिद्धन्तु रौढ्यादिषूपसङ्ख्यानात् । ०—० । के पुनरौढ्यादयः ? ये क्रौड्यादयः"-इत्याह भगवान् पतञ्जलिः । तदेतत्सार मेवाक्षय्योक्तं दीक्षितेन सिद्धान्तकौमुद्याम्— "अगुरुपोत्तमार्थोऽनणिञर्थश्चारम्भः"-इति ; न चोक्तं तेन तत्रार्षार्थश्चेति । यद्यप्यृषिरपि कश्चिद् व्याडिः स्यात् , तर्हि तदपत्यं न भवेत् 'व्याड्या' इत्यतोऽत्र क्रौड्यादिगणेऽवश्यं गणपाठकार-भाष्यकारादिभिः कश्चन यत्नः कर्त्तव्य एव ; न च तथाकृतं दृश्यते । अतो व्याडेरपि मुख्य ऋषित्वं नास्त्येवेति किं तत्परजस्यैतस्य यास्कस्यर्षित्वविचारेणेत्यलम् । सङ्ग्रहकारो व्याडिरेव विकृतिवल्लीकारः ; स च पाणिनिपरजो यास्कपूर्वजश्चेत्यपि प्रतिपादयिष्यामो वय मुपरिष्टादिहैव ।

आश्वलायनगृह्यसूत्रेऽपि मन्त्रकृता मेव गणानां मुख्य ऋषित्व मिति तेषां विशेषत उल्लेखो दृश्यते । तथाहि— "अथ ऋषयः ,— शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ताः महासूक्ता इति (३.४.२.)" –इति । तत्रैव चेतोऽनन्तर माचार्यनामान्यपि कानिचित् स्मृतानि -- "सुमन्तु-जैमिनि-वैशम्पायन-पैल-सूत्रभाष्यभारतमहाभारतधर्माचार्या जानन्ति बाह्वि-गार्ग्य-गौतम-शाकल्य-बाभ्रव्य-माण्डुकेया गार्गी वाचक्नवी वडवा प्राचीथेयी सुलभा मैत्रेयी कहोलं कौषी-

तकं पैङ्ग्यं महापैङ्गं सुयज्ञं साङ्ख्यायन मैतरेयं शाकलं बाष्कलं सुजातवक्त्र मौदवाहिं महौदवाहिं सौजामिं शौनक माश्वलायनं ये चान्ये आचार्यास्ते सर्वे ढप्यन्विति (३. ४. ४.)"-इति। इह त्वाचार्यनामसु यद्यपि न दृश्यते यास्कनाम, पाणिन्यादीनाञ्च नाम; तथापि सूत्रकारत्वेनैव पाराशर्यकर्णभक्षाक्षचरणपाणिनिप्रभृतीनां, निघण्टुसमाम्नायभाष्यकारत्वेन यास्कस्य च ग्रहण मिष्ट मिति स्वीकार्यम्।

अद्यप्रचलितमहाभारतस्य बीज मासीत् पुरा किञ्चन भारतं नाम, तदेव क्रमादङ्कुरितं प्रस्फुटतत्त्वञ्चाभूत् प्रसिद्धं महाभारत मिति, तन्महाभारत मेव प्रहृद्धं पल्लवितं विस्तृत मिदानीन्तनीय मिदं महाभारतं नामेति चेह गुरुचरणाः। किञ्च अत्र सूतः शौनकस्तु न चादिकालिको मण्डलकार ऋक्संहिताया:, तस्य ह्यत्र ऋषिनामसु गृत्समद इत्येव ग्रहणसिद्धेः; नापि बह्वृक्प्रातिशाख्यकारः, अपि तु शाखाविशेषस्य प्रवक्तैव। शाकलादिसाहचर्य मेवात्र नियामक मिति। आश्वलायनोऽप्यत्र न तु गृह्यादिकृत्, अपि शाखाप्रवक्तैव; अत्रापि हि शाकलादिसाहचर्य मस्त्येव नियामकम्; को नु नाम 'रामकृष्णावमू आसाते'-इत्यत्र दशरथापत्यस्य रामस्य, 'रामलक्ष्मणौ'-इत्यत्र च जामदग्न्यादेर्ग्रहण मिच्छति। वस्तुतस्त्विहाश्वलायनीये अधोऽधः क्रम एव विवक्षितः। तथाच—सुमन्त्वादयश्चत्वारो व्यासशिष्याः समकालिकाः, तत्पूर्वजा व्यासादयः सूत्रकाराः, तत्पूर्वकालिका बाहव्यादयः संहितापाठाध्ययनभेदोपदेशकाः, तत्पूर्वतनाः गार्गीप्रभृतयो ब्रह्मवादिन्यः, तत्पूर्वतनाः कहोलादयो ब्राह्मणादिप्रवक्तारः, तत्पूर्वतना एव शाकलादयः शाखाकारा इति दिक्।

ततश्चैषा मध्ययुगीयानां तार्क्षीयीकर्षित्वसम्पन्नानां सुमन्तु-प्रभृतीनाम्, तत्पूर्वकालिकाना मतिदिष्टर्षिभावापन्नानाञ्च बाष्क-व्यादीना मतिहृद्याश्वलायनान्ताना माचार्यत्व मेव सम्मत माश्व-लायनस्यापि ; न तु मुख्यर्षित्व मिति स्फुटम् ।

अप्येवं सामान्यत ऋषिलक्षणं न दुर्लभं सम्भाव्यतेऽद्ययुगीयानां सुमन्त्वादीना मपि । तथा च सूचित मिहैव त्रयोदशाध्याये,— "मनुष्या वा ऋषीषूत्क्रामत्सु देवानब्रुवन्,— को न ऋषिर्भवि-ष्यति ? इति । तेभ्य एतं तर्कं ऋषिं प्रायच्छन्,— मन्त्रार्थचिन्ता-भ्यूह मभ्यूहम् । तस्माद् यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद् भवति (१३. १. १६.)"–इति । एवञ्च 'अनूचानत्वे सति मन्त्रार्थाभ्यूहन-समर्थत्वम्, ऋषित्वम्'–इत्येव सामान्यत ऋषिलक्षणं फलितम् । अनूचानस्तु गुरुमुखाल्लब्धवेद एव ; तल्लक्षणादिकं तु द्रष्टव्यं मन्वादौ । मन्त्रार्थाभ्यूहनप्रकारस्तु इहैवं विहित:,— "तपसा पार मीप्सि-तव्यम्"–इत्यादिना (१३. १. १३.) ; "शाकपूणि: सङ्कल्पयाञ्चक्रे (२. २. ४.)"–इत्याद्युदाहृतञ्च तदत्र याज्केन । तदीदृश ऋषित्वं त्वशाक मपि कृतब्रह्मचर्य्याणां मन्त्रार्थाभ्यूहनसमर्थानां सम्भवेदेव, तत् किन्नाम भगवतोऽस्य यास्कस्येति ।

इत्थं निष्पन्न मेतत् ;— एतन्निरुक्तकारो यास्क: खलु वस्तुतो मुनिराचार्य्यश्चेत्येव चिरात् प्रसिद्ध: ; एव मस्य भगवत: सामान्यत ऋषित्व मभ्याहृत मेव ; तत्रापि विशेषतो विचारिते स्यात् तार्क्षी-यीकं तदिति सिद्ध मेतत्, अपि च ग्रन्थस्यार्षत्व मिति शम् ॥

———

(६)

अथेदानीमिदमिह विचार्यम् ,— कियान् निरुक्तग्रन्थोऽयमिति। अस्माभिस्तु यावन्ति निरुक्तपुस्तकानि दृष्टानि, तेषु सर्वेष्वेवास्य "समाम्नायः समाम्नातः स व्याख्यातव्यः"–इत्यारभ्य-वाक्यं दृष्टमेव, च-जातिरिक्तेषु सर्वेष्वेव "ब्रह्म शुक्रमसीय ब्रह्म शुक्रमसीय"–इति परिसमाप्तिवचनञ्च; च-ज-पुस्तकयोस्तु "य एवं वेद"–इत्येव समाप्तिवाक्यम्; तदुत्तरस्थितः "नमो ब्रह्मणे नमो महते भूताय नमः पारस्कराय नमो यास्काय ब्रह्म शुक्रमसीय ब्रह्म शुक्रमसीय"–इत्येवं पाठस्तु तयोर्न दृश्यते; तदिदं न विशेषपार्थक्यम्। हि-चतुः-खण्ड-कृतं न्यूनाधिक्यं खण्डभेदकृतमाधिक्यं वाकिञ्चित्करमेवेदृशे प्राचीनतमे ग्रन्थे। तथाप्यस्ति किञ्चिदत्र विचारणीयम्। तथाहि— केषु चित् पुस्तकेषु द्वादशाध्यायान्तं निरुक्तम्, तत उत्तरमध्यायद्वयात्मकं परिशिष्टमिति लिखितं दृश्यते; केषुचित् द्वादशाध्यायान्तमेव निरुक्तम्, परं तत उत्तरमेकाध्यायात्मकमेव परिशिष्टमिति लिखितं दृश्यते, अपि तस्मिन्नेकस्मिन्नेवाध्याये ऽपरपुस्तकदृष्टाध्यायद्वयीयाः सर्व एव खण्डा विद्यन्त एव; केषुचित्तु तादृश-त्रयोदशाध्यायान्त एव "निरुक्तं समाप्तम्"–इति लिखितमस्ति, परिशिष्टशब्दोऽपि न तेषु लक्ष्यते; केषुचित् अन्त्याध्यायद्वयान्ते परिशिष्टं समाप्तं लिखितमस्ति, किन्तु तयोः क्रमात् त्रयोदशचतुर्दशाध्यायत्वे च। अत एतर्हि विचार्यते द्वादशाध्यायात्मकं त्रयोदशाध्यायात्मकं चतुर्दशाध्यायात्मकं वेति कत्यध्यायं निरुक्तमिति।

निघण्टुव्याख्यानकारस्य देवराजयज्वनो मते तु "समाम्नायः

समाम्नातः (१. १. १.)"-इत्यादि, "य ऋतुः कालो जायानां य ऋतुः कालो जायानाम् (१२. ४. १२.)"-इत्यन्तं द्वादशाध्यायात्मक मेव यास्कीयं निरुक्तम्। तदुक्तं स्वग्रन्थभूमिकायाम्-- "भगवता यास्केन समाम्नायं नैघण्टुक-नैगम-दैवताकाण्डरूपेण त्रिविधं गवादि देवपत्न्यन्तं निर्बुवता"-इत्यादि। नात्रातिस्तुति-प्रकरणस्योर्ध्वमार्गगतिप्रकरणस्य च नामापि कीर्त्तितम्; सन्ति तु तत्रतत्रापि बह्वनि निर्वचनपदानि, येषां च प्रामाण्यरूपेण ग्रहणं योग्य मेव। अपि हि तेन स्वग्रन्थभूमिकायाम्— "स्कन्दस्वामिना च निगमव्याख्यानेषु अन्यानि च पदानि शतद्वयमात्राण्युपात्तानि -इति चोल्लिखितं परं त्रयोदशचतुर्दशाध्यायीयनिर्वचनाना मस्तित्व मपि न स्मृतम्। तथाच तादृशानां स्मर्त्तव्याना मप्यस्मरणात् तेषा मस्तित्वेन निरुक्तत्वेन वा ज्ञानाभाव एव तस्य यज्वनः सुयक्त इति किं न स्वीकार्यम्?।

निरुक्तवृत्तिकृता दुर्गाचार्येण तु ग्रन्थारम्भे निरुक्तस्य द्वादशाध्यायीत्व मुक्तापि तदन्ते सपादद्वादशाध्यायीत्व मुक्त मिति। त्रयोदशाध्यायीत्व मेव स्वीकृतम्। तथाच प्रथमखण्डव्याख्यानारम्भे— "अयञ्च तस्या द्वादशाध्यायी भाष्यविस्तरः; तस्य इद मादिवाक्यं समाम्नायः समाम्नात इति"-इति, अन्तपुष्पिकायान्तु "ऋज्वर्थायां निरुक्तवृत्तौ अष्टादशाध्यायः। (त्रयोदशाध्यायः) समाप्तः"-इति, "इति सपादसप्तदशाध्यायी ऋज्वर्था नाम निरुक्तवृत्तिः समाप्ता"-इति च द्रष्टव्यम्। तदेव मेतन्मते अतिस्तुतिरूप-त्रयोदशाध्यायस्य च निरुक्तत्व मेव, न तु परिशिष्टत्वम्; ऊर्ध्वमार्ग-गतिरूप-चतुर्दशाध्यायस्य (द्वितीयपरिशिष्टस्य) तु सर्वथाऽस्वीकरण मेव सम्मतम्। अपरञ्च त्रयोदशस्याध्यायस्य स्वल्पग्रन्थत्वादेक-

चरणत्व मेव मत्वा , ग्रन्थान्तेऽस्य विशेषतः सपादद्वादशाध्यायीत्वं स्वीकरिष्यमाण मपि सामान्यत एवोल्लिखित मुपक्रमे द्वादशाध्यायीति । तदेव मतिस्तुतिप्रकरणस्य स्वल्पत्वादध्यायरूपत्वाभावात् सामान्यतो निरुक्तग्रन्थो द्वादशाध्यायीत्येव निर्देश्यः ; विशेषतस्तु सपादद्वादशाध्यायीति , किञ्च मूलसूत्ररूपनिघण्टुपञ्चाध्याया सह सपादसप्तदशाध्यायीति चेत्येवेह वृत्तिकृन्मत मभिव्यक्तम् ।

सायणाचार्यस्तु अतिस्तुतिप्रकरणात्मकस्य त्रयोदशस्याध्यायस्य च निरुक्तत्व मभ्युपगम्यापि वचनतो द्वादशाध्यायी एव निपुक्तग्रन्थ इति चाभिचख्यौ । तथाहि ऋक्संहिताभाष्यभूमिकायाम्— "तदृग्व्याख्यानञ्च समाम्नायः समाम्नात इत्यारभ्य तस्मात्तस्मात्ताङ्ग्राव्य मनुभवत्यनुभवतीत्यन्तैर्द्वादशभिरध्यायैर्यास्को निर्ममे"–इति । 'तस्मात्तस्मात्ताङ्ग्राव्य मनुभवत्यनुभवति'–इति तु त्रयोदशाध्यायान्ते एव विद्यते ; न तु द्वादशाध्यायान्ते । तथा चैतन्मतेऽपि त्रयोदशाध्यायस्यातिस्वल्पग्रन्थत्वात् द्वादशाध्यायशेषत्वेनैव ग्रहणं व्यज्यते । किञ्चैतादृशनिरुक्तनिर्देशकथनादेतस्यापि नये ऊर्ध्वमार्गगतिप्रकरणात्मकस्य चतुर्दशस्याध्यायस्य सत्तापि न लक्ष्यते ; पर माश्चर्य मेतत् "द्वा सुपर्णा (ऋ० स० २. ३. १७. ५.)"–इति मन्त्रस्य व्याख्यानावसरे प्रमाणत्वेनोपन्यस्त मेव तच्चतुर्दशाध्यायीय मपि निर्वचनं निरुक्त मिति । तथाहि – "अत्र 'द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ'–इत्यादि (निरु० १४ अ० ३० ख०) निरुक्ते गत मस्य मन्त्रस्य व्याख्यान मनुसन्धेयम्"–इति । तदत्र तत्त्व मुन्नेयं धीभद्भिरेव पूर्वापरदर्शिभिरिति ।

अस्मन्मते तु "समाम्नायः समाम्नातः"–इत्यादिः , "य ऋतुः कालो जायानाम्"–इत्यन्तो द्वादशाध्यायी-ग्रन्थ एव यास्कीयः ;

ततोऽधीयमाने अतिस्तुतिप्रकरणोर्ध्वमार्गगतिप्रकरणे तु न यास्कीये; समाम्नातानां हि निघण्टुपदानां व्याख्यानानि, तत्प्रसङ्गतो विशेषवक्तव्यानि च द्वादशाध्यायात्मकेनैव ग्रन्थेन दत्तानीति सिद्धेऽप्युद्देश्ये कथ मन्यत्र यास्कस्य प्रवृत्तिरेवोदियादिति । अत एव सायण-दुर्गाचार्य-देवराजेत्येतेषु विद्वत्सु प्राचीनतमेन देवराजेन तयोः सत्तापि न द्योतिता; ततश्च देवराजकाले न स्त एव ते इमे प्रकरणे; स्त एवेति चेन्न निरुक्तत्वेन प्रसिद्धे इति सुव्यक्त मेव । ततो दुर्गाचार्यसमये ऽपि ऊर्ध्वमार्गगतेर्दशा तु तथैव, पर मतिस्तुतेर्निरुक्तत्वे तु संशय एवासीत्तदानीन्तनानाम् । अत एव ग्रन्थारम्भकाले अनाकाङ्क्ष मतिस्तुतिप्रकरण मिति मत्वा तस्य निरुक्तत्वपरिहारं मनसि कृत्वैवोक्तं द्वादशाध्यायीत्वं निरुक्तस्य; पश्चाद् ग्रन्थावसानकाले तुष्यतुर्जन इति न्यायेन बहुपुस्तकस्थत्वादेव तस्याप्यादरः कृतोऽपि चिरप्रसिद्धो निरुक्तो द्वादशाध्यायात्मक एवेति संस्मृत्य पुनः सङ्कोचभावेनोक्तं सपादद्वादशाध्यायीति । सायणाचार्यस्तु ततोऽप्यर्वाचीन इति निःसङ्कोचेनैवाभिचक्ष्महे तस्यास्तस्यास्ताक्ष्याद्य मित्यादि, परं चिरप्रवादानुगतं निरुक्तस्य द्वादशाध्यायीत्वञ्च नोपेक्षितम् । तथा च तस्याप्याचार्यस्य दृष्टिपथदुरुक्तं सपादद्वादशाध्यायीत्व मेव सम्मत मपि प्रवादविरोधभिया तत्र मौनावलम्बन मेव चातुर्यं प्रतीयते स्फुटम् । ऊर्ध्वमार्गगतिप्रकरणं तु तदापि निरुक्ते न प्रवेश मलभत; सति हि प्रवेशे ऽवश्य मेव तत्रापि सायणेन गृहीतं भवेदिति । यच्चावलोक्यते "इमा सुपर्णा (ऋ० सं० २. ३. १७. ५.)"-इत्यस्य भाष्ये "अत्र द्वौ द्वौ ०—० निरुक्ते गतम्"-इत्यादि, न तत् सायणीयवचनं मन्यामहे, अपि तु टीप्पनीटीपित माधुनिक मेव तत् कालालेखकानवधानात्

तदन्तर्भूत मित्यत्र सन्देहाभावः । अन्यथा सायणाचार्यस्यौन्मत्तता प्रसज्येतेति सुधीभिरेवाकलय्यम् ।

तदेवं निष्पन्न मेतत् ,— साम्प्रतं निरुक्तस्य चतुर्दशाध्याय इति प्रसिद्धम् जर्ङ्मार्गगतिप्रकरण मनतिप्राचीनैरेव कैश्चित् निरुक्ताङ्गीभूतं ज्ञातम् ; सायणाचार्यसमयेऽपि न तस्य निरुक्तत्वं निरुक्तपरिशिष्टत्वं वा स्थित मिति ; किञ्च यदेतर्हि निरुक्तस्य त्रयोदशाध्याय इति प्रसिद्धम् , तदतिस्तुतिप्रकरणं तु सायणकालात् पूर्व मेव निरुक्तान्तर्गतीभूतम् ; तत्पूर्वजस्य दुर्गाचार्यस्य कालेऽप्येतद्विषये तादृशाना मपि धीमतां धियः सन्देहदोलायां दोदुल्यमाना एव स्थिताः ,— किमिदं निरुक्तं न वेति । तत्पूर्वकाले ते त्रयोनिरुक्तत्वशङ्कापि नासीदेव । अत एव यास्कीयैतन्निरुक्ताद्दुपरजेऽपि महाभाष्ये व्याकरणाध्ययनप्रयोजनान्वाख्यानावसरे चत्वारि शृङ्गाः (ऋ० मं० ३. ८. १०. ३.)'–इति मन्त्रस्य निरुक्त-त्रयोदशाध्यायसम्मतं व्याख्यानं न दृश्यते , दृश्यतेऽपि तु व्याख्यानान्तर मेव तत्प्रकरणानुगतम् । तथाहि— "चत्वारि शृङ्गाणि , चत्वारि पदजातानि ; नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः , त्रयः कालाः ; भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे , द्वौ शब्दात्मानौ ; नित्यः कार्यश्च । सप्त हस्तासो अस्य , सप्त विभक्तयः । त्रिधा बद्धः , त्रिषु स्थानेषु-बद्धः ; उरसि कण्ठे शिरसीति । वृषभः , वर्षणात् । रोरवीति , शब्दं करोति ; कुत एतत् ? रौतिः शब्दकर्मा । महो देवो मर्त्यान् आविवेश इति , महान् देवः शब्दः , मर्त्या मरणधर्माणो मनुष्याः ; तान् आविवेश ! महता देवेन साम्यं यथा स्यादित्यध्येयं व्याकरणम्"–इति । नैरुक्त मिति व्याख्यानस्त्वेवं (१३. १. ७.) द्रष्टव्यम् ,— "चत्वारि शृङ्गेति वेदा वा एत

उक्तास्त्रयो अस्य पादा इति सवनानि त्रीणि हे शीर्षे प्रायणीयोदयनीये सप्त हस्तास: सप्त च्छन्दांसि विधा बद्धस्त्रेधा बद्धो मर्त्य ब्राह्मणकल्पैर्वृषभो रोरवीति रोरवण मस्य सवनक्रमेण ऋग्भिर्यजुर्भि: सामभिर्यदेन मृग्भि: शंसन्ति यजुर्भिर्यजन्ति सामभि: स्तुवन्ति महो देव इत्येष हि महान् देवो यद्यज्ञो मर्त्या आविवेशेत्येष हि मनुष्यानाविशति यजनाय"-इति। यदि हि नामैतस्यातिस्तुतिप्रकरणस्यापि निरुक्तत्वं भगवत: पतञ्जलेरभिमतं स्यात्तर्ह्येतस्य तु मन्त्रस्य नैरुक्तं व्याख्यान मपहाय व्याख्यानान्तरं कथं प्रतिपिपादयिषितं स्यात्?। किञ्चैव मत्र त्रयोदशेऽध्याये (१३. १. ५.) 'जर्भरी-इत्यस्य 'भर्त्तारौ'-इति, 'तुर्फरीतू'-इत्यस्य 'हन्तारौ'-इति चेतदर्थद्वयं दृष्ट्वापि महाभाष्यकार: कथं ब्रूयात्— "बहवो ऽपि हि शब्दा येषा मर्था न विज्ञायन्ते 'जर्भरी'-'तूर्फरीतू' (२अ० २पा० १आ०)"-इति? अत: स्पष्ट मेवाभिगम्यते— नाय मध्यायो भगवत्पतञ्जलिना दृष्ट इति। सिद्ध मित्थं द्वादशाना मेवाध्यानां यास्कीयनिरुक्तत्वम्, तस्यैव परिशिष्टरूपयोर्द्वयोस्तु महाभाष्यतोऽप्यर्वाचीनत्व मिति शम्॥

---

(७)

अथेदानी मिद मपीह विचार्य मस्ति;— क: कालोऽस्य यास्कस्य? कस्मिन्नु समये अय मिमां भुव मलञ्चकारेति विवेचयाम इति यावत्।

अहो वत! सम्प्रति हि दोषशून्य: सर्वावयवशो विश्वासयोग्यो

नैकोऽप्यत्रादेतिहासिकग्रन्थो दृश्यते, पुराप्यासीदवेति च को वदेत् ?

सत्य मेवैतत्, वेदानां मन्त्रभागेष्वपि क्वचित्-क्वचिदितिहासाश्च लक्ष्यन्ते ; तथा चोक्तं भगवता यास्केन— "त्रितं कूपेऽवहित मेतत् सूक्तं प्रतिबभौ ; तत्र ब्रह्म,— इतिहासमिश्रम्, ऋङ्मिश्रम्, गाथामिश्रं भवति (४. १. ६.)"–इत्यादि। परं प्रायस्तोऽपि प्रायश उपमामूलका रूपकवर्णनात्मका एव। अत एव अतिष्ठन्तीना मिति मन्त्रं व्याख्यन्निन्द्रशत्रुपदनिर्वचनावसरे व्यक्त माह यास्कः— "इन्द्रशत्रुः ; इन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुः। तत्को ह्यत्रः ?— मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः *। अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति (२. ५. २.)"–इत्यादि।

अथापि यदिदं श्रूयते— "प्रजापतिरात्मनो वपा मुदक्खिदत् (तै० सं० २. १. १.)"–इत्यादि। अत्रापि रूपकार्था एव कृता मीमांसाभाष्यकृच्छ्वरस्वाम्यादिभिः। तथाहि— "कथं पुनरनुत्खिन्नायां वपायां 'प्रजापतिरात्मनो वपा मुदक्खिदत्'–इत्याह ? उच्यते,—असद्दृत्तान्तान्वाख्यानम् ; स्तुत्यर्थेन प्रशंसाया गम्यमानत्वात्। इहान्वाख्याने वर्त्तमाने इयं निष्पद्यते,— यच्च ह्यत्तान्तज्ञानम्, यच्च कस्मिंश्चित् प्ररोचना द्वेषो वा। तत्र ह्यत्तान्तान्वाख्यानं न प्रवर्त्तकं चेति प्रयोजनाभावादनर्थक मित्यविवक्षितम् ; प्ररोचनया तु प्रवर्त्तते, द्वेषान्निवर्त्तते इति तयोपिवक्षा। ह्यत्तान्तान्वाख्यानेऽपि विधीयमाने आदिमत्ता दोषो वेदस्य प्रसज्येत। कथम्पुनरिदं निरालम्बन मन्वाख्यायते ? इति, उच्यते— नित्यः

* महाभारते व० प० १००, १०१ अ० ; शा० मो० प० २७८–२८२ अ०।

कश्चिदर्थः प्रजापतिः स्यात् ,— वायुः , आकाशः , आदित्यो वा । 'स आत्मनो वपा मुदक्खिदत् (तै० सं० २. १. १.)'–इति दृष्टिम् , वायुम् , रश्मिं वा । 'ता मन्नी प्राग्दक्षात् (तै० स० २. १. १.)' –इति वैद्युते, आर्चिषे, लौकिके वा । 'ततो अजः (तै० सं० २. १. १.)'–इति अन्नम् , बीजम् , विरुत् वा । 'त मालभ्य (त मुपयुज्य) प्रजाः पशूनाप्नोति (तै० स० २. १. १.)"–इति गौणाः शब्दाः (मै० भा० १. २. १.)'–इति । तथा चैवमादिभ्यो मन्त्रभागीयेतिहासेभ्यः कथङ्कार माप्रयामेतिहासिकं तथ्यम् ।

ब्राह्मणभागेषु च बहव एवेतिहासा उपलभ्यन्त इत्यपि सत्य मेव । तथा चैतरेयके— "प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत सूर्यां सावित्रीम् (४. २. १.)"–इत्यादयः । पर मेव-मादिषु प्रायोऽधिदैवतार्थाख्यं वैज्ञानिकं तत्त्व मेवावगम्यते ; तथैव नैरुक्तादिशासनात् । तथाच— "सूर्या , सूर्यस्य पत्नी ; एषैवाभि-सृष्टकालतमा"–इत्यादि नैरुक्तं (१२. १. ७.) द्रष्टव्यम् । "एषैव उषाः , अभिसृष्टकालतमा यथा यथा सूर्यस्योदयकालं प्रत्यभि-सृष्टतमा भवति , गततमा भवति , तथा तथा सैषा उषाः सूर्या सम्पद्यते"–इति तत्र दौर्गी वृत्तिः" । "सविता सूर्यां प्रायच्छत् सोमाय राज्ञे , प्रजापतये वेति च ब्राह्मणम्"–इत्यस्य नैरुक्तवच-नस्य (१२. १. ८.) व्याख्यानायचोक्तं दुर्गाचार्येण— "ज्योत्स्नां सोमाय ददाति ; यद्वृत्तम्— 'आदित्यतोऽस्य दीप्तिर्भवति (निरु० २. २. ३-)' इति"–इति ।

एव मपि मन्त्रब्राह्मणयोर्नास्त्येवेति ह्यासिकं तथ्य मिति च वक्तुं न शक्नुमः, न चास्माकं तथाभिप्रायः ; पर मीदृशगूढतत्त्वागाधसलिला-दभिमतैतिहासिकतथ्यरत्नोद्धारस्वल्पाक मतिदुष्कर एवेत्येव ब्रूमः ।

पुराणादिष्वपीतिहासा विद्यन्त एवेति च सत्यम् ; तेषां प्राचीनेतिहासवर्णनपूर्वकधर्मोपदेशार्थत्वेनोक्तेः । परं तेष्वपि रोचनार्थान्येव बहूनि उपाख्यानानि रूपकात्मकेभ्यो वेदशब्देभ्य एव सङ्क्षेपेतिहासितानि गम्यन्ते ; अत एव तत्तच्छास्त्रं वेदार्थोपबृंहणमित्याख्यायते (महा० भा० १. १. १६४.) । तद्यथा – इन्द्रस्याहल्याहरणोपाख्यानं बहुष्वेव काव्येतिहासपुराणेषु समासतो व्यासतो वा वर्णितं विद्यते , "उदीरय पितरा जार आ भगम् (ऋ० सं० ७. ६. १०. १.)"–इति मन्त्रे श्रुतं जारपदमेव तादृशसर्वप्रसिद्धस्य अहल्योपाख्यानस्य मूलम् ; न च तस्य मूलान्तरमस्ति तस्य च जारशब्दस्य प्रकृतोऽर्थः खल्वेवं भाषितो यास्केन— "अथाप्युपमार्थे दृश्यते— 'जार आ भगम्' जार इव भगम् । आदित्योऽत्र जार उच्यते ; रात्रेर्जरयिता स एव (३. ३. ४.)"–इति । एवञ्चैवं गम्यते— 'जार आ भगम्'–इत्येतावदेवालम्ब्येव प्रथमं तावत् ब्राह्मणग्रन्थीय माख्यान माख्यातम् ;— "अयत्याये जार कौशिक ब्राह्मण गौतम ब्रुवाण (तै० आ० १. १२. ४.)"–इति , "अहल्यायै जारेति (श० ब्रा० ३. ३. ४. १८.)"–इति च । ततस्तदेव मूलीकृत्यातिबृंहितं वाल्मीकीयरामायणे बालकाण्डेऽष्टाचत्वारिंशोनपञ्चाशत्तमयोः सर्गयोः ; तदेव चोपसङ्क्रान्तं क्रमान्महाभारतादिष्वपीतिहासपुराणेषु । अपि भट्टकुमारिलस्वामिना श्लोकेन ब्राह्मणग्रन्थीयेतिहासस्य प्रदर्शितनैरुक्तानुगत मेव व्याख्यानं स्पष्ट मभिहितं मीमांसाभाष्यवार्त्तिके । तथाहि— "समस्ततेजाः परमेश्वरत्वनिमित्तेन्द्रशब्दवाच्याः । सवितैवाहनि लीयमानतया रात्रेरहल्याशब्दवाच्यायाः स्वयाभकजरणहेतुत्वात् जीर्य्यत्यस्मादनेन वेदितेन वेत्य-

इत्याजार इत्युच्यते ; न परस्त्रीव्यभिचारात् (९. १. ४१.)"-इति । मीमांसायाः सूत्रभाष्यवार्त्तिकन्यायमालादिषु सर्वत्रैव, सूत्रब्रह्मव्याख्याननिगदे, हरिवच्छब्दस्यानूहाधिकरणे चान्यान्यप्युदाहृतान्यवगन्तव्यानि (९. १. १५. अधि०) ।

एवं बहुष्वेव पुराणादिषु "उषो न जारः (ऋ० सं० १. ६९. ४ ; ९ ; ७. १०. १.)"-इत्येतन्मन्त्रमूलकं प्रजापतेः स्वकन्यानुगमनाख्यानञ्चातिनिंदितं गम्यते ; वस्तुतस्तदपि रूपकत्वेनैव व्याख्यातं ब्राह्मणे । तथाहि— "प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत् ; दिवमित्यन्य आहुरुषसमित्यन्ये (ऐ० ब्रा० ३. ३. ९.)"-इत्यादि । तत्रैव मीमांसावार्त्तिके अस्याप्यौपचारिकमेव व्याख्यानं कृतं दृश्यते । तथाहि— "प्रजापतिस्तावत् प्रजापालनाधिकारादादित्य एवोच्यते । स चारुणोदयवेलाया मुषसं मुद्यन्नभ्येति । सा तदागमनादेवोपजायत इति तद्दुहितृत्वेन व्यपदिश्यते । तस्याश्चारुणकिरणाख्यबीजनिक्षेपात् स्त्रीपुरुषसंयोगवदुपचारः"-इति । तदेव मन्वादितिहासपुराणादिवचनेभ्योऽपि ऐतिहासिकं तथ्यं कथमुपलभेम ? उपलब्धेष्वपि कथं न सन्देहो दुर्वार एव ?

किं मधिकेन यदि हि नाम यौधिष्ठिराब्दः प्रचलितो न स्यात्, यौधिष्ठिरीयस्तम्भादिकं च न दृश्येत, तर्हि को नाम महाभारतवचनादेव विश्वस्यादासीत् पुरा युधिष्ठिरो नाम नृपतिरित्यपि ? तत्र यौधिष्ठिरीयेतिहासेऽपि अर्जुनस्य स्वर्गीयेन्द्रसभायां गमनादीनि (व० प० ३७—५१ अ०) बहून्येव कविकल्पितानि सन्तीति धीमत्समाजेषु प्रसिद्धान्येव । भारतीयेतिहासग्रन्थेषु हि महाभारत मेव सर्वप्रधानम् ; अत एवोक्तं तत्रैवादिपर्वणि— "महत्त्वात् भारवत्त्वाच्च महाभारत मुच्यते (१. १. २७०.)"-इति ।

साङ्गभारतेतिहासस्य च ब्रह्मणकल्पनातिरञ्जनादिदोषदुष्टत्वात् ऐतिहासिकतथ्यान्वेषिणा मप्रीतिकरत्वं चेत्, पुराणोपपुराणादीनान्तु कथा दूरपराहता एव।

एवं षड्गुरुशिष्यादयोऽपि टीकाकारा ऐतिहासिकांशेऽलीकवक्तार एव ; तेषां हि ग्रन्थकर्तृनामविभ्रमहेतुकं पौर्वापर्यज्ञानविरहत्वं व्यज्यत एव सर्वत्र। तथाच ऋग्वेदसर्वानुक्रमणीवृत्ती—"शुनकाच्छौनकोऽभवत्। एतत्सूक्तायुतं पश्यत् द्वितीयं मण्डलं पुनः। ०—०। यस्मै व्याचष्टे ०—० उग्रश्रवा व्यासशिष्यः ०—० महाभारत माख्यानं हरिवंशकथान्वितम्"—इति। इह हि सूक्तद्रष्टृत्व-मण्डलद्रष्टृत्व-व्यासशिष्योक्तभारत-तत्परिशिष्टश्रोतृत्वाना मैकाधिकरण्यं प्रदर्शितम्। पुनरित उत्तर मस्यैव शौनकस्यापरदशग्रन्थकर्तृत्व मप्युल्लिखितम्। तदेतत्सर्वं षड्गुरुशिष्यकथन मस्मान् श्रवणशूल मिव व्यथयति। कथं हि सम्भाव्यते,— प्रदर्शिताश्वलायनीयगृह्ये ऋषिनामसु गार्त्समद इति गृहीतनाम्नो मण्डलद्रष्टुः अतिवृद्धस्यानिर्दिष्टकालिकस्य शौनकस्य, आचार्यनामसु शौनक इति गृहीतनाम्नः शाखाप्रवक्तुः प्राग्युगीयस्य च शौनकस्य, अद्ययुगीयव्यासशिष्योक्तभारतश्रवणम् ? अनतिप्राचीनहरिवंशकथाश्रवणं च ?—इति सुधीभिरेवैतदाकल्प्यताम्। वस्तुतस्त्वैतिहासिकांशे षड्गुरुशिष्योक्तानि खलु उन्मत्तप्रलपितानीवेत्यत्र नास्त्येव संशयः ; तद्विशदयिष्यामश्चोपरिष्टादिहैव। तत्कथ मेताद्दशोऽपि ग्रन्थः प्रामाण्यपद मारोहेदैतिहासिकतथ्यनिर्णयायेति।

अस्त्येवैको ग्रन्थो राजतरङ्गिणी नामेतिहासेषु प्रसिद्धः, भारतैतिहासिकतत्त्वजिज्ञासूनां किञ्चित् प्रोत्पदयेति सत्यम्! परं ततश्च खलु आदिगोनर्दप्रभृतीनां काश्मीरेन्द्राणा मेव वंशावलिः

ज्ञायते, न त्वन्यत् किं मपि विशेषतः । देशावङ्गादिनामेतिहास-ग्रन्थास्तु आधुनिका अपि समया विद्यन्ते चैकोऽप्युपलभ्यते, तदत्र मिह तत्कथयेति। गुणाढ्यकृतं भूतभाषाख्य-बृहत्कथापुस्तकन्तु सप्तलक्षश्लोकात्मक मित्येव श्रुतम्, न च दृष्ट मद्यापि, तदलं तददृष्टकथाव्दोलनेनापीति ।

अनन्तपत्नाः सूर्यवत्यास्चित्तविनोदनाय सोमदेवभट्टेन सम्या-दितः कथासरित्सागरस्तु स्त्रीजातिचित्तविनोदायैवालम्, न त्वैति-हासिकतथ्यानुसन्धित्सूनां तोषाय; वर मद्यो तदुपन्यासपाठादैति-हासिकानां विमलबुद्धेरपि बालचया एव समुत्पद्यन्ते। वस्तुतः तद्ग्रन्थपर्यालोचनयेद मेव प्रतीयते सोमदेवस्य तस्य यथाकथ मपि अनन्तपत्नी-चित्तविनोदन मेव उद्देश्य मासीत्; न त्वैति-हासिकतथ्यप्रदर्शन मिति; सति हि तत्र पाणिनितो न्यूनाधिक-सहस्राब्दीपरजस्यापि कात्यायनस्य पाणिनिसतीर्थत्वं वक्तुं नोत्सा-हेत; को हि नामैतिहासिको बृहत्वादिहेतुजवाद्यंशहीनः प्रज्ञा-तिस्रोऽपि व्याकरणसूत्रकार-पाणिनेः कालान्तरबीजमूलक-भाषा-व्यवहारान्तरगतपदसंस्कारक-कात्यायनस्य च समकालिकत्वं मन्येत। अस्माकन्तु त्वीदृशासत्यैतिहासिकज्ञानविकाशसहायस्योपन्यासग्रन्थस्य दूतिहासत्वेन ग्रहण मेव नोचितम्। एवं मपि यः किल तारा-नाथतर्कवाचस्पतिर्बहून्वेषणसमर्थोऽपि हन्त स्वश्रमकातरतयानाया-सलभ्य मेतत्कथन मेव विख्यापयेतदेव च भित्तीकृत्य सरलापूर्व-पीठिकायां किञ्चिदलेखीत्, तादृशाविवादिसाधवे तु वयं बहु-दूरत एव स्थितं नमस्कुर्मः ।

तदेव मस्माभिरैतिहासिकतथ्याविष्कारणाय बहुकालतो बहु-श्रमतश्च बहूनां ग्रन्थानां परिदर्शनम्, मधुलिड्विव यथालब्ध मैति-

ऐतिह्यमध्याहरणम्, ऐतिह्याद्यवलम्बनश्चेत्येतानि प्रयोजनीयानि। तथा ह्यत्वा आविष्कृति च तथ्ये न हि सर्वावयवशो विश्वस्यात्; अपि तु कदाचित् खण्डनीय मपीदं भवेदिति चाशङ्कैव। एतादृशे च दुष्करे प्रवृत्ता वय मवश्य मेव कृतकृत्याः स्यामित्यपि दुराशैव; परं प्रवृत्तास्येत् कथं निर्व्रीड़ाः प्रतिनिवृत्ता भवेम इत्यालोचयैवेह यथाज्ञानं किञ्चिद् वदामस्तत्र—

"यद्यन्धैर्बन्धेन हृष्यं तत्र सञ्चरतां हि नः।
पदे पदे प्रस्खलतां सन्तः सन्त्ववलम्बनम्"

किञ्च, हैमसङ्घातगा ये तु नोपहास्याः स्खलत्स्वपि।
अनन्यगतिकानां हि स्खलनं नोपहस्यते॥

अथ प्रदर्शितेषु अद्यप्रचलितमहाभारतश्लोकेषु निरुक्तकर्तृत्वेन यास्कनाम्नः स्मरणात् तन्महाभारतकारात् प्राचीनोऽयं यास्क इति त्वविचारित मपि वाच्य मेव। स च महाभारताख्य इतिहास-ग्रन्थः पाणिनिभाष्यकारात् पतञ्जलिमुनेः परभवः स्यात्; पत-ञ्जलिना हि उदाहृतेष्वपि भारतीयप्रसङ्गेषु अद्यप्रचलितेतन्महा-भारतीयवचनान्युद्धृतानि नैव गम्यन्ते, प्रत्युतान्यथैव। तद्यथा— "धर्मेण स्म कुरवो युद्धान्ते (३अ० २पा० २आ०)"-इति। नास्ये-तद्वचन मेतन्महाभारते;, अतः सम्भाव्यते पतञ्जलिसमये नासी-देतन्महाभारत मपि त्वासीदेतन्मूलरूपो युधिष्ठिरादीतिहासाश्रयः काव्यनामपरो महाभारतग्रन्थ इति। किञ्चेह ह्युदाहृत मेतत्— "हृद्यकुमारीवाक्यवदिदं द्रष्टव्यम्। तद्यथा। हृद्यकुमारीन्द्रोक्षा वरं वृणीष्वेति। सा वर मवृणीत। 'पुत्रा मे मधुचीरवृत मोदनं कांस्यपात्र्यां भुञ्जीरन्!'-इति। न च तावदस्याः पति-र्भवति; कुतः पुत्राः? कुतो गावः? कुतो धान्यम्? तत्रानया

एकेन वाक्येन पतिः पुत्रा गावः धान्य मिति सर्वं संगृहीतं भवति (८अ० २पा० १आ०)"-इति। एतद्दृढकुमार्याख्यानन्तु नैवं विद्यते ऽद्यप्रचलितेऽत्र महाभारते (शा० प० ५२ अ०)। इतोऽपि बुद्धयतेऽद्यप्रचलितमहाभारतकारात् पूर्वज एवायं महाभाष्यकारः पतञ्जलिरिति।

निरुक्तकारोऽयं यास्कः खलु पाणिनिव्याकरण-महाभाष्यकारस्य भगवतः पतञ्जलेरप्यतिपूर्वजः। पश्यतु तावत्— निरुक्तेऽत्र अर्थज्ञप्रशंसाप्रकरणे योदृता कक् उत त्वः पश्यन्निति, महाभाष्येऽप्यर्थज्ञप्रशंसने सैव प्रदर्शिता; निरुक्तकारकृता अर्था एव तत्र यथावदूदृता च (निरु० १. ६. ३.; म० भा० १अ० १पा० १आ०)। किञ्च यत् पठ्यतेऽत्र निरुक्ते "शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते; ०—० विकार मन्यार्येषु भाषन्ते शव इति। दात्रिर्लवणार्थेषु प्राच्येषु; दात्र मुदीच्येषु"-इत्येव (२. १. ४.)। पातञ्जले तु एतदेवोदृत्य किञ्चित् विस्तृतम्— "शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति; विकार एन मार्या भाषन्ते शव इति। हन्मतिः सुराष्ट्रेषु; रंहतिः प्राच्यमगधेषु; गमि मेव त्वार्याः प्रयुञ्जते। दात्रिर्लवणार्थे प्राच्येषु; दात्र मुदीच्येषु (१अ० १पा० १आ०)"-इति। अपरञ्च— "तितउ परिपवनं भवति; ततवद्वा, तुन्नवद्वा, तिलमात्रतुच मिति वा (४. २. १.)"-इति नैरुक्तम्। तदेव तिलमात्रेति परिहायेह पातञ्जले सक्तु मिव तितउनेति मन्त्रव्याख्याने प्रमाणत्वेनोपन्यस्तं गम्यते (१अ० १पा० १आ०)। अपि च तत्रैव सक्तुपदनिर्वचनं सचतेरित्यादि; धीरा इत्यस्य, मनसेत्यस्य, अक्रत इत्यस्य च प्रतिवचनानि ध्यानवन्तः, प्रज्ञानेन, अक्लृपत इत्यपि

निरुक्तात एव लक्ष्यानि (निरु० ४. २. २.)। अपर मपि— "हंसा हन्तेर्नखध्वानम् (४. २. ५.)"–इति नैरुक्तम्। एत-न्नैरुक्तनिर्वचनबलादेवाह पतञ्जलिः— "कः पुनराह हन्मतेर्हंस इति। किंतर्हि ? हन्तेर्हंसः ; हन्तेर्ध्वान मिति (६अ० १पा० २ आ०)"–इति। व्याख्यातव्यत्वेन प्रसिद्धग्रन्थनामप्रदर्शनाय स्वकण्ठरवेण च भाष्यकारेण निरुक्तनामग्रहणं कृतम्। तथाहि— "शब्दग्रन्थेषु चैषा प्रसततरा गतिर्भवति निरुक्तं व्याख्यायते इति (४अ० १पा० १आ०)"–इति।

नन्वत्र निरुक्त मिति शाकपूण्याद्यन्यतमकृतो ग्रन्थो यास्कः स्यादिति चेत्र ; शाकपूण्याद्यन्यतमकृतो ग्रन्थः खलु महाभाष्यकाले-ऽपि स्थित इत्यत्र हि न किञ्चिन्मानं पश्यामः ; प्रत्युत लुप्तेष्वेव नाट्यग्रन्थेषु नूतनस्यैतस्य निरुक्तस्य प्रचारसम्भवः ; प्रचरितं चैतस्मिन् , महाभारते यास्कस्यैव निरुक्तकर्तृत्वेन ग्रहणं सङ्गच्छते। न च महाभाष्य-महाभारतयोः एवं कालान्तरालसम्भवः , यत्र शाकपूण्याद्यन्यतमकृतं निरुक्तं लुप्तम् समुत्पन्नञ्च सुप्रचलित मिद मिति।

केचिदत्राहुः— यास्कीयैतन्निरुक्ते "स्याल आसव: संयोगी-नेति नैदानाः"–इत्यत्र , "ऋचा समं मेन इति नैदानाः"–इत्यत्र च (६. २. ६ ; ७. ३. ६.) दर्शनात् ज्ञायते सामवेदीयस्य निदानसूत्रस्य यास्कतोऽपि प्राचीनत्वं निरुक्तुल्यत्वञ्चेति। अपि च सामवेदीये बौधायनीयकल्पपद्धतावपि बहुत्र निदाननामश्रव-णात् ततोऽपि प्राचीनत्वं तस्यावगम्यते। तथाहि— "निदान-कारस्य हाविंशत्यक्षरप्रभृतयश्चतुरुत्तराक्षयः सप्तवर्गाः ०—० पर-मेष्ठ्यक्षरस्येति पठ्यन्ते"–इति। किञ्च तत्रैव किञ्चिदुत्तरम्—

"उक्तं हि निदाने ज्योतिष्टोमं षोडशिनं चाधिकृत्य 'संख्या मन्त्रेषां विद्यमानानां मन्त्रे'-इति"-इति च (१५०)। एवं मन्त्रत्वापि तत्र बहुत्र सर्ववेदाङ्गविषयेष्वेव निदाननामोपलभ्यते। तत्तत्रातिप्राचीनेऽपि निदानसूत्रे देवतनिर्णयविषयेऽपि शाकपूणिनामोल्लेखो विद्यते, परं न तु तत्रापि निरुक्त मित्युक्त्या। तद्यथा—"ऐन्द्राः प्राजापत्याः सार्पराज्ञाश्वान्द्रमस्य सौर्य इति शाकपूणिः (४. ८.)"-इति। शाकपूणेर्दैवतप्रत्यक्षकारितां चाह यास्कोऽपि। तथाहि—"शाकपूणिः समाम्नायाच्चक्रे सर्वा देवता जानामीति। तस्मै देवोभयलिङ्गा प्रादुर्बभूव। तां न जगृहे। तां पप्रच्छ विविदिषाणि त्वेति। साऽब्रवीदेता मच्च मादिदेविषा महेवतेति (२. २. ४.)"-इति। तदेतत् सर्वं समालोच्यैव मेव प्रतीतं भवति,— शाकपूणिः खलु यास्काच्चाचार्यात् बहुपूर्वजो ब्राह्मणकाले स्थितोऽनुब्राह्मणविशेषस्य कर्त्तासीत्; तत्रानुब्राह्मणे एव मन्त्रार्थपदनिर्वचनानि देवतनत्त्वादीनि चोपदिष्टानि। अत एव निदानसूत्रे क्वचिदनुब्राह्मणग्रन्थनामोल्लेखतया क्वचिच्च शाकपूणिनामोल्लेखतया च प्रमाणं प्रदर्शितम्। तदीयः शाकपूणिनामोल्लेखस्तु दर्शितः, अनुब्राह्मणनामोल्लेखोऽप्यत्र प्रदर्श्यते। तद्यथा—"किं स्तोमाः? अनुब्राह्मणं, स्युरित्येकविंशस्तोमाः" -इत्यादि (८. ३.)। तदेवं प्रदर्शितं महाभाष्यवचनं शाकपूणिकृत प्राचीननिरुक्तपर मेव किं न गृह्यत इति। अत्र ब्रूमः,— शाकपूणेर्निर्वचनापरपर्यायनिरुक्तकर्तृत्वेऽपि न पुनर्निरुक्तेष्वेवप्रसिद्धग्रन्थविशेषकर्तृत्व मिति व्याख्यातत्वेन प्रसिद्धग्रन्थनामप्रदर्शनाय यदुक्तं महाभाष्यकृता निरुक्तं व्याख्यायत इति तन्नूनं यास्कीय मिदं निरुक्त मभिलक्ष्येति।

किञ्च दृष्टं वर मदृष्टत इति न्यायात् किं मदृष्टनिरुक्तकल्पनयेत्यतोऽस्यैवेह भाष्ये ग्रहणं न्यायः। अपि च भाष्येऽत्र शाकपूणिकृतस्यैव निरुक्तस्य ग्रहणं मिष्टं मित्यत्र नास्ति किञ्चिदपि विनिगमकं मतो यास्कीयनिरुक्तस्यापि बोधेन कथं न भवितव्य मिति। वस्तुतस्तु अद्यप्रचलिता या मनुसंहिता, एतस्या अपि प्राचीन मिदं निरुक्तम्; पातञ्जलं महाभाष्यं तु एतन्मनुतः परावीन मिति ध्रुवम्। सत्येव मस्य निरुक्तस्य पातञ्जलादप्यात् अतिप्राचीनत्वे कोऽस्ति शङ्कावसरः।

पश्यतु तावत् पातञ्जले खलु महाभाष्ये— "पूर्ववयसः अप्रत्युत्थाने दोष उक्तः, प्रत्युत्थाने च गुणः। कथम्? 'जीर्यं' प्राणा उत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते'-इति। स च पूर्ववयोमात्रे प्रसक्तः, अतोऽत्राप्यवयवेन शास्त्रार्थः सम्प्रतीयते (६अ० ५पा० ४आ०)"-इति। तदत्रोद्धृत मूर्यं प्राणा इति वचनं तु साम्प्रतं मनुसंहितेति प्रसिद्धाया भृगुसंहिताया द्वितीयेऽध्याये (१२० श्लो०) दृश्यत एव। एतावतैव पातञ्जलस्यास्य महाभाष्यस्यैतन्मनुपरजत्वं सुव्यक्तम्।

निरुक्तस्यास्य त्वेतन्मनोश्च पूर्वजत्व मेवानुमीयते। तथाहि उक्तानि श्लोकनिरुक्ते— "पुमान् दायादो अदायादा स्त्री"-इति, "स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः"-इति, "अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणि"-इति, "गर्त्तारोहिणीव धनलाभाय"-इति, "नाभ्रात्री सुपयच्छेत"-इति, च (३. १. ४ ५, ६.)। एष्वेकत्राप्यद्यप्रचलितमनुसंहिताया नामोल्लेखोऽपि न कृतः; सति ह्यस्या: संहिताया निरुक्तपूर्वजत्वेऽवश्य मेवैतन्नामकीर्त्तनादिक मिह स्यूयेतैव। किञ्चायतनीय-मनु-

संहितायान्तु पञ्चैव महापातका निर्दिष्टा दृश्यन्ते। तथाहि—"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह (११अ० ५४श्लो०)"—इति। निरुक्ते तु "सप्त मर्यादाः कवयश्चक्रुः। तासा मेका मप्यधिगच्छन्नर्हस्यान् भवति। स्तेयम्, तल्पारोहणम्, ब्रह्महत्याम्, भ्रूणहत्याम्, सुरापानम्, दुष्कृतस्य कर्मणः पुनः पुनः सेवाम्, पातके नृतोद्यम् इति (६. ५. ४.)"—इति सप्त महापातकानि परिगणितानि पश्यन्ते। तत्र मनुमते भ्रूणहत्याया मुख्यं महापातकत्वं नास्त्येव; नापि त्वातिदेशिकम् (११ अ० ५५—५८ श्लो०); परं विहितस्य तस्य ब्रह्महत्याप्रायश्चित्त मेव (११अ० ८७श्लो०); कुल्लूकमते तु तस्य 'ब्राह्मणगर्भ-विषयम्'। किञ्च कुल्लूकभट्टकृतं तदाख्यानं सङ्कटकारस्य शूलपाणेरपि सम्मत मेव प्रतीयते। तथाहि—"तत्र पुंस्त्वेन ज्ञाते पुंवधप्रायश्चित्तं स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्, अविज्ञाते तु पुंवधप्रायश्चित्त माह मनुः—'हत्वा गर्भ मविज्ञातम् (११. ८७.)"—इत्यादिः प्रायश्चित्तविवेकः। अपि चात्र मनुसंहितायां दुष्कृतकर्मणः पुनः-पुनः सेवने पातककार्यप्रवर्त्तने च महापातकं न स्मर्यते; अपि स्मर्यते च महापातकिसंसर्गकारिणोऽपि महापातकित्वम् (११. ५४.)। तदिदं हि नाम निरुक्तप्रचारात् पूर्वस्मिन्नपि काले स्वस्वेदा संहिता प्रचलिता आसीर्हि ईदृशविरोधपरिहाराय यास्क-स्योद्धाधरैरवश्यं मनागपि स्फुरिते दृश्येते एव।

अपरञ्चैतदस्ति निरुक्ते (१. १. ४.)—"तदेतदृक्श्लोकाभ्यामभ्युक्तम्—

"अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्'—इति।

'अविशेषेण पुत्राणां दायो भवति धर्मतः ।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्"-इति ।

अत्र ऋक्पदेन न तु ऋग्वेदीयमन्त्रो गृह्यते ; नास्त्येव हि तत्र अङ्गादङ्गादिति ; अपि तु ऋग्लक्षण एव मन्त्रः ; ततश्च शतपथीयायाश्चास्या ऋचोऽत्र ग्रहणं मिष्टम् ; अस्ति चैषा ऋक् शतपथब्राह्मणे (१४. ८. ४. २६.)। अपि चेह श्लोकशब्देन यस्य ग्रहणं मिष्टम् 'अविशेषेण'-इत्यादेः , तस्य तु दर्शनं मध्यप्रचलितायां मनुसंहितायां नास्त्येव ; यास्केन तूक्तं स्पष्टमेव 'मनुः स्वायम्भुवोऽब्रवीत्'-इति । सोऽयं कोऽसौ मनुरित्यवश्यं विचार्यम् । विधारितं च तथा , इदमेव प्रतीयते ,— सम्प्रति येयं मनुसंहितेति प्रचलिता, सा नूनं यास्कीयादेतस्मान्निरुक्तात् परं प्रणीता ; अपि त्ववश्य मासीत् पुरातनोऽपरः कश्चन मनुप्रणीतः स्मृतिग्रन्थः सुप्रचलितो यास्ककालेऽपीति । वस्तुतस्त्वियं न मनुप्रणीता ; अपि भृगुप्रणीता भृगुसंहितैवेति च प्रमाणयिष्याम उपरिष्टात् । अन्यत्र— "विद्या ह वै ब्राह्मणमाजगाम"-इति शाखान्तरगतायास्त्वारो ये मन्त्रा निरुक्ते उद्धृताः (२. १. ७.), त एव मन्त्राः किञ्चिन्निवेशपरिहाराभ्यां भाषान्तरीकृता इदानीतनीयायां मनुसंहितेतिप्रसिद्धायां स्मृतिसंहितायां च लक्ष्यन्त इत्यपि सुवचम् (२अ० ११३—११६ श्लो०)। अत एव ऋग्भाष्यभूमिकाया मेव मुक्तं सायणाचार्येण— "विद्याया ग्रहणेऽधिकारिविशेषः शाखान्तरगतैश्चतुर्भिर्मन्त्रैरुपदर्शितः ; तांश्च मन्त्रान् यास्क उदाजहार"-इत्यादि ; न चोक्तं तत्र मनुरुदाजहारेति । किञ्चैतस्याः स्मृतिसंहिताया द्वादशे ऽध्याये ऽवरशोऽप्युक्तं दृश्यते 'नैरुक्तः' -इति ; 'निरुक्तज्ञः'-इति च तद्व्याख्यानं कुल्लूककृतम् (१११श्लो०)।

तदित्थं निरुक्त मिदं पातञ्जलमहाभाष्यतः प्राचीनं न वेति विचारस्तु दूरे आस्ताम् ; ततोऽपि पुरातनात् मनुसंस्थितिप्रथितादथ-प्रचलितसर्वप्रधानस्मृतिसंहिताप्रत्यादपि पूर्वं भगवता यास्केन प्रणीत मिति स्यात् सप्रमाणम् ।

एवञ्चास्य यास्कीयस्य निरुक्तस्य प्रणयनकालनिर्णयाय प्रवृत्तानां ग्रथमं तावत् पातञ्जलस्य, मनुसंस्थितेत्यथप्रसिद्धस्य ग्रन्थस्य चाविःकालनिर्णय एव कर्त्तव्य इति तत्रतत्रैवादौ यतामहे ।

(पतञ्जलिः) राजतरङ्गिण्या मवलोक्यते ,— यदा काश्मीर-प्रदेशस्य शासनदण्डोऽभिमन्युनामनरपतिकरचालित आसीत् , तदैव चन्द्राचार्यादयः दुर्लभं पातञ्जलं महाभाष्य मलभन्त , नीतवन्तश्च स्वदेश मिति । तथाहि (रा० त० १, १७६,)—

"चन्द्राचार्यादिभिर्लब्ध्वा देशं तस्मात्तदागमत् ।
प्रवर्त्तितं महाभाष्यं स्वञ्च व्याकरणं कृतम् ॥"–इत्यादि ।

विशेषतश्चावगम्यते वाक्यपदीयस्थापनीपाठात् ,— विलोपदशायास्तु मेवैकं महाभाष्यपुस्तकं दाक्षिणात्येषु पार्वत्यप्रदेशाल्लब्धम् चन्द्राचार्यादिभिरिति । तथाहि—

"प्रायेण सङ्क्षेपरुचीनल्पविद्यापरिग्रहान् ।
सम्प्राप्य वैयाकरणान् सङ्कटेऽस्त मुपागते ।
कृतेऽथ पतञ्जलिना [गुरुणा] तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।
अलङ्घागाधे गाम्भीर्य्यादुत्तान इव सौष्ठवात् ।
अस्खलद्गतबुद्धीनां नैवावास्थितनिश्चयः ।
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
कालेन दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ।

पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः"–इति ।

वाक्यपदीयग्रन्थस्यैष कारिकावर्गो महाभाष्यतात्पर्यज्ञापकः ; चन्द्राचार्यात्, आचार्यवसुरातात्च परभवेन भर्तृहरिणा प्रणीतः । एतदीयश्लोका एव 'हरिकारिकाः' उच्यन्ते । एवञ्चाभिमन्युनरपतेर्जन्मतोऽपि बहुपूर्वं विरचितं महाभाष्य मिति गम्यत एव ।

पाश्चात्याः किल बहव एव धीरा अभिमन्युकालसमालोचने प्रवृत्ताः ; तत्र विल्फर्डमहोदयेन ४२३ खी० पू० तद्राज्यान्तो निर्णीतः, प्रिन्सिप्महोदयेन तु ७३खी० पू० तद्राज्यान्तः स्वीकृतः, लासेन्-महोदयेन तु खीष्टीयचत्वारिंशाब्दगते एव तद्राज्यारम्भ इति स्थिरीकृतम्, बोथ्लिङ्गमहोदयेन हि खीष्टजन्मतः शतवर्षपूर्वं मेवाभिमन्युः काश्मीरसिंहासन मलञ्चकारेत्युक्तम् * । तदेतन्मतं (बोथ्लिङ्गीयं) प्रिन्सिप्-मतैनैक्यं गच्छति च ; राजतरङ्गिण्यां तद्राज्यकालः पञ्चत्रिंशदब्दमित इत्यभ्युपगमात् । तथाच ७३ खी० पू० अभिमन्युराज्यान्त इति स्वीकृते स्वीकृत मेव स्यात् १०८ खी० पू० अभिमन्युराज्यारम्भः प्रिन्सिप्महोदयस्यापि । तदेतदैक्यं गतं मतद्वय मेवावलम्बनीय मिह विभ्रमगताना मस्माक मित्यतः खीष्टजन्मतोऽप्यष्टाधिकशतवर्षपूर्वं मपि स्थितं महाभाष्य मिति लक्ष्यम् ।

ततः पूर्वप्रदर्शितवाक्यपदीयवचनालोचनादिद मपि प्रतीयत एव तदानीं खल्विदं पुनरुद्भूत मिति । तथाचेदं विचार्यं सम्यक्तम् ,— एतादृशो महान् ग्रन्थः कियत्सु कालेषु प्रचरद्रूपः समभवत् ?— ततः क्रमात् कियत्सु च कालेषु लुप्तदशां गतः ?

* Otto Boethlingk's PANINI, P. XIV—XVIII.

इति । एष महाभाष्यकारस्तु गोनर्ददेशीयः । तथाह्याह स स्वय मेव परोक्षकृत्वा— "गोनर्दीयस्त्वाह"-इत्येवमादि (पा० १. १. २१.) ; व्याख्यातञ्च तत् तट्टीकाकृता कैयटेन— "भाष्यकार-स्त्वाह"-इति ; कैयटटीकाकृन्नागेशोऽपि तथैव व्याचष्टे — "गोन-र्दीयपदं व्याचष्टे भाष्यकार इति"-इति । गोनर्ददेशवासित्वा-देव च पतञ्जलेर्गोनर्दीयत्वं स्पष्टम् । स एव गोनर्ददेशः सम्प्रति "गोण्डा"-इति प्रसिद्धोऽयोध्याप्रदेशीय इति निर्णीतञ्चास्माद्देशी-याध्यापकविशेषेण रामकृष्णगोपालभण्डारकेण * । एष एव "गोण्डा" गोनर्दो भवतु मा भूद् वा , गोनर्दस्तु प्राग्देशविशेषस्तत्र नास्त्येव संशयः ; काशिकायाम्— "एङ् प्राचां देशे" (पा० १. १. ७५.)"-इत्यस्योदाहरणेषु 'गोनर्दीयः'-इतिपदस्यापि दर्श-नात् । तदानीं च नासन् खल्विदानीन्तना इव लौहवर्त्मगा अपि धूमयानशकटाः , आसंश्च प्रायः प्रतिनगरान्तेषु दुर्लङ्घ्याः कान्ताराश्च , प्रसङ्गतस्तदप्युक्तं महाभाष्ये— "कश्चित् कान्तारे समुपस्थिते सार्थं समुपादत्ते , स यदा निष्कान्तारीभूतो भवति तदा सार्थं जहाति (१अ० १पा० ८आ०)"-इति । प्रदर्शित-वाक्यपदीयवचनात्त्ववगम्यत एवैतत् ,— चन्द्राचार्यादिभिर्दाक्षि-णात्येष्वेक मेव लुप्तावशिष्टं महाभाष्यपुस्तक मवाप्त मिति । तदद्य विचार्यतां तावत् धीमद्भिः ,— तदानीं खलु प्राच्यदेशतो दाक्षिणात्यं यावत् भाष्यप्रचलनाय कत्यब्दाः प्रयोजनीयाः मञ्जाताः ? कतिषब्देषु च तत् प्रचरद्रूपं स्थितम् ? कियद्भिश्च कालैः पुनर्लोप-दशां गत मलाभि च चन्द्राचार्यादिभिरिति ।

* INDIAN ANTIQUARY, Vol. II. P. 70.

अस्माभिस्तु त्वभिमन्युराज्यकालतोऽन्यूनसार्द्धद्विशतवर्षपूर्वं प्रणीत मेतन्महाभाष्यम् ; अन्तरेण हि सार्द्धद्विशताब्दकाल मेतादृशस्य महतो ग्रन्थस्य आर्यावर्त्तीयप्राच्यदेशाद्दाक्षिणात्यं यावत् प्रचारो सुप्रसारता च न सम्भवेदिति। एवञ्च महाप्रभावः खल्वालेग्-जण्डरो दिग्विजयाय यदेदं भारतं प्रविष्टः (३२७ खी० पू०), तत्पूर्व मेव प्रणीतं महाभाष्य मिति। अत एव दिग्विजयिना तेन ग्रीक्-नृपतिना कृतः साङ्कलनगरध्वंसो नावगतो महाभाष्य-कारस्यैतस्य पतञ्जलेः। सति ह्यवगते "सङ्कलादिभ्यश्च (पा० ४. २. ७५.)"-इति सूत्रेऽवश्य मेवोच्येत 'सङ्कलेन निर्वृत्तः साङ्कलो जनपद इदानीं ध्वस्तः'-इति ; कस्य हि नाम ग्रन्थकारस्य शताब्दवृत्तं किञ्चिदधिकशताब्दवृत्तं वा जनपदध्वंसनविवरण मपि न श्रुतं स्यात् ? नापि स्मृतिपथ मारोहेत् ? अथवा सङ्कलेन निर्वृत्तः साङ्कलो जनपदः कासीदित्येव मप्याशङ्कैतैव।

यद्युच्येत इरावत्याः पश्चिमोपतटस्थितं शाकल मेव नगर मासीत् पुरा साङ्कल मिति प्रसिद्धम्, तदेव ग्रीक्नृपतिना विध्वस्त मपि पुनः कालात् प्रादुर्भूतं, चैनिकपरिव्राजकेन ह्वेन्त्सङ्गेनापि (६२८—६४५ खी० पू०) दृष्ट मिति ह्वेयेन्त्सङ्गतो बहु-पूर्वजस्य भाष्यकारस्य न तत्र ध्वंसनकथनावसरो नापि सन्देहा-वसर इति। तत्र ब्रूमः ,— शाकलसाङ्कलयोरुभयोरेव पाणिनीये प्रस्थाने पृथक्त्वेनावस्थानात् नैवास्ति तादृशकथनावसरः। किञ्च तेन हि दिग्विजयिना इरावतीं समुत्तीर्य्यैव इरावतीपूर्वोपतटस्थ मरा-जकप्रायं साङ्कलं विध्वस्त मित्येव मेवैतिह्यासिकम् * ; चैनिक-

* INDIAN ANTIQUARY, Vol. I, P. 21—23.

परिव्राजकस्य होयेन्यसाङ्गस्य निर्देशतस्त्ववगम्यते तत्तीर्थयात्राकाले शाकलं नाम नगरं विरावत्याः पश्चिमोपतटे एव स्थित मिति। तथाच नाममेदात् संस्थानभेदाच्चानयोः पार्थक्यं सुव्यक्तमत एव। तदिहावश्य मेवं स्वीकार्यम्,— पाणिनिकाले योऽसौ साङ्कलो नामासीत् कश्चन महाजनपदः पूर्वोपतटस्थ एवेरावत्याः, स एव कालात् श्रीभ्रष्टः श्रीमता दिग्विजयिना तेन ध्वस्तश्च; शाकल मिति तु तस्माद् विभिन्न मेव स्थान मिरावत्याः पश्चिमोपतटे चिरात् स्थितम्, तदेव दृष्ट्वा यथावद् वर्णितं तीर्थयात्रागतेन तेन चैनिकपरिव्राजकेनेति। अपि तेन हि चैनिकपरिव्राजकेन यस्य शाकलस्य नगरत्वं वर्णितम्, तस्यैव "शाकलं नाम वाह्लीकग्रामः (४ अ० २ पा० २ आ०)"-इति ग्रामत्वेन व्यपदेशो लक्ष्यते महाभाष्ये; ततश्च ज्ञायते,— इह चैनिकपरिव्राजकागमनसमये तस्य स्थितं नगरत्वम्, ततः पुरा भाष्यकारसमये तु ग्रामत्व मेवासीत्तस्येति; ग्राम एव हि नगरत्व मागुं युज्यत एव क्रमोन्नत्येति। एवञ्चेह चैनिकपरिव्राजकागमनात् बहुपूर्वम्, तस्य हि ग्रीक्-नरपतेर्विजयागमनाच्च पूर्व मेव सुतरां खीष्टजन्मतः सार्द्धत्रिंशतवर्षतोऽपि प्राक् प्रणीतं पातञ्जलं महाभाष्य मिति चावगम्यते।

अन्यच्च। आसन् पुरा केचन मालवाः क्षुद्रकाश्च ('मालवी', 'अक्षिद्रक') पार्वत्या आयुधजीविनः; दिग्विजयायागतेन हि तेन ग्रीक्नरपतिना प्रायो निर्मूलिता एव त इति च प्रवदन्त्येवैतिह्यासिकाः *; परं पातञ्जले तु महाभाष्ये असकृदुक्तं श्रूयते— "एकाकिभिः क्षुद्रकैः जितम् (१ अ० १ पा० ५ आ०; ५ अ०

* INDIAN ANTIQUARY, Vol. I. P. 21—23.

३ पा० १ आ०)"-इति। तदेतद् विचारयन्तु धीमन्तः,— यदि हि नाम भाष्यकृज्जन्मतः पुरैव मालव्यक्षुद्रकजातयो दिग्विजयिना तेनालेग्जण्डरेण विजिता विनष्टाश्च स्युस्तर्हि तेषां विजयित्वोल्लेखस्तु दूरे आस्ता मस्तित्वोल्लेख एव कथङ्कारङ्कृतः स्यादिति ? तदेतदपि मान मिष्टालेग्जण्डरागमनादपि प्राक्तनत्वेऽस्य भाष्यकारस्येति।

कियत्कालकृतं तत् प्राक्तनत्वम् ? अत्र ब्रूमः,— अस्तीह पातञ्जले महाभाष्ये पाटलीपुत्रनामकीर्त्तन मनेकत्रैव। तथाहि — "साङ्काश्यकेभ्यः पाटलीपुत्रका आढ्यतराः (१ अ० ३ पा० १आ०)"-इति, पुनस्तथैव "साङ्काश्यकेभ्यः पाटलीपुत्रका अभिरूपतराः (१अ० ४पा० ३आ०)"-इति च; एवमादयो द्रष्टव्याः। महावंशनामकस्य बौद्धग्रन्थस्य द्वितीयपरिच्छेदपर्यालोचनयैतच्च स्थिरीभूतम्,-- बौद्धधर्म्मस्य सुप्रचारकः शाक्यमुनिः खस्वजातशत्रोः राज्याभिषेकादतीतेऽष्टमे वर्षे (खी० पू० ५४३) निर्वाणं गत इति *। तस्यैवाजातशत्रोः पुत्रः पौत्रो वाभूत् उदयाश्व इति प्रसिद्धः। तेनैवोदयाश्वेन पाटलीपुत्रं नाम नगरं निर्म्मापित मिति च वायुपुराणादिभ्योऽवगम्यते। तथाहि—

"स वै पुरवरं राजा पृथिव्यां कुसुमाह्वयम्।
गङ्गाया दक्षिणे कोणे चतुर्थेऽब्दे करिष्यति"-इति †।

त्रिकाण्डकोषहेमचन्द्रीयाभिधानादिभ्यश्चावगतम्,— पुष्पपुरं कुसुमपुरञ्च तस्यैव नगरस्य नामद्वय मिति। तदेवं शाक्यबुद्धनिर्वा-

---

* Turnour's 'महावंश' Appendix, P. IX.

† The Pilgrimage of Fa Hian, Calcutta, 1848, pp. 259, 260.

ततोऽन्यूनपञ्चाशद्वर्षानन्तर मेव प्रादुर्भूतं पाटलीपुत्रं नाम समृद्धं नगर मिति च वक्तुं शक्यते; महाभाष्यं तु तत उत्तरं प्रणीत मिति ।

किञ्चास्य पतञ्जलेः शाक्यबुद्धपरभवत्वनिर्णयेऽपरच हेतुरयम् ; अस्ति सूत्रम् "इतराभ्योऽपि दृश्यन्ते (पा० ५. ३. १४.)"–इति, अनेन च तसिलादयो विधीयन्ते ; ते खलु भाष्यकृता भवदादिभिर्योगे एवेष्टाः ; भवदादिषु च 'देवानाम्प्रियः'–इत्येतदपि समस्तं पदं पठितम् । दृश्यते च बौद्धग्रन्थे बौद्धानां 'देवानाम्प्रियः' –इति प्रशंसाख्यानम् । अतो ज्ञायत एवास्य भाष्यकारस्य शाक्यबुद्धजन्मपरभवत्वम् । तथैवास्ति "षष्ठ्या आक्रोशे (६. ३. २१.)" –इति पाणिनिसूत्रम् । अत्र च सन्ति कात्यायनकृतानि कतिचिद् वार्त्तिकानि ; तेषु चैकम् "देवानाम्प्रिय इति च मूर्खे"–इति । भाष्यकारस्तु तत्र 'मूर्खे'–इत्यंशं परित्यज्यैवाब्रवीत् 'देवानाम्प्रिय इति चोपज्ञानं कर्त्तव्यम्"–इति । तथाचेद मपि सुव्यक्तम् ,— कात्यायनकाले मूर्खाभिधान मेवासीत् देवानाम्प्रिय इति ; ततोऽतीते बहुदिने बौद्धमान्याभिधान मभूत्तदेव ; तत्कालज एवैष पतञ्जलिः सामयिकव्यवहारानुरोधत एव विससर्ज ततो वार्त्तिकात् 'मूर्खे'–इति । वस्तुतो यथेह भारते मुहम्मदीयराज्यस्थापनात् प्रागप्यपरदेशे हिन्दुरिति व्यवहार आसीदेव अधार्मिकेषु ; तत उत्तरं सैव समाख्या तदाक्रोशकृतोपचरितैवाभासु च ; ततो वय मपि "हीनञ्च दूषयत्येव तस्मात् हिन्दुः"–इति (मेरुतन्त्रे) व्युत्पादन मभिमत्याश्रमनो हिन्दुनामकथनेऽपि गौरव मेव मन्यामहे ; तथैव पुरा खलु पाणिनिकाले 'देवानां प्रियः'–इति पदद्वय मसमस्त मेवासीद् व्यवहार्यम् ; एतेन चासमस्तपदद्वयेन यज्ञीयपशोरेव बोधश्च भवति स्म ; तत उत्तरं कात्यायनकाले मूर्खे

एव तत् समस्त मेकपदीभूतं पशुतुल्यताव्यञ्जकं व्यपदिष्टम् ; ततो-ऽनन्तरं बौद्धानां मूर्खत्व मेवाभिमन्वानैरार्यैः प्रयुक्तं तत् तेषु ; काले तदेव पदं प्रशंसावचन मिति कृत्वा गृहीतं स्वस्वनामसु तैर्बौद्धैरिति तदानीं तात्कालिकव्यवहारानुरोधत एव परित्यक्तो वार्त्तिकीयो 'मूर्खं'-इत्यंशो भाष्यकृतेति। एतावता तु सामान्यतः खीष्टजन्मतः सार्द्धत्रिशतवर्षपूर्वम् , शाक्यमुनिनिर्वाणतश्चान्यूनपञ्चा-शद्वर्षोत्तरम् (खी० पू० ३५०—५००) प्रणीत मेतत् पातञ्जलं महाभाष्य मित्युपलभ्यते।

परन्त्वत्रापि किञ्चिद् विशेषोऽस्ति विवेच्यम्। महावंशनाम-बौद्धग्रन्थे त्वेतदपि लिखित मस्ति ,— जीवत्येव शाक्यमुनौ शोण-तीरे पाटलीनामग्रामे अजातशत्रोः आज्ञया दुर्गस्यैकस्य निर्म्माण मारब्धम् , तद् दृष्ट्वा कथिता चैषा भविष्यद्वाणी तेनैव शाक्य-मुनिना ,— "काले एतदेव भविष्यति प्रधानं नगरम्"-इति। तथाच स एव ग्रामो नगरत्व मुपगत इति प्रथमं तावत् शोणतीर-स्थं शोणसङ्गमस्थं वासीत् पाटलीपुत्रम् ; ततः पश्चात् काल-चक्रपरिभ्रमणवशात् गङ्गातटे परिशोभित मित्यनुमीयतेऽस्माभिः। यदा तु गङ्गातीरे, तदैवाभूद् वायुपुराणम् (६८ पृ० द्र०) ; तात्का-लिक मेव च वर्णनं लक्ष्यते चन्द्रगुप्तसममामयिके मुद्राराक्षसे,— "स्वय मेव सुगाङ्गप्रासादशिखरगतेन देवेनावलोकित मप्रहस्त-कौमुदीमहोत्सवं कुसुमपुरम् (३अ०)"-इति। गङ्गातीरस्थ मेव तत् पाटलीपुत्रं त्वद्यापि दृश्यते। हितोपदेशादिषु अनतिप्राचीन-तमग्रन्थेषु प्रायस्तथैव वर्ण्यते च— "अस्ति भागीरथीतीरे पाटलीपुत्रं नामधेयं नगरम्"-इत्यादि। परं यदा तु शोणतीरे, शोणगङ्गासङ्गमोपतटे वा स्थितम् पाटलीपुत्रम् , तदेव जातोऽयं

गोनर्दं पतञ्जलिः ; अत एव भाषित मत्र महाभाष्ये "अनुशोणं पाटलीपुत्रम् (२ आ० १ पा० २ आ०)"-इति ; न त्वनुगङ्गम् । ततश्च वायुपुराणसुद्राराक्षसादिवर्णितपाटलीपुत्रात् प्राचीनम् महाभाष्यीयं पाटलीपुत्र मिति स्पष्टम् । तदेवं पाटलीपुत्रस्यादिमावस्थाया मेवेदं भाष्यं प्रणीत मिति यस्या मेव शताब्द्यां शाक्यबुद्धो निर्वाणं गतः, तच्छताब्द्या मेवैष पतञ्जलिः सञ्जात इत्यपि वक्तुं शक्नुयामेव ।

वस्तुतोऽयं भाष्यकारः, शाक्यमुनेर्बुद्धात् न बह्वर्वाचीनः ; जीवति हि पतञ्जलौ नाभवत् शाक्यमतप्रचारः समन्तात् ; सुप्रचरिते हि तत्र बौद्धसम्मतो निर्वाणार्थोऽपि कथं न ज्ञात आसीत् पतञ्जलेः ? ज्ञाते च तत्र, "निर्वाणोऽवाते (पा० ८. २. ५०.)" -इति सूत्रभाष्ये तद्विषयकविचारोऽपि कथं नाकारि तेन ? सति हि तदानीं शाक्यमतप्रचारप्राबल्येऽवश्य मेव तत्र तद्विषयकोऽपि विचारो लोकेतैव । तादृग्प्राबल्याभावस्य चाल्पदिनप्रसरतैव निदान मनुमीयते । तदेवं कालाशोकवृत्तात् द्वितीयमहासङ्गमात् पुरैवेदं महाभाष्यं प्रकाशित मित्यप्युक्तं न दोषाय । स च बौद्धानां द्वितीय-महासङ्गमो नूनं खीष्टजन्मतः चतुःशताब्द्या अपि प्रागभूदिति च महावंशग्रन्थीयद्वादशपरिच्छेदालोचनात् निर्णीत मेव * । सिद्ध मित्थं खीष्टजन्मतो ऽन्यूनसार्द्धचतुःशताब्दीपूर्वम् (४५० खी० पू०) कलेश्च सप्तविंशशताब्द्यां प्रणीत मिदं पातञ्जलं महाभाष्य मिति ॥

अत्र ये चात्र वादिनो विप्रवदन्ते, तानपीह किञ्चित् प्रतिबोधयामः स्वोपलब्ध्यनुसारतः ; न चेद्दास्माकं हठकारिता जिगीषा वा।

---

* TURNER'S 'महावंश' P. 71.

अत्र केचिदाहुः।— (क) "सभाराजाऽमनुष्यपूर्वा (पा० २. ४. २३)"–इति-सूत्रीयभाष्ये "तद्विशेषणानाञ्च न भवति। पुष्यमित्रसभा ; चन्द्रगुप्तसभा"–इत्युक्तं यतो लभ्यते, ततो गम्यत एवैतत्,— मगधराजविशेषः पुष्यमित्रः, तद्वहुपूर्वभवश्चन्द्रगुप्तश्चेत्यावपि राजानौ पतञ्जलेर्विज्ञातावेवेति तदेतस्य चन्द्रगुप्तपरभवत्वविचारस्तु दूरे आस्ताम्, तद्वहुपरजात् पुष्यमित्रादद्यवरजत्वं सम्पद्यत एवेति। अत्र वदामः ;— पुष्यमित्रराज्यन्तु (खी० पू० १७८–१४२) द्विचत्वारिंशदधिकशतवर्षपूर्वं हृत्तं खीष्टजन्मत इति तैरेव निरूपितम् * ; अभिमन्युराजाश्रयैव लोपदशाश्रयस्तु भाष्यं पुनरुज्जीवितं चन्द्राचार्यादिभिरिति च सर्ववादिसम्मतम् ; तस्याभिमन्योः राज्यकालश्च खीष्टजन्मतो ऽष्टाधिकशतवर्षपूर्वं मित्यपि बोध्यलिङ्गादिसम्मत्या निरूपित मेव (६५ पृ०)। तत् कथयन्तु भवन्त एव,— न्यूनाधिकचतुस्त्रिंशदब्देष्वेव किं मेतादृशस्य महाग्रन्थस्य तदानीन्तनीये काश्मारपूर्णे भारते आर्यावर्त्तीयप्रदेशात् दाक्षिणात्यं यावत् सुप्रचलनं कालाज्ञोपदशाश्रयस्तत्वञ्च सम्भवेत् किमु ? येषां सम्भवेत् सम्भवतु नाम ! अस्माकन्तु नायं विश्वासविषयः। अस्माकं तु चन्द्रगुप्तः पुष्यमित्रश्चेमावुभावेव तादृशनामराजानौ भाष्यकारेण कल्पितौ ; सम्भवेवैवं हि देवदत्तयज्ञदत्तविष्णुमित्रादयो वक्ता एव व्यक्तयो वैयाकरणादिभिः कल्पिताः। महाभाष्ये दृष्टेव च तथाविधं नामकरणं स्वस्वपुत्रस्य कृतं तदुत्तरं तत्तत्पित्रेति च सम्भवपर मेव। अन्यथा हि 'चन्द्रगुप्तसभा'–इति प्रथमं प्रत्युदाहृत्यैव तत उच्येत पुष्यमित्रसभेति,

* Wilson's VISHNUPURANA, Vol. IV. 190.

तयोस्तथैवपौर्वापर्यात् * ; न हि प्रसिद्धपौर्वापर्यक्रमोल्लङ्घन मुचितं तादृशस्याशेषशेमुषीसम्पन्नस्य महाभाष्यकारस्येति। किञ्च चन्द्रगुप्तकाले तु पाटलीपुत्रं नगर मनुगङ्ग मेव वर्णितं मुद्राराक्षसादौ (७२ पृ०), ततोऽद्यापि तथैव ; तदद्य विचार्यता मिद मपि, — "यदि नाम चन्द्रगुप्तराज्यकाले पुष्यमित्रराज्यकाले वा महाभाष्यं प्रणीतं स्यात्, तर्हि कथन्नाम तत्र "अनुशोणं पाटलीपुत्रम्"-इति (७२ पृ०) भाष्येतेति ? अस्माभते तु चन्द्रगुप्तराज्यकालात्पूर्वन्त्वासीदेव पाटलीपुत्र मनुशोण मित्युक्त मतो युक्ततरं चैतत् चन्द्रगुप्तादपि प्राचीनत्वं भगवतः पतञ्जलेः किमु पुष्यमित्रादिति।

(ख) यदप्युच्यते "वर्त्तमाने लट् (पा० ३. २. १२३.)"-इति-सूत्रीयभाष्ये "इह पुष्यमित्रं याजयामः"-इत्युत्तमपुरुषप्रयोगात् पतञ्जलेः पुष्यमित्रार्त्विज्य मपि स्फुटम्, तदलं तत्कालिकत्वातत्कालिकत्वविचारेणेतीति। तदपि न विचारसहम्। यद्येव मुत्तमप्रयोगदर्शनादेव तस्य याजकत्व मङ्गीक्रियेत, तर्हि तत्रैव 'इह वसामः'-इतिप्रयोगदर्शनात् तस्य पाटलीपुत्रवासित्व मप्यङ्गीकरणीयं भवेत्। न च पुष्यमित्रयाजानुरोधेनैव तदानीं तस्य तत्र वासश्चासीदेवेतीष्ट मेवेति वाच्यम् ; सति हि तस्य तादृशवक्तव्याभिमते तिष्ठाम इत्येव मेव क्रिया प्रयुञ्ज्येत, न तु वसाम इति ; गोनर्दवासित्वात्तस्य। किञ्च तत्रैव "इहाधीमहे"-इत्यप्युक्त मस्ति ; तत् किं तदानी मपि पतञ्जलिः तत्र पाटलीपुत्रेऽध्ययनार्थं स्थितः ? गुरुमुखादर्थग्रहण मेव ह्यध्ययन मार्याचार्यसम्मतम् ;

* S. W. Jone's 'Chronology of the Hindus' in Asiatic Dissertation Vol. I. p. 315 ; and Asiatic Researches, Vol. IX. p. 96.

तत् तदानीं तत्र पतञ्जलेर्न कथ मपि सम्भाव्यते केनचिदपि ; तथाचावश्य मेव वक्तव्यम् ,— एवमादिषूत्तमवदप्रयोगदर्शनं न तु पतञ्जलेः स्वस्य तदाप्यापाश्चात्यत्वं गमयति ; अपि तु वैयाकरणाना मुदाहरणप्रत्युदारणप्रदर्शनायैवं प्रयोगास्त्ववश्य मेव कल्पनीया: सदैवेति । तदेवं यथैवोक्तम् "इह वसामः"–इति , यथैव च "इह अधीमहे"–इति, तथैव "इह पुष्यमित्रं याजयामः"–इति च ; न च तेभ्यः किं मप्येतिह्यासिकं तथ्यं लभ्य मस्ति । वस्तुतः पाटलीपुत्रः पतञ्जलिना दृष्ट इति तु खलु वक्तुं शक्यते, परं पाटली-पुत्रस्थ एवेदं भाष्यं व्यरचयदिति तु न कदापि वक्तुं युज्यते । अथैतच्च भाषितं तेनैव— "यया देवदत्त इह भूत्वा पाटलीपुत्रे भवति , सा नूनं क्रिया (१ अ० ३ पा० १ आ०)"–इति , पुनस्तत्रैव किञ्चिदग्रे–"स इहस्थः पाटलीपुत्रस्थं देवदत्त मुपदि-शति ,—अङ्गदी कुण्डली व्यूढोरस्को दत्तबाहुर्लोहिताक्षस्तुङ्गना-सिको विचित्राभरण ईदृशो देवदत्त इति (१अ० ३पा० १आ०)" –इति च ; एवमादिप्रयोगदर्शनाच्च कः खलु प्रज्ञावान् मनसापि शङ्कितुं समर्थः पाटलीपुत्रनगरे स्थित एव पतञ्जलिः प्रणिनाये-तद्ग्रन्थ मिति । किञ्च प्रदर्शितयोरुदाहरणयोर्यथा किल देवदत्तो भाष्यकृत्कल्पित एव जनः , ततः प्रख्याताश्चाद्यापि दृश्यन्त एव बहवो देवदत्ताः ; यथा च "पश्य देवदत्त कष्टं श्रितो विष्णु-मित्रं गुरुकुलम् (२अ० १पा० १आ०)"इत्यत्र च देवदत्त–विष्णु-मित्रौ कल्पितौ , तथैव तत्र पुष्यमित्र-चन्द्रगुप्तावित्यपीत्यत्र च नास्त्येव सन्देहलेशोऽपीति ।

प्रतिपादितञ्च पुरस्तात् ,—अद्यप्रचलितमहाभारतात् पूर्वजत्वं त्वेतन्महाभाष्यस्य (५८ पृ०) ; तस्माच्चैतस्य खीष्टजन्मतो द्विशता-

ब्दीपूर्वोद्भूतत्वन्तु पाश्चात्यैरपि स्वीकार्य्यम् ; महाभारतस्यास्य हि खीष्टजन्मतो द्विशताब्दीपूर्वप्रणीतत्वे सर्वेषा मेव तेषां मतैक्यात् * । पुष्यमित्रस्य राज्यारम्भकालस्तु तैः खीष्टजन्मतः शताब्दीपूर्व मित्येव निर्णीतम् ; तथाच स्वकृतसिद्धान्तव्याकोपभियापि तेषां स्वीकार्य मेवास्य पतञ्जलेः तत्पुष्यमित्रतोऽतिपूर्वजत्वम्, तथा तादृशोदाहरणे स्थितस्य तस्य कल्पितव्यक्तित्वञ्च । स्वीकृते त्वेवं तत्तुल्यतया 'चन्द्रगुप्तसभा'-इत्यत्र चोदाहरणे चन्द्रगुप्तेत्याख्यव्यक्तेरपि भाष्यकृत्स्वकपोलकल्पितत्वं सुवच मेवेत्यल मतिजल्पनेनेति ।

(ग) अस्ति चैकं सूत्रम्-- "अनद्यने लङ् (पा० ३. २. १११.)" -इति । तद्भाष्ये च वार्त्तिकोदाहरणतया हे वाक्येऽवलोक्येते, — "अरुणद् यवनः साकेतम्, अरुणद् यवनो माध्यमिकान्"-इति । अत्र कश्चित् धीमान् माध्यमिकानिति नागार्जुनमतानुगतबौद्धसम्प्रदायविशेषस्थितानेव मत्वा पतञ्जलिकालनिर्णये यतितवान्, तदपि भ्रमसङ्कुल मिवैवाभाति ; राजतरङ्गिणी-पर्यालोचनया हि स्फुट मेवावगम्यते नागार्जुनोऽसावभिमन्युसमकालिक एवेति । तथाहि (१. १७४ —१७८.)—

"अथ निष्कण्टको राजा कण्टकौत्साग्रहारदः ।
आबीर्यभूवाभिमन्युः शतमन्युरिवापरः ।
खनामाङ्कशताङ्काङ्गशेखरं विरचय्य सः ।
परार्द्धविभवं श्रीमानभिमन्युपुरं व्यधात् ।
चन्द्राचार्यादिभिः ०—० व्याकरणं कृतम् ।
तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः ।
नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः ।

* W. W. Hunter's 'Brief History of the Indian People', p. 59.

ते वादिनः पराजित्य वादेन निखिलान् बुधान् ।
क्रियां नीलपुराणोक्ता मच्छिन्द्रागमदिषः"–इति ।

अभिमन्युसमये एव च चन्द्राचार्यादिभिर्बह्वन्वेषणतो श्लोकं महाभाष्यपुस्तकं दाक्षिणात्यादानीत मिति तु सर्ववादिसम्मत मवेत्युक्तम् (६४ पृ०) । तत्रय मभिमन्युतो बह्वग्रजस्य पतञ्जलेः किलाभिमन्युसमकालोत्पन्नमाध्यमिकज्ञानसम्भवो यतश्च तादृशानां माध्यमिकाना मवरोधदर्शन मपि तस्य सम्भाव्येत नामेति सुधीभिरेव विभाव्यताम् ।

अस्मन्मते त्विह भाष्ये माध्यमिकशब्दात् मध्यदेशप्रभवा एव ग्रहणीयाः । मध्यदेशस्तु मन्वादौ परिभाषित एव ,—

"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि ।
प्रत्यगेवप्रयागाच्च मध्यदेशः प्रकीर्त्तितः (२. २१.)"–इति ।

पातञ्जलेश्चैतन्मनूत्तरभवत्वं पुर एव प्रतिपादितम् (६१ पृ०) ; तथाचैतन्मनूक्तमध्यमदेशभवाना मेव माध्यमिकत्वं तदभिमतं सम्भाव्यते । बृहत्संहितायाः समालोचनाच्च मध्यदेशजनामपरतयापि भवन्ति माध्यमिका इति बुध्यते । तथाहि—

"भद्रारिमेदमाण्डव्यसाल्वनीपोज्जिहानसङ्घाताः ।
मरुवत्सघोषयामुनसारस्वतमाध्यमिकाः (१४. २.)"–इति ।

वस्तुतो यवनाक्रोधानुसारत एव भाष्यकालनिर्णयस्तु सर्वथा असम्भव एव ; भारते हि चिरादेव विद्यन्ते यवनोत्पाताः । महाभारतपाठादवगम्यत एव यौधिष्ठिरीयेऽपि काले क्वचित्क्वचित् यवनप्राबल्यसंवादः , हरिवंशपाठात् जरासिन्धुकालेऽपि यवनराजस्य कालयवनाभिधस्यातिबलत्वं विज्ञायत एव (हरि० वि० प० १०९—११४ अ०) । एव मन्यत्रान्यत्रापि भारते यवनो-

त्यातङ्कसाम्या बहव एव वर्णिता दृश्यन्ते ; तत्र यीक्भूपत्यादीना मपीह पदार्पण मसङ्गदेवाभूत्। तदेवं यवनावरोधानुसारतो भाष्यरचनाकालनिर्णये प्रवर्त्तनं नूनं दैवविडम्बन मिति न तदालोचनेऽप्यस्माकमतिः प्रसरतीति दिक्।

(घ) यश्च कश्चित् "तथाच सूत्र्यते हि भगवता पिङ्गलेन पाणिन्यनुजेन"-इति षड्गुरुशिष्योक्तं दृष्ट्वैव पाणिनिसमकालिकत्वं पतञ्जलेः स्वीकर्त्तुमिष्टे, पतञ्जलेः पिङ्गल इति नामान्तरश्रवणात्। तस्य खल्वनुत्तमधियः शंसावादाः कथन्नु सम्भवेयुरेकमुखेन? यतीऽनुद्भूतपूर्वं मेवैतत्तेन निर्णीतं हिमवद्विन्ध्ययोर्मिलन मिवातीव चित्रम्! पाणिनि-पतञ्जल्योः प्रायोऽष्टादशशताब्दान्तरितत्वावगमात्। अत एव भगवता पतञ्जलिना क्वचित् क्वचित् पाणिनि-काले व्यवहृतं लौकिकं किञ्चिद् बोधयितुं 'पुराकल्पे'-इति तदुल्लेखः कृतः। तथाहि— "पुराकल्पे एतदासीत् ०—० शब्दा उपदिश्यन्ते ०—० एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्र मन्वाचष्टे (१अ० १पा० १आ०)" -इति, "पुराकल्पे एतदासीत्— षोड़शभाषाः कार्षापणं षोड़शपलाश्च माषशतंवधः (१ अ० २ पा० ३ आ०)"-इति चैवमादि। यद्यपि पाणिन्यनुजश्च पिङ्गलः, महाभाष्यकारस्य च नामान्तरं पिङ्गल इति भवितु मर्हतीति सत्यम्; पर मनयोर्न चैक्यं स्वीकुर्मो वयम्; अपि तु बहुभिरेककालिकत्व मेव। वस्तुतोऽक्षवर्णानुसारत एव कृष्ण-पिङ्गल-गौर-श्यामेति नामानि तदानी माख्यातानि भवन्ति स्म। छान्दोग्येऽपि श्रूयते चैकत्र पिङ्गलः। तथाहि— "अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्यानिम्नस्तिष्ठन्ति (८. ६. १.)"-इत्यादि। न चात्रापि

पिङ्गलनाम्नः पाणिन्यनुजस्यान्यस्य वा कस्यचित् मते इत्येव मर्थो गम्यते ; 'शुक्लस्य'–इत्यादेः, 'आदित्यः पिङ्गलः'–इत्यादेश्चोत्तरत्र तत्रैव श्रवणात्, छान्दोग्यस्य तस्य पाणिनिपूर्वजत्वावधारणाच्च ; दृश्यते हि छान्दोग्ये ऽनेकत्र शौनकः कापेयः (पा० ४. ३. ५, ६, ७.), प्रत्युदाहरणञ्च तदेव पद मनुभूयते "कपिबोधादाङ्गिरसे (४. १. १०७.)"–इति पाणिनिसूत्रस्थेतीह दिक् ।

(ङ) अपि दृश्यते चात्र महाभाष्ये (पा० ४. २. ६०.) आख्यायिकात्वेन वासवदत्ताया ग्रहणम् । "आख्यायिका— वासवदत्तिकः"–इति । सुबन्धुकृतैवाख्यायिका सेति प्रसिद्धा स च सुबन्धुकविः रामायणस्य, महाभारतस्य, तत्परिशिष्टरूपस्य हरिवंशस्य, विक्रमादित्यस्य च परभव एव । तथाहि— "रामायणेनेव सुन्दरकाण्डचारुणा"–इति, 'भारतेनेव सुपर्वणा'–इति 'हरिवंशेरिव पुष्करप्रादुर्भावरमणीयैः'–इति, 'सा रसवत्ता विहृता नवका विलसन्ति चरति नो कं कः । सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये"–इति च । तदेव मस्य हि महाभाष्यस्य वासवदत्ता-परभवत्वस्वीकारपूर्वकं रामायणादिपरभवत्व मपि मन्तव्य मित्येव मपि कश्चित् शङ्कितु मुत्सहेतैव । पर मवश्यं तस्येमानि च त्रीणि वितर्क्याणि भवेयुः,— यदि हि स्वर्गते च विक्रमादित्ये स्थितस्य सुबन्धोः समनन्तर मेव प्रणीतं स्यात् पातञ्जलं नाम महाभाष्यम्, तर्हि काश्मीरराजाभिमन्युसमये विक्रमादित्यजन्मतो बहुपूर्व मपि चन्द्राचार्यादिभिः कथं तद्भाष्यपुस्तक मवाप्त मिति प्रथमम् । सर्वैरेव पुरातत्त्वानुसन्धित्सुभिर्महाभाष्यस्यास्य खीष्टजन्मपूर्वप्रणीतत्व मेक-

वाक्यतो निर्णीत मेव ; स सर्वसिद्धान्तोऽपि कथं न व्याकुर्य्येतै-वेति द्वितीयम् । अपि यदि हि नाम महाभाष्यकारः खल्वि-दानीं प्रचलिताद्महाभारतादपि परभवः स्यात् , तर्हि महाभाष्ये-ऽत्र प्रदर्शितं हृद्रुकुमार्य्युपाख्यानं (५८ पृ०) प्रचलितमहाभारती-यानुरूप मेव कथं न दृश्येतेति तृतीयम् ।

अस्मन्मते तु कालावष्टाक्षरताङ्कते तन्महाभाष्यपुस्तके सुबन्धुपरज एव कश्चित् तत्र 'वासवदत्तिकः' प्रभृत्यभिनिवेश्य तस्य नष्टाक्षरत्व मुद्धारेति । अत एव प्रवादोऽपि 'यत्र लालायितः फणी"-इति ।

महाभाष्यकृतो भगवतः पतञ्जलेः सुबन्धादिवहुपूर्वभवत्वे , अपरा चैषोपपत्तिः समालोच्या ,— यो हि नाम वासवदत्ता-कृतः सुबन्धोरप्युत्तरभवः , तेन चावश्यं कालिदासस्य कवेरप्यु-त्तरभवेन भवितव्यम् ; स्वीकृते च तथा कालिदासकृतान् प्रयो-गानप्यवेक्ष्यावश्यं तत्र भाष्ये तथैवेष्टयः प्रणीता दृश्येरन् ; न च तथा दृश्यन्ते , नापि तेषु भाष्यकृता कश्चन विचारः कृत इति पश्यामः ; प्रत्युत सिद्धान्तकौमुद्यादौ तादृशप्रयोगाना मप-प्रयोगत्व मेव निर्णीत मवलोक्यते । तथाहि— 'अवैहि-इति हृद्वि-रसाधुरेव'-इति (सि०कौ०अ०पु०) ; किञ्च— 'कथन्तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः , अनुदितौषसरागा इति भारविः , समानकालीनम् , प्राक्कालीनम् ,-इत्यादि च ? अप-भ्रंशा एवैते इति प्रामाणिकाः'-इति (तद्धि० शे०) । अपर मप्यत्रेदं विवेच्यम् ,— महाभाष्यप्रयुक्तानां पाणिन्यादिविरुद्धाना मपि प्रयोगानां साधुत्वं मन्यते ; कालिदासादीनां तु तत्पूर्वजत्वे तत्तत्प्रयुक्तानां कथ मुच्यतेऽसाधुत्व मिति ? यथा दृश्यत एव हि पाणिनीयधातुपाठविरुद्धः प्रयोगोऽसौ भाष्यकारस्य— "आदित्य-

श्चाभिप्राये सज्जते"-इति (३अ० १पा० २आ०)। न चेदृश-प्रयोगस्यासाधुत्व माशङ्कित मपि केनचित् ; प्रत्युताह हि कैयटः — "सज्जते इति, भाष्यकारवचनादात्मनेपदम्"-इति। तत उत्तर मिदानीं तु भागवतादावपि बहुत्रैव प्रयुक्तं दृश्यते 'सज्जते' -इति। तद्यथा— "प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु" -इति भाग० पु० ४. १९. २५.। महाभारतीयभीष्मपर्वान्तर्गत-गीतापर्वाण्यष्टादशाध्यायीयसप्तदशश्लोकव्याख्यानावसरे श्रीधरस्वामि-नापि प्रयुक्तम् "यस्य बुद्धिर्न लिप्यते, इष्टानिष्टबुद्ध्या कर्मसु न सज्जते"-इति। ततो वय मपि तथा प्रयोक्तुं सदैव सज्जामहे एव। एवं "भाष्यकारस्तु त्वकल्पिद्वल्लो मकल्पिद्वलक इति रूपे इष्टापत्तिं कृत्वेदं सूत्रं प्रत्याचख्यौ"-इत्येवमादयश्चोक्ता दीक्षिता-दिभिः (वै० सि० कौ० अ० पु०)। अहो मतप्राबल्यं तस्य भगवतो व्याकरणेषु ! अस्ति सूत्रं पाणिनीयम्— "अवाद् ग्रः (१. ३. ५१.)"-इति, एतेन पाणिनिमते ऽनुभूयत एव 'अव-गृणाते'-इत्येवमादीना मपि प्रयोगानां साधुत्वम् ; पर मत्र भाष्यकृता "गृणातिस्त्वपूर्वो न प्रयुज्यत एव"-इत्युक्तम् ; एतस्मा-देव शासनाद्य 'अवगृणाते'-इत्येवमादीन् प्रयोक्तुं न क्षमते कश्चिदपि। तदेवं कालिदासादीना मपप्रयोगानवेक्ष्य तेषां साधु-त्वाख्यापनाय पातञ्जले महाभाष्ये कस्याप्येकस्य यत्नस्यानुपला-भात्, पाणिन्यादिमतविरुद्धाना मपि भाष्योक्तानां प्रयोगानां शिष्टगृहीतत्वोपलाभात्, पाणिनिमतसिद्धाना मपि प्रयोगाणां पतञ्जलिवारितानां व्यवहारादर्शनाच्चावश्य मेव महाभाष्यकारस्य भगवतः पतञ्जलेः कालिदासादितो बहुप्राचीनत्वं मन्तव्य मिति किं तस्य सूत्रभ्रुपूर्वजत्वविचारेणेत्यलम्।

अथ पतञ्जलिविषये ऽपर मपि किञ्चिद् समालोचयितव्य मस्ति, तदिदम्— 'अय मेव पतञ्जलिः वैद्यशास्त्रप्रणेतापि, योगशास्त्रप्रणेतापि'-इत्येव मस्ति प्रवादः; वयन्तस्य नामैक्य मेव बीज मनुगच्छामो नान्यत् किञ्चनेति ।

"योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन ।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि"
-इत्येष श्लोकोऽपि नूनं प्रणीतो नामैक्यहेतुक एवेति ।

यत्तु चेत, वैद्यशास्त्रेऽप्यासीदस्य महाभाष्यकारस्यावगम इति तु प्रतीयत एव; भाष्ये बहुत्र तथाविधप्रयोगदर्शनात् । तद्यथा— "वातिकम्., पैत्तिकम्, श्लैष्मिकम् ०—० सान्निपातिकम् (५ अ० १ पा० १ आ०)"-इति, "दधित्रपुसम्प्रत्यत्तो ज्वरः ०—० । नड्वलोदकं पादरोगः ०—० । आयुर्घृतम् ०—० । (६ अ० १ पा० २ आ०)"-इति, "घृतभोजन मारोग्यस्यादिः (६ अ० ४ पा० ४ आ०)"-इत्यादि चेति । अत्र ब्रूमः,— न हि वैद्यकशब्दादि-वित्त्वेनैव वैद्यकसूत्रकर्तृत्व मुपपद्यते, अपि चेत एव यदि कश्चित् तस्य वैद्यकभाष्यविशेषकर्तृतां च स्वीकर्तुं मुत्सहेत, स्वीकरोतु नाम, तत्र नो न क्षतिः । एवं योगशास्त्रीयमूल-सूत्रकर्तृत्व मप्यस्य नैव स्वीकार्यम्; नापि क्वात्र क्वापि योग-विषयकोदाहरणानि दृश्यन्ते, येन चास्य योगशास्त्रज्ञत्वस्यापि परिचय उपलभ्येतेति ।

एवं षड्गुरुशिष्यलेखोऽपि नामविभ्रममूलक एव । इत्तु यदा तु तेनालेखि— "यत्प्रणीतानि वाक्यानि भगवांस्तु पतञ्जलिः ।
व्याख्यायोद्घाटनीयेन महाभाष्येण हर्षितः ।
योगाचार्यः स्वयं कर्त्ता योगशास्त्रनिदानयोः"-इति (अ०भा०),

तदेतन्न सूनृतं किं मस्ति व्यासकृतं भाष्यं तस्य योगशास्त्रस्येति ? पाणिनिसूत्राणां भाष्यस्य कर्तुः पतञ्जलेः पाणिनिपरभवत्वे कास्ति वक्तव्यता !— "पाराशर्यशिलालिभ्याम् (पा० ४. ३. ११०.)"–इति सूत्रदर्शनात् पाणिनेश्च पाराशर्यव्यासपरजत्वं व्यक्तमेव। तदत्र कथयतु नाम नामैक्यश्रवणादेव व्यक्तभिन्नवादी भवान् योगशास्त्रं खलु पाणिनिपरभवश्चेत् कथं तद्भाष्यकारत्व सुपपद्येत तत्पूर्वजस्य तस्य व्यासस्येति ?

अस्मन्मये तु ,— योगशास्त्रस्य पातञ्जलस्य भाष्यकारो व्यासः, भिक्षुसूत्रकृतो व्यासाद् विभिन्नो बहुपरभवश्चेति ; "भुवनज्ञानं सूर्ये संयमात् (पात० ३. २४.)"–इति सूत्रीयभाष्येऽनतिप्राचीनपुराणादिसम्मतभुवनवर्णनदर्शनात् तस्य अद्यप्रचलितमहाभारतकारादेरिवानतिप्राचीनत्वावगतेः, लिपेरार्षत्वानवगमादिभ्यश्च। एवं बभूव च कश्चिदपरः पतञ्जलिर्योगसूत्रकृत् दर्शनशास्त्राविर्भावकालिकः, पाणिनितोऽपि प्राचीनः। तथाच पातञ्जलं नाम योगशास्त्रं पाणिनितो बहु प्रागेव प्रणीतम् ; प्राचीनतमे भिक्षुसूत्रेऽपि "एतेन योगः प्रत्युक्तः (२. १. ३.)"–इत्येवमादिदर्शनात्। अत एव सम्पृचानुरुधा० (३. २. १४२.)"–इति पाणिनीयसूत्रेण पातञ्जलशास्त्रविहितयोगाभ्यासकारिण्येवार्थे साध्यते 'योगी'-पदम् ; न हि पातञ्जलात् पुरातनं किमप्यस्ति आसीद्वा योगशास्त्रम्। अत एव व्यक्तिविशेषनामत्वादव्युत्पन्नप्रातिपदिकमिति पाणिनिना उपेक्षितस्यापि पतञ्जलिशब्दस्य कात्यायनकर्तृकेन "शकन्ध्वादिषु पररूपम् (पा० ६. १. ९४.)"–इति वार्त्तिकेन व्युत्पादनं सङ्गच्छते ; न हि परजस्य पतञ्जलेर्ज्ञानं तत्पूर्वजस्य कात्यायनस्य सम्भवेन्नामेति। गणपाठोऽपि पाणिने-

रिति ध्वनितं पूर्वापरेति (पा० २. १. ५८.) सूत्रभाष्ये। अपि वा येन केन चित् कृतः स्यात् गणपाठः, पर मस्माभ्यहाभाष्यकारात् प्राचीनतरेणैव केनचित् कृत एवेत्यत्र तु नैवास्ति संशयः; तत एवोक्तम्— "सिद्धन्तु रौक्यादिषूपसङ्ख्यानात्। ०—०। के पुनरौक्यादयः ? ये क्रौक्यादयः (पा० ४. १. ७८ सू० भा०)"—इत्येवमादि।

आदिमीमांसाचार्यात् काशकृत्स्नेरयाप्ययं परभव एव, इहापि नास्ति संशयः। अत एवोक्त मिह—"काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी (४अ० १अ० १आ० पुनः ३पा० २आ०)"—इति। इह प्रोक्तत्वोल्लेखदर्शनादस्य च काशकृत्स्नेः पाणिनितो बहु पूर्वजत्व मपि ध्वन्यते; तत्पूर्वजस्यैव हि तेन प्रोक्तत्वेन ग्रहणोपदेशात्। अद्यप्रचलितमीमांसाशास्त्रसूत्राणां कर्त्ता खलु जैमिनिस्तु स्यात् पाणिनिसमकालिकः; व्यासशिष्यत्वात्, वैशम्पायनादिवत्। अतो जैमिनेश्चार्वाचीनोऽयं पतञ्जलिरिति च सुवचम्।

वेदान्तसूत्राणां प्रणेतुर्व्यासाचायं परभवः। यदस्त्येतत् सूत्रं पाणिनीयम्— "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (४. ३. ११०)"—इति, अत्र पाराशर्यशब्देन वेदान्तसूत्रकृतो व्यासस्यैव बोधात्; अद्य वेदान्तेतिप्रसिद्धाना मेव हि सूत्राणां पाणिनिकाले भिक्षुसूत्रेति व्यपदेश आसीत्, न चान्यत् किञ्चन भिक्षुसूत्रं नामेति। अत एव वेदान्तसूत्रभाष्यवार्त्तिककृत् वालकृष्णानन्दोऽपि सर्वेष्वधिकरणेषु भिक्षुसूत्रकृत मित्याद्युक्त्या पाराशर्यं व्यास मेव प्रणनाम विविधप्रकारेण वर्णयन्। तथाहि, आत्माधिकरणभाष्यवार्त्तिकारम्भे (सू० ४. १. २.)—

"पाराशर्यः प्रथयतु परं भाव मभ्याहतं स्वम्,

सूत्रे स्वीये सकलविदुषां मोदमूलस्वभावम्।
शिष्यैर्विघ्नैरपि परिहृतः पैलपूर्वैः प्रतीतैः,
आचूडं मे सजलजलदाकारदायादमूर्त्तिः"-इति।

तथाध्यक्षाधिकरणभाष्यवार्त्तिकारम्भे च (सू० ४. २. ३)—

"भिक्षुयोगकृतं व्यासं शङ्करस्य गुरुं परम्।
स्मृत्वा व्याकुर्महेऽध्यक्षसूत्रभाष्यस्य वार्त्तिकम्"-इति।

एवञ्च यान्यखिलसूत्राणि भिक्षुसूत्राणीति पाणिनिकाले प्रथितानि, तान्येवेदानीं ब्रह्मसूत्राणीति वेदान्तसूत्राणीति च कथ्यन्त इति स्फुटम्। सङ्गृहकारस्तु व्याडिः पतञ्जलेरस्मात् पूर्वतन इति तु "सङ्गृहेऽस्त मुपागते (६४ पृ०)"-इति वाक्यपदीयवचनादिभ्यश्च सिद्ध मेव; तस्मिन् व्याडिकाले ऽप्यस्य वेदान्तदर्शनस्य ब्रह्मविद्येति प्रसिद्धिरासीत्। तथाहि विकृतिवल्लीारम्भे श्लोकित मेतत् स्वय मेव व्याडिना,— "ब्रह्मविद्यागुरुं श्रेष्ठं भारद्वाजं बृहस्पतिम् (१. ३.)"-इति। तदेतस्य ग्रन्थस्य पातञ्जलात् प्राक्तनत्वस्य तु का कथा ? व्याडितः, पाणिनितश्चापि प्राक्तनत्व मेवेति।

न्यायवैशेषिककाराभ्यां मध्यं पतञ्जलिःपरभव एव। दृश्यत एव हि नैयायिकाद्यनुमानप्रणाल्यादिकं तत्कृते महाभाष्ये। तथाहि— "धूमं दृष्ट्वा अग्निरत्रेति गम्यते (२अ० १पा० १आ०)"-इत्यादि। वैशेषिक-न्यायकारयोः कणभक्षाक्षचरणयोश्च वेदान्तसूत्रकार-पाराशर्य्य-समकालिकत्वञ्चैवानुपदं प्रतिपादयिष्यामः।

साङ्ख्याचार्यात् कपिलाच्चायं परभवः। अत एवात्रोक्तं गम्यते कापिलमतम्— "अथवा भवति वै कश्चित् जाग्रदपि वर्त्तमानं कालं नोपलभते। तद्यथा। वैयाकरणानां शाकटायनः

रथमार्गं आसीनः शकटसार्थं यान्तं नोपलेभे । किं पुनः कारणं जायदपि वर्त्तमानं कालं नोपलभते ? मनसा संयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति, मनसोऽसान्निध्यात् (१ अ० २ पा० २ आ०)"–इति । अपरत्र चैवम् "षड्भिः प्रकारैः सतां भावानां मनुपलब्धिर्भवति । अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसाऽनुतत्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादादिति (४ अ० १ पा० १ आ०)"–इति । तदेव मादीनां दर्शनात् कापिलशास्त्रप्रचारात्परभवत्वं चास्य पतञ्जलेः सुव्यक्तम् । अपि चास्य कपिलपरभवत्वविचारस्तु दूरे आस्ताम्, तत्सम्प्रदायीयद्वितीयपुरुषादासुरेश्चायं पतञ्जलिर्बह्वर्वाचीन एव ; एतत्पूर्वजैनापि हि वार्त्तिककारेण कात्यायनेन "आसुरेरुपसङ्ख्यानम् (पा० ४. १. २९.)"–इत्युक्तत्वात् । आसुरिर्हि साङ्ख्याचार्येषु द्वितीय इति दृश्यते । तथाह्युक्तं मोक्षरक्षणेन— "पुरुषार्थज्ञान मिदं गुह्यं परमर्षिणा समाख्यातम् । ०—० । एतत् पवित्र मग्र्यं मुनिरासुरये ऽनुकम्पया प्रददौ (सा० त० कौ० ६९, ७०)"–इति । 'परमर्षिणा कपिलेन'–इति च तत्र वाचस्पतिमिश्रकृता टीका । प्रवचनभाष्येऽप्युक्तम्— "आदिविद्वान् निर्माणचित्त मधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच (१. २५.)"–इति ।

पाशुपतदर्शनकाराच्चासौ भाष्यकारः कनीयान् । अत एव तत्कृतेऽत्र महाभाष्ये दृश्यते— "शिवभागवतः (५ अ० २ पा० १ आ०)"–इति पदम् । "भगवान् भक्तिरस्य भागवतः, शिवस्य भागवतः इति षष्ठीसमासः"–इति च तत्र व्याख्यातं कैयटेन । एवं मिश्र "सौर्यभगवता उक्तम् (८ अ० २ पा० २ आ०)"–इति

दर्शनाच्चावगम्यतेऽस्य पतञ्जलेः सौरसम्प्रदायारम्भाच्च परभवत्व मेव ; सौर-सौर्ययोर्न श्लेव भेदः। वस्तुतः सौरसम्प्रदायः खलु शैवसम्प्रदायादपि बहुपुरातन एवेति प्रामाणिकाः।

चार्वाकादिनास्तिकदर्शनशास्त्राणि तु बहुपुरातनान्येव न वेत्यत्र स्यात् विचार्यम्, परं नास्तिकभावः खलु पाणिनिकालेऽपि स्थित एव। अत एव स हि सूत्रयामास— "अस्तिनास्तिदिष्टं मतिः (४. ४. ६०.)"-इति। मनुसंहितायां मपि नास्तिकशासनवचनानि सन्त्येव, तानि चानुपदं प्रदर्शयिष्यामः। पतञ्जलिनापि स्वस्य नास्तिकमतज्ञता प्रकाशितैव। तथाहि— "किञ्च भोः श्लोका अपि प्रमाणम् ? किञ्चातः ? यदि प्रमाणम्, अथ मपि प्रमाणं भवितु मर्हति—

"यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत् स्वर्गं किन्तु क्रतुगतं नयेत्'-इति।

प्रमत्तगीत एषः। भवतो यस्त्वप्रमत्तगीतः तत् प्रमाणम् (१ अ० १ पा० १ आ०)"-इति। "यदुदुम्बरेति। अयं श्लोकः सौत्रामणीयागे सुरापानस्य दुष्टत्व मुद्भावयति। प्रमत्तगीत इति। प्रमादेन विप्रतिपन्नत्वेन गीत इत्यर्थः"-इति च तत्र कैयटः। अस्माभते तु 'उदुम्बरवर्णानाम्' उदुम्बरकाष्ठनिर्मितानाम्, 'घटीनाम्' अहेतिप्रसिद्धानां सोमपात्राणां 'यत् महत् मण्डलम्' शुक्र-मन्थादिसमूह माध्वर्यवे प्रसिद्धम्, तत् 'पीतं' सत् पानकारिणं 'स्वर्गं न गमयेत्' 'किन्तु' 'क्रतुगतं नयेत्' क्रत्वनुष्ठानस्यैव पूर्णतां प्रापयेदिति तदर्थः। तदिदं श्लोकवचनं वक्तुः प्रमत्तता मेवावेदयति; अनुष्ठान सिद्धित एव स्वर्गसिद्धेः। एवञ्चेदृत्यः प्रमत्तशब्दो नास्तिकपर एव भाष्यकाराभिप्रेतः।

काश्मीरेन्द्रात् जलूकाख्याय मर्वाचीनः। यतो श्रुतम् "यत्तेन कृतं न च प्रोक्तम्— वाररुचं काव्यम्, जालूकाः श्लोकाः (४ अ० ३ पा० १ आ०)"–इति। एष च वररुचिः कात्यायन एव; स एव व्याकरणस्य वार्त्तिककारः; पतञ्जलेरस्य तत्परभवत्वे कोऽस्ति विचारः; परं जलूकेन राज्ञा कृताः श्लोका अप्यस्य महाभाष्यकारस्य पतञ्जलेरासीद् विदिता इतीयं ततोऽपि परावीनत्वं व्यक्तम्।

वार्त्तिककार-कात्यायनात् परभवत्वस्यास्याविचारित मपि सिद्ध मेव, परं ततो बहुकालकृतावरजत्व मस्येत्यपि प्रतीयत इति तु प्रदर्शनीयम्। तथाहि पठितश्चेदं वार्त्तिकम्,— 'ढ-यङ्गणि सानुबन्धस्योपसङ्ख्यानम्" (पा० ४. १. १५.)"–इति; "कथं स्त्री नाम सभायां साध्वी स्यात्"–इत्युक्त्वा च (४ अ० १ पा० २ आ०) खण्डितं तद्वार्त्तिकम्। "यज्ञसभायां विदुषा मेव पुरुषाणां साधुत्वाधिकारादिति भावः"–इति च तत्राह तट्टीकाकारः कैयटः। तथाचेदं सुव्यक्त मेव,— कात्यायनकाले यज्ञसभादौ स्त्रीणां गमनं न दोषावह मासीदिति तेन पठितं तथा वार्त्तिकम्; पतञ्जलिसमये तु यज्ञसभादौ स्त्रीणां गमनं दोषावह मेवेति परिष्कृतं तदिति। न चाल्पेनैव कालेन सामाजिकव्यवहारान्यत्वं सम्भवतीयं सिद्ध मेव वार्त्तिककाराद् बह्ववाचीनोऽयं पतञ्जलिरिति।

(मनुसंहिता) मनुसंहिता तु या खलु सूत्रनिबद्धा, सैवातिप्राचीना, मानवकल्पसूत्रादिभिः समानवयस्का, समानमाना च। महाभाष्ये (१ अ० १ पा० ७ आ०) यदुक्तं "नैव ईश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति"–इति, तस्मादृग्

मन्वाद्यभिप्रायेणैव। इदानीं प्रचलितो मनुसंहितेति प्रसिद्धो ग्रन्थस्तु भृगुप्रोक्त इति भृगुसंहितेत्येव व्यवहार्यः; परं ज्योतिषशास्त्रे भृगुसंहितेति ग्रन्थविशेषस्य, इतोऽपि प्राचीनस्य दृष्टचरत्वात् न तथा व्यवहृतोऽयं लोकैः। एतस्य ह्युपक्रमे प्रत्यध्यायावसाने चास्य भृगुप्रोक्तत्वं स्पष्ट मेवेति न च तत्रास्ति प्रमाणप्रदर्शनापेक्षेति। तदुक्तं साङ्ख्यीयकौमुदीप्रभायां स्वप्नेश्वरेणैतत्, "पञ्चशिखः सूत्रकारः आसुरिशिखः; कापिल मिति प्रसिद्धिस्तु सम्प्रदायप्रवृत्तेः; भृगुप्रोक्तसंहिताया मिव मनुसमाख्या"–इति।

तस्येतस्य मनुसंहितेतीदानीम्प्रसिद्धस्य भृगुसंहिताग्रन्थस्य विशेषतः प्रणयनकालनिर्णयोऽपि दुष्कर एव; सामान्यतस्त्वेष संहिताकारः बौद्धधर्म्मप्रचारकात् शाक्यमुनेः, रामायणप्रणेतुरादिकवेर्वाल्मीकाच्च प्राचीनतमः, वार्त्तिककारकात्यायनात्तु परावीन इत्येव वक्तुं शक्यते। यतश्चात्र संहितायां महाभारते इवाहिंसाधर्म्मो विशेषतो नोपदिष्टः, न च बौद्धधर्म्मप्रकाशितनिर्वाणमुक्तिप्रसङ्गश्च, अत एवास्याः बौद्धधर्म्मप्रचारात् प्राचीनत्व मवगम्यते। बौद्धधर्मप्रचारोत्तरप्रकाशिते हि महाभारतेऽहिंसाधर्म्मो निर्वाणमोक्षश्चेत्येतावप्युक्तौ स्याताम्। तदत्र—

"बहूनां यज्ञतपसा मेकार्थानां पितामह!
धर्म्मार्थं न सुखार्थं कथं यज्ञः समाहितः?"–इत्यादिः,
अहिंसा सकलो धर्म्मो हिंसाधर्मस्तथाहितः।
सत्यस्तेऽहं प्रवक्ष्यामि यो धर्म्मः सत्यवादिनाम्"–इत्यन्तश्च द्रष्टव्यः।
(महा० भा० शा० प० २७१ अ० १–२० श्लो०)।

अग्निवध्याये यज्ञगतवधस्यापि दुष्कृतत्वं वधत्वञ्च वर्णितम्। तदेतन्महाभारतकारस्य बौद्धसंसर्गजफल मेवावबुध्यते।

मनौ तु— "मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने"-इत्युपक्रम्य त्रिंशच्छ्लोकेषु मांसस्य भक्षणवर्जने विहिते (५ अ० २६-५६ श्लो०)। तत्र हयामांसभक्षणे प्रवृत्तिश्चेत् भक्षयतु, निवृत्तिश्चेत् महाफल मित्येव प्रतिपादितम् (५६)। देवपित्रुकृत्यादौ तु मांसभक्षणे न कोऽपि दोष उक्तः (३२); मधुपर्कादौ तु विहित मेव मांसभक्षणम् (४१), यज्ञादौ तु कृता हिंसा, अहिंसैवेत्यपि कथितम्। अत एव ब्रूमः,— अहिंसाविधेः प्रशंसनान्महाभारतस्य शाक्यबुद्धपरत्वम्, तथैव हिंसाविधेर्विधानाच्च मनोस्तत्पूर्वजत्व मपीति। एवं भीष्मपर्वणि (२८अ० २६श्लो०)—

"कामक्रोधविमुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्म निर्वाणं वर्तते विदितात्मनाम्"-इत्यादि।

मनौ तु प्रथमाध्याये त्रिषु श्लोकेषु (१०४-१०६) यानि फलान्युक्तानि, न तत्रास्ति निर्वाणं नाम; तत्रैव द्वादशाध्यायेऽपि "प्राप्यते ह्यमृतं ततः (८५)"-इत्येव, "स्वाराज्य मधिगच्छति (९१)"-इति। "नैःश्रेयस मिदम् (१०७)"-इत्यादीन्येव च दृश्यन्ते, परं न क्वापि बौद्धप्रचारितं निर्वाणपद मिति। तदेवं शाक्यस्य ज्ञानलाभात् पूर्वं मेवेदं शास्त्र मिह प्रथित मित्यत्र नैव संशयः।, शाक्यज्ञानलाभस्तु खी० पू० ५८८ वर्षेऽभूदित्येव निर्णीतम्। न खलु कस्य चिदपि धर्मशास्त्रस्य शतवर्षाद्ध्वानकाले एव भवेदभ्युदयः, नापि तन्न्यूनतो वा भवेत् प्रभावाल्पत्वम्, न च तत्प्रभावाल्पत्व मन्तरा अन्यधर्मे मतिर्भवति कस्यचिदपीत्यन्यधर्मशास्त्रोत्थानसम्भवः। अतः शाक्यमुनिकालादल्पूनशताब्दीत्रयपूर्वं मेवेदं मानवं धर्मशास्त्रं समुत्पन्न मिति च सुतरां सम्भवति।

अपि नाम रामायणलिपिस्तु शाक्यमुनेर्जन्मतः पुरैवेति अध्यापक-लासेनादीना मपि सम्मतम्। तत्र मनुवचनोद्धृतिदर्शनात् मनुसंहितायाश्चास्यास्तत्पूर्वकालिकत्वञ्च सुव्यक्तम्। तद्यथा तत्र किष्किन्धाकाण्डे (१८, ३०-३२.)—

"श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ।
गृहीतौ धर्म्मकुशलैस्तथा तच्चरितं मया।
राजभिर्धृतदण्डाश्च कृत्वा पापानि मानवाः।
निर्म्मलाः स्वर्गं मायान्ति सन्तः सुकृतिनो यथा।
शासनाद्वापि मोक्षाद्वा स्तेनः पापात्प्रमुच्यते।
राजा त्वशासन् पापस्य तदवाप्नोति किल्बिषम्"-इति।

राजभिर्धृतदण्डाश्चेत्यादी श्लोकौ तु मनुसंहिताया अष्टमाध्याये (३१६. ३१८.) दृश्येते एव। तदेव मपि प्रतीयते मनुसंहिताया: समुत्पत्तिर्नूनं शाक्यबुद्धजन्मतो बहुपूर्वं मेवेति।

किञ्च H. H. उद्दलनन्-महोदयस्य विचारतो ज्ञायत एवैतत्,— जलूकाख्यो नरपतिरासीत् खीष्टजन्मतः पूर्वं सप्तमशताब्द्या मिति; राजतरङ्गिणी-प्रथमतरङ्गीयत्रयोदशश्लोकदर्शनाच्चावगम्यते आसीत् स शैव इति। तथाहि—

"विजयेश्वरनन्दीशचेत्रज्येष्ठेशपूजने।
तस्य सत्यगिरो राज्ञः प्रतिष्ठा सर्वदाभवत्"-इति।

तदेवं जलूककाले विजयेश्वरादिलिङ्गनामस्मरणात् ततः पूरैव शैवधर्म्मः सुप्रचलित आसीदित्यपि व्यक्तम्। एवं हि शैवधर्म्मप्रचारोऽवश्यं खीष्टजन्मतो ऽन्यूनाष्टशताब्दीतोऽपि पूर्वं मभवदित्युक्ते न कश्चिद्दोषो लक्ष्यते। मनुसंहिताकालं यावत् नैव शिवोपासनोद्भूता; सत्यां हि तस्या मवश्य मेव मनौ शिवपूजाप्रका-

रादिक मुपदिष्टं दृश्येतैव ; नात्र तु क्वचित् प्रसङ्गतोऽपि शिव-पूजाविधिराख्यातः ; "मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्। वाचग्निं मित्र मुत्सर्गे प्रजने च प्रजापतिम् (१२०, १२१.)"-इतिदर्शनात्तु बलाधिष्ठातृत्वं हरस्येति मनुसंहिता-कारसम्मत मित्येव बुद्ध्यते, तथा चन्द्रादेश्च मनोऽधिष्ठातृत्वा-दिकम् ; परं नेत्थं शिवलिङ्गस्थापनपूजनादीनि तत्समयं यावत् प्रचलितानि ज्ञायन्ते। तथाच शैवधर्माविर्भावाच्च प्रागेव प्रणी-तैषा संहिता भृगुणा मनुप्रणीतधर्म्मसूत्रानुसारत इति स्फुटम्। एवं हि कलेरत्यधिकत्रयोविंशशताब्द्याम्, खीष्टजन्मतोऽन्यूनवम-शताब्द्यां मनुसंहिताया: प्रणयनं सम्यक्त्र मिति।

यद्युच्येत,— मनुसंहितायाम् "पाषण्डिनो विकर्म्मस्थान् (४ अ० ३० श्लो०)"-इत्यस्य व्याख्यानावसरेऽवदत्तटीकाकार: कुल्लूक:— 'पाषण्डिनो वेदशास्त्रव्रतलिङ्गधारिण: शाक्यभिक्षु-क्षपणकादय:'-इति ; तथाच बौद्धधर्म्मप्रादुर्भावकालजत्व मेवास्या: संहिताया: सम्भवते ? इति। अत्र ब्रूम: ;— तथोक्त्या तस्यैव कुल्लूकस्याधुनिकत्वं प्रकटितम् ; किं तेन मूलकारस्य ? मूले हि न क्वचिदपि तादृग्र आभाषोऽपि दृश्यते। वस्तुत: कुल्लूक-भट्टकृता मनुटीका नातिप्राचीना, नैव समीचीना ; तत: क्वचित् क्वचित् तत्र व्याख्यादोषोऽपि लक्ष्यत एव। तथाहि -- मनुसंहिताया: सृष्टिप्रकरणे "मध्ये व्योम दिशश्चाष्टावपां स्थानञ्च शाश्वतम् (१. १३.)"-इति व्याख्यानावसरे तूक्तं तेन 'समु-द्राख्य मपां स्थानम्'-इति, पुनश्चाग्रे "सरित: सागरान् (१. २४.)"-इति व्याख्यानावसरेऽप्युक्तम् 'सागरान् समुद्रान्' -इत्येव। तदेवं कथिते पुनरुक्तिदोषो भवति ; अपि पूर्वत्र 'मध्ये'

–इत्युक्तम्, दिग्व्योम्नोः साहचर्यमास्ति; तदेतानि तेन नैवालोचितानि। अस्माभिस्तु पूर्वत्र माध्यमिकं जलस्थान मेवेष्टम्। मेधातिथिनाप्युक्तं तथैव "अपां स्थानम्= अन्तरिक्षे समुद्रम्"–इति (१. १३.)। इतोऽप्याश्चर्यं मेतत्,— प्रथमेऽध्याये "पाषण्डगणधर्म्मांश्च (११८.)"–इतिव्याख्याने सः स्वयमेवोक्तवान् कुल्लूकः— 'पाषण्डिनः= विकर्म्मस्थान्–इत्यादयः (४. ३०.), तेषां पृथग्धर्म्मानभिधानात्'–इति; चतुर्थाध्याये तु पूर्वं मुक्तं विस्मृत्यैव किं व्याचष्टे 'पाषण्डिनः= वेदबाह्यव्रतलिङ्गधारिणः शाक्यभिक्षुक्षपणकादयः, विकर्म्मस्थाः= प्रतिषिद्धवृत्तिजीविनः'–इति।

अपि नाम कुल्लूकभट्टकृत-प्रथमाध्यायीय-व्याख्यानानुसारत एवास्य चतुर्थाध्यायीयवचनस्य व्याख्यानं भवेच्चेत्, तथापि विकर्म्मस्थादीनां तच्छ्लोकाभिहितानां मेवात्र पाषण्डित्वेन ग्रहणं व्यज्येत? न तु शाक्यादीनाम्। तत् तेनैवात्र कथं मुक्तं मेव मिति च नूनं विचार्यम्। विचार्यते चास्मिन् मेधातिथिकृतव्याख्यानानुसारित्वं मेवात्र कुल्लूकस्येष्टे स्वोक्तविस्मरणे निदानं मुपलभ्यते। मेधातिथिर्नाम मनुटीकाकारस्तु नूनं भागवतपुराणप्रचारादुत्तरभवः; भागवतमपि तत् शाक्यबुद्धधर्म्मप्रचारात् परावीन मेव। श्रीधरस्वामिना च बोधितं तत्र भागवते शाक्यादिमतानुगाना मेव पाषण्डित्वम्। तथाहि (भाग० पु० ४. १८. २३–२५.)—

"यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया।
तानि पापस्य षण्डानि लिङ्गं षण्ड मिहोच्यते।
एव मिन्द्रे हरत्यश्वं वैण्ययज्ञजिघांसया।
तद्गृहीतविसृष्टेषु पाषण्डेषु मतिर्नृणाम्।

धर्म्म इत्युपधर्मेषु नग्नरक्तपटादिषु ।
प्रायेण सज्जते भाक्ष्या पेशलेषु च वाग्मिषु''–इति ।

''नग्नाः = जैनाः , रक्तपटाः = बौद्धाः, आदिशब्देन कापालिकादयश्च''–इति च तत्राह श्रीधरः । तदेतत् पाषण्डलक्षणमेवानुलक्ष्य भाषित मिह तेन मेधातिथिना — ''पाषण्डिनो वाह्यलिङ्गिनो रक्तपटनग्नचरकादयः''–इति । कुल्लूकस्तु श्रीधरकृतां तां भागवतटीकां संस्मृत्य , मेधातिथिकृता मेतांश्च मनुटीकां संलक्ष्यैव विससार मनुप्रथमाध्यायीयं स्वकृत मपि व्याख्यानम् ,— तत एवोक्तम् 'पाषण्डिनो वेदवाह्यव्रतलिङ्गधारिणः शाक्यभिक्षुक्षपणकादयः'–इति ।

वस्तुतो ये खलु लोकविमोहनार्थं यथासमयं यथेच्छधर्म्मचिह्नानि धारयन्ति , त एव पाषण्डाः ; अत एवोक्त ममरसिंहेन— ''पाषण्डाः सर्वलिङ्गिनः (२. ७. ३५.)''–इति । एवञ्च पाषण्डाः खलु नास्तिका एव गम्यन्ते । ते तु चिर मेव स्थिताः ; ततश्चैतन्मनुसंहिताकालेऽपि तादृशनास्तिकाना मस्तित्वे कोऽस्ति शङ्कावसरः ? नास्तिकानां यत्याश्च पुरा बहव आसन्नित्यपि प्रतीयते । अत एवोक्त मेवम्— ''योऽनधीत्य द्विजो वेद मन्यत्र कुरुते श्रमम् (म० सं० २. १६८.)''–इत्यादि । 'अन्यत्र = नास्तिकादिशास्त्रे'–इत्येव मेवात्रास्मद्गुरुपदेशः । पातञ्जले महाभाष्येऽपि दृष्टं प्रदर्शितञ्च पुरस्तात् ''यदुदुम्बरवर्णानाम् (८७ पृ०)''–इत्यादि । स श्लोकोऽवश्यं कुतश्चिन्नास्तिकागमादेव पतञ्जलिना स्यादुद्धृतः । सर्वदर्शनकारसङ्गृहीताः चार्वाकदर्शन मिति प्रदर्शिताः 'न स्वर्गो नापवर्गो वा'–इत्यादयः श्लोका अपि नास्तिकागमनिदर्शनभूता एव । तादृशानां नास्तिकाना

मेव पाषण्डिन इति पदेन तत्र मनुश्लोके ग्रहण मिष्टम् ; अतिथि-भावापन्नानाञ्च तेषां वाङ्मात्रालापेनाप्यर्चनं न कार्य्य मित्येव तद्विधे-राशयः। ये तु न नास्तिकाः पर संसर्गदोषादिभिः विकर्म्मस्थाः, किञ्च ये केचित् आस्तिका अपि उदरपूरणाद्यर्थं वैडालव्रतिकादयः मन्यन्ताः ; तैश्च सम्बन्धः परित्याज्य एवेति च तच्छ्लोकाशयः। तदेव मत्र श्लोके शाक्यबुद्धगन्धो ऽपि न लभ्यतेऽस्माभिस्तत्किं कुर्मो वदाम एवैतद्ग्रन्थोऽपि शाक्यजन्मतो बहुपूर्व मेव जातोऽयं मनु-संहिताकार इति ॥

एतत्संहितासमालोचनादेतदप्यवगम्यते ,— सोऽयं भृगुः, योग-सूत्रकृतः आदिपतञ्जलेः , वेदान्तमतपोषकभिक्षुसूत्रकृतः पारा-शर्याद् व्यासात् , मीमांसादर्शनीयादिसूत्रकृतः काश्यकृत्स्नेरपि जैमिनेश्च , वैशेषिकसूत्रकृतः कणादात् , न्यायसूत्रकृतो गौत-मात् , साङ्ख्यसूत्रकृतः कपिलात्तच्छिष्यादासुरेश्चावरज एवेति। समासतः प्रदर्शयामश्चैतत् क्रमेण।—

षष्ठेऽध्याये यतिधर्म्मप्रकरणे— 'अङ्गा रावया'-इत्यादिचतुर्दश-श्लोकानाम् (६९-८२), विशेषतश्च तेष्वेव 'प्राणायामैर्दहेद् दोषान् धारणाभिश्च किल्बिषम्। प्रत्याहारेण संसर्गान् ध्याने-नानीश्वरान् गुणान् (७२)'-इत्यस्य, पुनः सप्तमेऽपि— "इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् (४४)'-इत्यस्य च दर्शनात् ज्ञायत एव ,— आदिपतञ्जलिकृताद्योगशास्त्रात् परस्तात् प्रणीतेयं संहितेति।

तत्रैवाग्रे "आध्यात्मिकञ्च सततं वेदान्ताभिहितं च यत् (८३)'-इति, 'वेदान्तं विधिवच्छ्रुत्वा (८४)'-इति, पुनः सप्तमे ऽपि— 'आत्मविद्याम् (४३)'-इति, पुनर्द्वादशेऽपि 'सर्व मात्मनि

सम्पश्येत् सत्त्वासक्त समाहितः। सर्वं ह्यात्मनि सम्पश्यन् नाधर्मे कुरुते मनः। आत्मैव देवताः सर्वा सर्वं मात्मन्यवस्थितम्। आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्'–इति (११८, ११९) च। तदेवमादीनां दर्शनात् ज्ञायत एव,— पाराशर्यव्यास-कृताद् वेदान्तशास्त्राच्च परस्तात् प्रणीतेयं संहितेति।

मीमांसामूलिकाया एवास्या धर्मसंहिताया मीमांसापरजत्व-प्रमाणाय त्वल मायासेनेति।

अस्ति सप्तमेऽध्याये 'आन्वीक्षिकीञ्च (४३)'–इति, द्वादशे 'तर्की (१११)'–इति च। एवमादीनां दर्शनात् ज्ञायते वैशेषिक-सूत्रेभ्यो न्यायसूत्रेभ्यश्च परस्तात् प्रणीतेयं संहितेति।

प्रथमेऽध्याये षष्ठ-चतुर्दश-पञ्चदश-षोडशश्लोकानां दर्शनात्, द्वादशाध्याये पुनः साङ्ख्योक्तप्रमाणत्रयाणा मेव स्मरणाच्चावगम्यते संहितेय मवश्यं साङ्ख्यशास्त्रात् परं प्रणीतेति च। इह च द्वादशा-ध्याये दशावरापरिषद्विधौ (१११ श्लो०) यद् दृश्यते 'हैतुकः'–इति पदम्, तत् साङ्ख्यविद एव बोधकम्; साङ्ख्यस्यैव हेतुशास्त्रत्वात्। दृश्यते हि— "मूले मूलाभावादमूलं मूलम् (सा० प्र० १. ६७)" –इति (१. ६१) साङ्ख्यसूत्रम्, 'प्रकृतिरिह मूलकारणस्य सञ्ज्ञा-मात्रम्'–इति च विज्ञानभिक्षुकृतं तत्सूत्रीयम् भाष्यम्, "मूलं प्रकृतिरविकृतिः'–इतीश्वरकृष्णवचनञ्च; एवमादीनां दर्शनात् साङ्ख्यशास्त्रस्य मौलिकत्वं प्रतीयते सम्यगेव। अत्रैवैकं मूलम् "ईश्वरासिद्धेः (१. ९२)"–इति; तदेवमादीनां पर्य्यालोचनया नास्तिक्यसम्पादन मपि सुकर मिति मत्त्वैवोक्त मिह भृगु-प्रोक्तायां मनुसंहितायाम्— "योऽवमन्येत ते मूल हेतुशास्त्राश्रयाद् द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः; (२. ११.)"

–इति । अपरञ्चेकं सूत्रं साङ्ख्यस्य— 'सिद्धरूपत्वोक्तत्वादाख्यार्थोपदेशः (१. ९८.)'–इति, 'तस्मादपि चासिद्धं परोक्तं मानागमात् सिद्धम्'–इति च तदनुगता ऐश्वरकृष्णीयकारिका ; तदेवमादिभ्यः प्रतीयत एव साङ्ख्यदर्शनस्य वेदानुगतत्वञ्च । अत एव मनुसंहितायां दशावरायां साङ्ख्यविदोऽपि नियोगो विहितो 'हैतुकः'–इति (१२. १११) । पाणिनिवार्त्तिककाराश्च कात्यायनात् परभवत्व मस्या अनुपद मेव प्रतिपादयिष्यामः ; तेन च कात्यायनेनोक्तं वार्त्तिकम्— 'आसुरेरुपसङ्ख्यानम्'–इति (पा० ४. १. १९. वा०)"–इति ; ततश्चास्यासुरिपरभवत्व मविचारित मपि सम्पद्यते । तदेवं प्रदर्शितनामभ्यः षड्भ्योऽपि दर्शनशास्त्रेभ्योऽर्वाचीनैवा मनुसंहितेति स्फुट मवगम्यत एवेति ॥

एषाञ्च षण्णां दर्शनानां पौर्वापर्यविषये बहव एव वादा उपलभ्यन्ते । अस्माभते तु साङ्ख्यदर्शनस्यैवास्तिकदर्शनेषु प्राथम्यम् ; साङ्ख्यप्रथमाचार्यस्य कपिलस्यैव "आदिविद्वान्"–इति प्रसिद्धेः । तादृशप्रसिद्धौ चाय मेव हि हेतुरुपलभ्यते,— यद्यपि सर्वविद्यानिधानेषु वेदेषु दार्शनिकभावा अपि चिरादेव स्थिताः, परं पृथक्त्वेन दर्शनशास्त्रस्य प्रचारस्तु तैनैव विदुषा प्रथमं प्रारब्ध इति । भागवतादौ भगवदवतारेषु वर्णितक्रमदर्शनाच्चावगम्यते— "आन्वीक्षिकी"–नाम-पदार्थविद्यायाः प्रथमोपदेशकात् आत्रेयाच्चायजोऽयं हि कपिल इति । तथाहि भाग० पु० १. ३. १०, ११—

"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम् ।
षष्ठ मत्रेरपत्यत्वं हृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकी मलर्काय प्रह्लादादिभ्य ऊचिवान्"–इति ।

सेवान्वीक्षिकी विद्यैव इदानीं प्रचलितानां न्यायवैशेषिक-वेदान्तसूत्राणां बीज मिवेत्यनुमीयते ; स्मर्यते हि जैमिनीयमीमांसायां बादरायणनामकीर्त्तनात् पुर एवात्रेयनाम। तथाहि—

"मुख्यानन्त्यं मात्रेयः ०—०।

अन्ते तु बादरायणः ०—०"–इति मी० द० ५. २. १८, १९।

बादरायणस्तु वेदान्तसूत्रकृदित्येव प्रसिद्धः। वेदान्त-न्याय-वैशेषिक-जैमिनीय-मीमांसासूत्राणाञ्च समकालिकत्वञ्चभ्युपगम्यते। अतो निरवद्य मेवैतदुक्तं साङ्ख्यदर्शन मेव सर्वप्रथम मिति।

अत एव श्लोक्यते च श्वेताश्वतरोपनिषदि (५. २ ; ६. १३.)—

"ऋषिं प्रसूतं कपिलं यस्त मग्रे, ज्ञानैर्बिभर्त्ति०"–इत्यादि,

"नित्योऽनित्यानां चेतनश्चेतनाना मेको बहूनां यो विदधाति कामान्। तत् कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः"–इति।

"न वयं षट्पदार्थवादिनो वैशेषिकादिवत् (१अ० २५ सू०)"

–इति साङ्ख्यसूत्रन्तु द्वितीयकपिलस्य वा पञ्चशिखाचार्यस्य वा भवितु मर्हति। तथा चैतत्सूत्रदर्शनात् साङ्ख्यशास्त्रीयषड्ध्याया एव वैशेषिकादि परजत्वं सिध्यति, न तु साङ्ख्य दर्शन तत्पूर्वजस्य। उक्तं हि कौमुदीप्रभायाम्— "पञ्चशिखः सूत्रकार आसुरिशिष्यः। कापिल मिति प्रसिद्धिस्तु सम्प्रदायप्रवृत्तेः भृगुप्रोक्तसंहिताया मिव मनुसमाख्या"–इति। किञ्च "य माहुः कपिलं साङ्ख्याः परमर्षिं प्रजापतिम्। स मन्थे तेन रूपेण विभ्रापयति हि स्वयम् (शा० मो० प० २१८ अ० ८श्लो०)"

–इतिमहाभारतीयश्लोकव्याख्याने नीलकण्ठोऽप्याह— "स कपिलः, तेन पञ्चशिखसम्बन्धेन तत्पञ्चशिखत्वात् तत्तुल्यत्वम्"–इति। तत्त्वसमासव्याख्यायां सर्वोपकारिण्यां तु सुस्पष्ट मेवोक्तं कपिल-

दिकादिकम्। तथाहि – "अथाज्ञानादिक्लेशकर्मवासनासमुद्र-निपतितानाथदीनानुद्दिधीर्षुः परमकृपालुः स्वतःसिद्धतत्त्वज्ञानो महर्षिर्भगवान् कपिलो द्वाविंशति सूत्राणि उपादिक्षत्। ०—०। सूत्रषड्ध्यायी तु वैज्ञानिकावतारभगवत्कपिलप्रणीता; इयन्तु द्वाविंशतिसूत्री तस्या अपि बीजभूता नारायणावतारमहर्षिभगवत्क-पिलप्रणीतेति बुधाः"–इति। विज्ञानभिक्षुकृतसाङ्ख्यप्रवचनभाष्या-दावेव मेवावगम्यते। तथाहि – "तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं साङ्ख्यदर्शनम्, तस्यैव प्रकर्षेणाख्यां निर्वचनम्"–इत्यादि।

आदिपतञ्जलिनापि कृतं योगशास्त्र मादिमाङ्ख्यपरज मेव। अत एवोक्तं दृश्यते साङ्ख्यप्रवचनभाष्ये— "तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं साङ्ख्यदर्शनम्, ०—०, षड्ध्याय्यां तत्त्वसमासाख्योक्तार्थ-विस्तरमात्रम्; योगदर्शने त्वाभ्या मभ्युपगमवादप्रतिषिद्धस्यैवे-श्वरस्य निरूपणेन न्यूनतापरिहारोऽपीति"–इति। वेदान्त-दर्शने तु "एतेन योगः प्रत्युक्तः (२. १. ३.)"— "योगिनः प्रति च स्मर्यते (४. २. २१.)"–इत्यादिदर्शनात्, तस्य योग-शास्त्रादप्यवरजत्वं सुव्यक्त मेव।

कणादगौतमकृतयोः सूत्रात्मकयोर्वैशेषिकन्यायशास्त्रयोः स-मानतन्त्रत्वन्तु सर्वसम्मत मेव। तत्त्वतो न्यायशास्त्रे २. ६८; ४. २५; ८७ सूत्रेषु वेदान्तमतपरिदर्शनात् वेदान्ते च २. २. ११, १३, १४ सूत्रेषु न्यायवैशेषिकमतदर्शनात्,— तथा वेदान्ते "साक्षादप्यविरोधं जैमिनिः (१. २. २८.)"–इत्यादिषु जैमिने-र्नामकीर्त्तनात्, मीमांसायाश्चाध्यप्रचलितायां "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः०—० बादरायणस्यानपेक्षत्वात् (१. १. ५.)" –इत्यादिषु बादरायणस्योल्लेखात् न्यायवैशेषिक-वेदान्त-मीमांसा-

सूत्रकाराणां सनकालिकत्व मेव गम्यते। तत्रापि आत्रेयकृता आन्वीक्षिकी, काशकृत्स्नकृता मीमांसा च एभ्यो बहुप्राचीनैव; तयोर्विरलप्रचारकाले एवाद्यप्रचलितानां वेदान्तादीनां जैमिनीय-मीमांसायाश्च प्रयोजनीयत्वात्।

सिद्ध मित्यम् साङ्ख्यदर्शनाविष्कर्तुः कपिलस्यैव दर्शनकारेषु प्राचीनतमत्वम्; आदिपतञ्जलेस्तत्परजत्वम्; आत्रेयस्य, काश-कृत्स्नस्येव ततोऽवरजत्वम्; कणभक्षाक्षचरणपाराशर्यजैमिनीनां ततोऽप्यर्वाचीनत्व मिति॥

(कात्यायनः) सैषा शैवमतप्रभवात् पाशुपतदर्शनादद्यजा, प्रदर्शितसाङ्ख्यादिदर्शनेभ्यश्चानुजा, मनुसंहितेति प्रथिता, भृगु-संहिता, कात्यायनकृताद् वार्त्तिकसूत्राच्चावरजैवेत्यसकृदुक्तं पुर-स्तात्, क्रमप्राप्तं तदेवेहोपपादयामः।

तथाहि—"शूद्राणा मनिरवसितानाम्"-इति (२. ४. १०.) सूत्रस्य भाष्ये, "पृषोदरादीनि यथोपदिष्टं तथैव साधूनि" -इति (६. ३. १०९.) सूत्रीयभाष्ये च दृश्यते तावदेतदार्या-वर्त्तलक्षणम्— "प्राक् आदर्शात्, प्रत्यक् कालकवनात्, उत्त-रेण हिमवन्तम्, दक्षिणेन पारियात्रम्"-इति। एतच्च लक्षणम्, सङ्ग्रहग्रन्थकारेण भगवता व्याडिनोपदिष्टम्, वार्त्तिककारकात्या-यनसम्मतञ्च पतञ्जलिनोद्धृत मिति ह्रस्वोपदेशः। एतल्लक्षणे विन्ध्यगिरेः पश्चिमस्थः पारियात्र एवार्यावर्त्तदक्षिणसीमेति गम्यते, अपि च सिन्धुसङ्गमात् पश्चिमसमुद्राद् बहुवश्चिमस्थ आदर्श एव पश्चिमसीमेति गम्यते, मगधराज्यस्य प्रत्यक् स्थितं वकासुरनिलय-मद्य 'वक्सर'-इति प्रसिद्धं कालयवनाश्रितं कालकवन मेव पूर्वसीमे-त्यपि गम्यते। मनूक्तार्यावर्त्तलक्षणे तु सिन्धुसङ्गमपश्चिमे न आर्या-

वर्त्तः ; अपि गङ्गासागर सङ्गमात्तत्रार्यावर्तः ; सत्येवं मनुकाले मगधापर पर्यायः कीकटोऽप्यार्यावर्त्तान्तर्गत एव। तथाहि— "आ समुद्रात् तु वै पूर्वादासमुद्राच्च पश्चिमात्। तयोरेवान्तरं गिर्योः (विन्ध्यहिमागमयोः) आर्यावर्त्तं विदुर्बुधाः (२. २२.)"–इति मनुः। तथाचेद मेवावधार्यते यावन्नामार्यावर्त्तोऽयं न हि पूर्वस्यां विस्तृतो नापि पश्चिमतः सङ्कुचितः, तावदेव जातः कात्यायनः, तदुत्तरभवश्च मनुसंहिताकारः स्वानुभूतानुरूप मेवार्यावर्त्तलक्षणञ्चकार पूर्वोक्त मिति।

शिष्टलक्षणहयदर्शनाच्चानयोस्तथैव पौर्वापर्य मवगम्यते। तथाहि— "धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः (१२. १०८.)"–इति मनुः। सङ्गृहकारलिखितं कात्यायनसम्मतत्वेवं दृश्यते शिष्टलक्षणम्— "एतस्मिन्नार्यावर्त्ते निवासे ये ब्राह्मणाः, कुम्भीधान्याः, अलोलुपाः, अग्रह्यमाणकारणाः किञ्चिदन्तरेण, कस्याश्चिद् विद्यायाः पारङ्गताः, तत्र भवन्तः शिष्टाः (६अ० ३पा० ३आ०)"–इति। एवञ्च कात्यायनकाले आर्यावर्त्तवासादेव शिष्टत्व मपि तदानीन्तनानां ब्राह्मणानां कुम्भीधान्यादित्वञ्च साधारणो धर्म इति गम्यते; मनुकाले तु विशेषतोऽध्ययनेनैव शिष्टत्व माप्यं स्थित मिति। तदेतल्लक्षणहयपर्यालोचनया चावगम्यते कात्यायनस्यैतन्मनुसंहिताकारात् पूर्वजत्वम्,— तत्रापि बहुपूर्वजत्वम्; न ह्यल्पपौर्वापर्यत एव एतादृशी साधारणाचारभिन्नता सम्भवेन्नामेति।

नास्तिकलक्षणहयालोचनेनाप्येव मेवावबुद्धते पौर्वापर्यम्। तथाहि— अस्त्येकं पाणिनिसूत्रम्— "अस्ति-नास्ति-दिष्टं मतिः" –इति (४. ४. ६०.)। "अस्तीत्यस्य मतिः— आस्तिकः,

नास्तीत्यस्य मतिः – नास्तिकः, दिष्ट मित्यस्य मतिः-- दैष्टिकः" –इति च तद्भाष्यम् (४अ० ४पा० ४आ०)। दिष्टम्= भाग्यम्। एतदेव साधारणं लक्षणं कात्यायनकालेऽपि स्थितं सर्वसम्मतम्। ततः परं क्रमात् शिथिलिते वेदविश्वासे पुनस्तद्दार्ढ्यायैवेदं समुद्भूतं लक्षणान्तरम्— "योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः (म० सं० २. ११.)"–इति। यदि हि नाम कात्यायनोऽयं मनुसंहिताकाराच्चाप्यादवरजः स्यात्, तर्हि एतदनुगतं वार्त्तिकञ्च नास्तिकादिविधायकसूत्रे उच्चेतैव; नच तथोक्तम्; तदेव मध्यगम्यते वार्त्तिकारकात्यायनस्यैतन्मनुसंहिताकारात् प्राचीनत्व मिति।

एव मिह मनौ आचारपर्यायो वृत्तशब्दः (५. १६६.); पूर्वं मृतेत्यर्थे 'पूर्वमारिणी' (५. १६७, १६८.)–इति; एवमादयश्च दृश्यन्ते, परं नैवमादिषु वार्त्तिककारस्यैतस्य कानिचिन्नूतनशासनान्युपलभ्यन्ते; यदि हि नामैतन्मनुसंहितातः परभवः स्यात् कात्यायनः, तर्ह्यवश्य मवक्ष्यदेव तथैव वार्त्तिकानि यथा सिध्येयुरेव वृत्तादीनि आचारादर्थेष्वपीति। अतश्च सिध्यत्येवैतन्मनुपूर्वजत्वं कात्यायनस्य।

एवं "वृषो हि भगवान् धर्मः, तस्य यः कुरुते वृषलम्। वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् (८. १६.)"–इत्येतच्च मनूक्तं निर्वचनं यास्कस्य त्वविदित मेव, कात्यायनवार्त्तिकपाठादपिपरस्तादुत्पन्नम्; अन्यथा हि नैवं ब्रूयाद् यास्कः,— "वृषलो वृषशीलो भवति, वृषाशीलो वा (२. ३. ४.)"–इति; न चेह मौन माचरेत् कात्यायनो ऽपिति। तदेवं मनुसंहितेतिप्रथितायाः किल भृगुसंहिताया अन्यूनशताब्दीत्रयपूर्व मेवा-

भवत् कात्यायनीयो वार्त्तिकपाठ इति सुवचम् ; न हि ततो न्यूनेन कालेन देशसीमपरिवर्त्तन माचारपरिवर्त्तनं नास्तिकलक्षणपरिवर्त्तनादिकञ्च सम्भाव्य मिति। सिद्ध मित्यम्-- कलेर्विंशशताब्द्याम् , खीष्टजन्मतः पूर्वं मन्यूनद्वादशशताब्द्याञ्चाभवत् व्याकरणवार्त्तिककारो भगवान् कात्यायन इति ॥

अपर मप्यस्मीह तावत् किञ्चिद् विचारयितव्यम् ।— कैश्चित् पुरातत्त्वानुसन्धित्सुभिः दाक्षिणात्येषु पाण्ड्यराज्यस्थापनं खीष्टजन्मतः पुरा षष्ठ्या मेव शताब्द्यां बभूवेति निर्णीतम् ; अस्ति च कात्यायनवचनम्— "पाण्डोर्ड्यण्"-इति (पा० ४. १. १६८. वा०) ; तथाचैतस्य कात्यायनस्य खीष्टजन्मतोऽत्यधिकपञ्चशताब्दीपूर्वजत्व मेव सम्पद्यते। नैतच्चतुरस्रम् ; खीष्टपूर्वाष्टमशताब्द्यां शैवमतं प्रचरित मित्यत्र तेषा मपि सम्मतिदर्शनात्। तादृशशैवमतप्रचारतोऽपि प्राचीनात् किल मनुसंहिताकारात् प्राचीनोऽयं वार्त्तिककारः कात्यायनः , कथङ्कारं स्यात् खीष्टपूर्वषष्ठशताब्दीतोऽपि परज इति ? अतः पाण्ड्यराज्यस्थापन मवश्यं बभूव खीष्टजन्मतो द्वादशाब्दीतोऽपि प्रागेव ; अथ वा "पाण्डोर्ड्यण्"-इत्यादिवचनानि नैव कात्यायनीयानि , अपि भाष्यकाराद्युत्तान्यनतिप्राचीनान्येवेति सर्वैर्मन्तव्यम् ; अन्यथा हि सर्वमते एव सर्वं भवेत् पिण्डीभूत मिति धीमद्भिरेव विचार्यं पूर्वापरदर्शिभिः समन्तादिति ॥

(यास्कः) तस्मादेतस्माच्च कात्यायनात् प्राचीनोऽयं यास्कः । तदत्र चत्वारो हेतवः ।— "अरण्यानी अरण्यस्य पत्नी"-इत्युक्त मिह निरुक्ते (९. ३. ८) ; यदि हि नाम वार्त्तिकग्रन्थात् पुरातनं न स्यादेतन्निरुक्तम् , तर्ह्यवश्य मेवैवं निरुच्येत

"अरण्यानी महदरण्यम्"-इति ; "हिमारण्ययोर्महत्वे"-इति (४. १. ४९. पा० वा०) वार्त्तिकानुरोधात् । एवञ्च सायण एव निरुक्तप्रणयनकालं यावत् नाभवद् वार्त्तिककार इति । यदा चाभूत् वार्त्तिककारः, तदा तु अरण्यपत्नीत्यर्थे अरण्यानीति व्यवहारो दूरङ्गतः, समुत्पन्नश्च महदरण्य मित्यर्थे अरण्यानीति ; तत एव प्रणीतं तत्कालानुगतं लक्षण मिदं 'हिमारण्ययोर्महत्वे'-इतीति प्रथमः ।

वेदे "सुकिंशुकम् (ऋ० सं० ८. ३. १३. ५)"-इत्येवमादौ श्रुतस्य 'सूर्या'-इति पदस्य पुंयोगानुगता सूर्यस्य पत्नीति व्याख्या नासीत् पाणिनिकाले प्रचलिता, ततो बहुकालेऽतीते तादृशव्याख्याने प्रचलिते जातोऽयं यास्को वेदे सर्वविधैर्बाहुल्यं पाणिनेरपि सम्मत मवेत्यालोच्य निरवोचत् "सूर्या = सूर्यस्य पत्नी"-इति (१२. १. ७.) ; तदृष्ट्वैवेदं वार्त्तिक मारचितम् "सूर्यादृ देवतायाम् चाप् (पा० ४. १. ४८ वा०)"-इति । इतश्चोभयं गम्यते— अस्य पाणिनितो बह्वर्वाचीनत्वम्, कात्यायनात् प्राचीनत्वञ्चेतीति द्वितीयः ।

अस्त्येव मत्र निरुक्ते जरयितेत्यर्थकं जारशब्दव्युत्पादनम्— "आदित्योऽत्र जार उच्यते, रात्रेर्जरयिता"-इति (३. ३. ४.) । नून मेतदृ दृष्ट्वैवेदं वार्त्तिक मारब्धम्—"दारजारौ कर्त्तरि ण्यिलुक् च"-इति (पा० ३. ३. २०. वा०) । एवमादिभ्योऽपि प्रतीयते यास्कस्य कात्यायनपूर्वजत्व मिति तृतीयः ।

चतुर्थस्त्वयं मतिप्रबलः— पाणिनिसूत्रेषु ऋणशब्दे परे वृद्धिविधानं न विद्यते, ततश्च पाणिनिकाले 'प्रर्णम्', 'अपर्णम्' — इत्यादयः प्रयोगा एवेष्टा इति गम्यते । ततो बहुकालान्तरे

जातोऽयं यास्कः, तदानीं क्वचित् क्वचिद् दृष्टियुक्तः प्रयोगोऽपि ऋणशब्देऽवश्यं प्रचलित इत्येवास्मिन् निरुक्ते लक्ष्यते "अपार्णम्" –इति(६. १. ८.) प्रयोगः। ततोऽतीते बहुकाले जातः कात्यायनः, तदानीं तेन हि षट्स्वेव स्थानेषु ऋणशब्दे दृष्टिः प्रचलिता दृष्टा, तथैवेमे वार्त्तिके पठिते— "प्रवत्सतरकम्बलवसनानां चर्णे"–इति, "ऋणदशभ्यां च"–इति च (पा० ६. १. ८८. वा०)। एताभ्यामेव वार्त्तिकाभ्यां सिद्धत्वेव प्रार्ण मित्यादीनि; परमपार्ण मितिपदस्य साधनाय न कश्चिद्यत्नेन कृतो दृश्यते, ततोऽवगम्यते तदानीं तथा व्यवहारो लुप्त एवेति। अतएवावश्यमेवं मन्तव्यम्— यास्कोऽयं पाणिनितो बहुर्वाचीनः, कात्यायनतस्तु बहुप्राचीन इति; नान्यथा ह्यपार्ण मिति नैरुक्त मुपपद्यते। यदि ह्ययं यास्कः कात्यायनतोऽप्यर्वाचीनः स्यात्, तर्ह्यवश्यं वक्ष्येदपर्ण मिति, सूत्रवार्त्तिककारयोस्तथैवानुशासनात्; यदि ह्ययं पाणिनितोऽपि प्राचीनः स्यात्, तर्ह्यवश्य मेव पाणिनिस्तथैव सूत्रं विदध्यात्, यथा च सिद्धं भवेदपार्ण मिति। तदेतदेक मेव पदम् यास्कसमयनिर्णये बहु मन्यतेऽस्माभिः "अपार्णम्— अपार्णम्— अपार्णम्"–इति॥

(पाणिनिः) यास्कस्य पाणिनिपरत्वे त्वन्येऽपि हेतवः समुपलभ्यन्ते। तथाहि— (१) निरुक्तस्यास्य प्रथमेऽध्याये एव (१. ६. १.) "परः सन्निकर्षः संहिता (पा० १. ४. १०९.)" –इति पाणिनीयं संहितालक्षणं मुहुः दृश्यत इति प्रथमः। (२) पाणिनिपरजन्मनो बह्वृक्प्रातिशाख्यकृतः शौनकाच्चायं यास्कः परावीनः सुतरां पाणिनितो बहुर्वाचीन इति द्वितीयः। यथाच स शौनको यास्कात् पूर्वभवः, पाणिनिः खलु ततोऽपि

पूर्वभवः, तदनुपद मेव स्फुटीभविष्यति। (३) उक्तञ्च निरुक्ते — "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च ; न सर्वा-णीति गार्ग्यो वैयाकरणानाञ्च"-इति (१. ४. १.)। इह, वैयाकरणशब्देन पाणिनीयविदा मेव ग्रहणं भवितु मर्हति ; पाणिन्यष्टके एव हि ताद्दृश्यमतनिदानसूत्रहयदर्शनात्। तथाहि — "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च" -इति (१. २. ४५, ४६.)। एते एव सूत्रे अवलम्ब्य 'प्राति-पदिका व्युत्पन्ना अव्युत्पन्नाश्च'-इति पाणिनिमतं वर्णितं महा-भाष्यादौ ; न त्वन्यत्र (प्रातिशाख्यादौ) नाम्नां ताद्दृश्योभयविधत्व मुपदिष्टं क्वचिदपीति। एवञ्चेह पाणिनीयविदा मेव मत मुपन्यस्तं यास्केन "वैयाकरणानाम्'-इतीदं सूचच मिति तृतीयः। नन्वेवं पाणिनीयः प्रातिपदिकशब्दः कुतो न व्यवहृतो यास्केनेति चेदत्र वक्तव्यं स्यादेतत् पाणिनिपूर्वजानां शाकटायनादीनां व्यवहारानुरोधप्राधान्यादेव नामशब्दव्यवहारतस्तस्य बाध इति। (४) निरुक्तेऽत्र (४. ४. ४.) यद् दृश्यते 'अस्याः', 'अस्य' -इत्यनयोर्निर्वचनादिकम्, तत्तु "इदमोऽन्वादेशेऽशनुदात्तस्तृतीया-दौ (२. ४. ३२.)"-इत्यस्यैव पाणिनीयसूत्रस्य व्याख्यानपर मिति चतुर्थः। (५) अयञ्च हेतुः, पञ्चमः,— उक्त मिह "आपनीफणदिति फणतेश्चर्करीतवृत्तम्"-इति (२. ७. ६.); "चर्करीतम्= अभ्यस्तम्"-इति महाभाष्यम् (७ अ० १पा० १ आ०); न हि चर्करीतवृत्तस्य ज्ञानं भवितु मर्हति शाक-टायनीयादिभ्य ऋक्तन्त्रादिभ्य इति। (६) तत्रैवाध्याये (२. १. ४.) "तद्धितसमासेषु"-इति च दृश्यते ; महाभाष्यकारेण तूक्तं पस्पशायाम्— "न चान्तरेण व्याकरणं कृतस्तद्धिता वा

शक्या विज्ञातुम्"–इति ; इह महाभाष्यवाक्ये व्याकरणपदेन पाणिनीयस्यैव ग्रहण मन्यथा तत्प्रयोजनाख्यान मेव व्याकुप्येतेति सोऽयं षष्ठः। (७) तथैवाग्रे – "निर्ब्रूयाद्वावैयाकरणाय (२. १. ६.)"–इति, इतश्च ज्ञायते निरुक्तादस्मात् पूर्व मेव व्याकरणम् ; व्याकरणज्ञानपूर्वक मेव निरुक्तज्ञानं यास्काचार्यस्याभिमत मिति। न हि तद् व्याकरणं सर्वतोमुखं पाणिनीय मन्तरेणान्यत् किं मय्यासीदादिम मित्यवश्य मेवैवमादिषु सर्वत्रैव निरुक्ते पाणिनीय मेवेष्टं यास्कस्येति सप्तमः। (८) अपि चाय मष्टमः — निरुक्तप्रयोजनकथनावसरे यास्कः स्वय माह — "व्याकरणस्य कार्त्स्न्यं स्वार्थसाधनत्व"–इति (१. ५. १.)। ततः सिद्ध मस्य निरुक्तस्य व्याकरणपरिशिष्टरूपत्वम् ; यतश्चायं ग्रन्थो व्याकरणपरिशिष्टरूपः, अतो व्याकरणपरभव एव ; तच्च व्याकरण मिह पाणिनीय मेवेत्यप्यस्माकम् ; दृश्यते ह्यत्र "पृषोदरादीनि यथोपदिष्टम्"–इति (६. ३. १०९.) पाणिनिसूत्र मेव प्रपञ्चितं लोपागमवर्णविकारादिप्रदर्शनपरेण नैरुक्तभागेन (२. १. १–६.)। अत एव तत्र महाभाष्ये उक्तम् — "पृषोदरादीनीत्युच्यते, कानि पृषोदरादीनि ? पृषोदरप्रकाराणि। कानि पुनः पृषोदरप्रकाराणि ? येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्यन्ते"–इति (६ अ० ३ पा० ३ आ०)। अत एवैव चैषा हरिकारिका—

"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"–इति॥

अपि नाम व्याकरणं तु सर्वतोमुखं पाणिनिनैव प्रथमं प्रणीत मिति वैयाकरणानां सिद्धान्तः। अत्र च बह्वनि प्रमाणानि देदीप्यन्ते ; किञ्चिदिहोपवर्णयामः।—

प्रथमं तावत्, नन्दिकेश्वरकारिकायाम्— "नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्। उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम्॥ अत्र सर्वत्र सूत्रेषु अन्त्यवर्णचतुष्टयम्। धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये"–इति। "धात्वर्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम्"–इत्यादि च तत्र नागेशभट्टः। तदेवमादीनां समालोचनयोपलभ्यत एव पाणिनेरादिव्याकरणकर्तृत्वम्।

द्वितीयस्मिन्मानि पाणिनीयशिक्षावचनानि— "शङ्करः शाङ्करीं प्रादात् दाक्षीपुत्राय धीमते। वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः॥ येनाक्षरसमाम्नाय मधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ अज्ञानान्ध्यस्य लोकस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥"–इति। पाणिनेरादिव्याकरणकर्तृत्वे इतोऽपि स्फुटतरं मानं किं भवितु मर्हतीति।

तस्यैव फणिभाषितभाष्याब्धेः पस्पशाह्निकं प्रायः सर्वं मेवात्र मतेऽनुकूलम्। तथाहि— "अथ शब्दानुशासनम्"–इति प्रतिज्ञालक्षणाधिकारवचनपर्यालोचनेनैव प्रतीयते,— इतः पूर्वं नासीदेवं लौकिकवैदिकोभयविधसर्वशब्दानां लघुनोपायेनानुशासन मपरं किञ्चिच्छास्त्रं व्याकरणं नामेति। अन्यच्च— "अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते— 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, न चान्तं जगाम'। बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रं मध्ययनकालः, न चान्तं जगाम; किम्पुनरद्यत्वे? यः सर्वथा चिरञ्जीवति, स वर्षशतं जीवति। चतु-

र्भिश्च प्रकारैर्विद्योपयुक्ता भवन्ति— आगमकालेन, स्वाध्याय-कालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चागमकालेनैव कृत्स्न मायुः पर्युपभुक्तं स्यात्। तस्मादनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। कथं तर्हीमे प्रतिपत्तव्याः ? किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्त्यम्; येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्"–इत्यादेः भगवत्पतञ्जलिविर-चितायाः पाणिनीयव्याकरणावतरणिकायाः पाठादेवावगम्यते नैतत्पूर्वं मेवं सर्वतोमुखं सर्वावयवसम्पन्नं किं मपि व्याकरणं स्थित मिति तृतीयम्।

श्रूयन्ते च सर्वेष्वेव वेदेषु पदसंहिताः। "अग्निम्। ईळे। पुरः ऽहितम्"–इत्येवं मन्त्रश्रुतपदविभागादिकं कुर्वन्त एव ता अध्यापयन्त्याचार्याः। तादृशपदपाठपन्था एव महाभाष्योक्तप्रतिपद-पाठश्रेणीगताः स्युरिति च सम्भाव्यते। तादृशप्रतिपदपाठाश्च तदेव शोभन्ते स्म, यदा नासीत् सामान्यविशेषवल्लक्षणात्मकं किञ्चिदपि सर्वतोमुखं व्याकरणम्। ईदृशपदपाठानां चाविष्कर्त्तारः शाकल्यादय एव। "वायः ०—० वेति च य इति च चकार शाकल्यः"–इति (६. ५. ५.) यास्कोक्तेः। एका मेवेमा सृक्पद-संहिता मभिलक्ष्याह महाभाष्यकारः— "शाकल्यस्य संहिता मनु प्रावर्षत्"–इति (१ अ० ४ पा० ४ आ०)। स एष हि शाकल्यो नाम ऋषिः, पाणिनितः पुरातन एव; तदीयाष्टा-ध्याम् "सम्बुद्धौ शाकल्यस्येतावनार्षे (पा० १. १. १६.)"–इत्यादौ शाकल्यनामस्मरणात्। तदेवं ज्ञायते नासीदेव पाणिनेः पूर्वं शाकल्यसमयेऽपि पाणिनीयसदृशं सर्वतोमुखं व्याकरणं किं मपीति चतुर्थम्।

एव मस्मि च सर्वेषां वेदानां क्रमपाठो नाम ग्रन्थ एकैकः ; त एव क्रमसंहिता उच्यन्ते। एतत्क्रमपाठनियमस्तु यद्यपि शाकल्यस्य पदपाठप्रवृत्तेः परकालभव एव, सति कुर्वे चिच मिति न्यायात् ; परं पाणिन्यष्टकात् पुरैवाविरासीदित्यपि सत्यम् ; तत्र हि क्रमाध्येतृवर्गे क्रमक इति पदसाधनायैव "क्रमादिभ्यो वुन्"-इति (पा० ४. २. ६१.) सूत्रस्य दर्शनात्। क्रमस्यैतस्यादिप्रवक्ता, एतादृशाध्ययनविधेः प्रवर्त्तकः खलु बाभ्रव्य ऋषिः। तच्चोक्तं ऋक्प्रातिशाख्ये— "इति प्र बाभ्रव्य उवाच च क्रमम्, क्रमप्रवक्ता प्रथमं ग्रथंस च"-इति (११. ६१.)। "इत्येवं बभ्रुपुत्रः भगवान् पाञ्चालः, क्रमस्य वक्ता ग्रिष्येभ्यः, क्रमं प्रथमं प्रोवाच प्रग्रथंस च हिताय"-इत्यादि च तत्र तद्व्याख्यान मुव्वटकृतम्। महाभारतेऽपि शान्तिपर्वान्तर्गतमोक्षधर्मेणि तथैवोक्तम्— "पाञ्चालेन क्रमप्राप्तस्तस्माद् भूतात् सनातनात्। बाभ्रव्यगोत्रः स बभौ प्रथमं क्रमपारगः"-इति (३४२ अ० १०० श्लो०)। एष बाभ्रव्योऽपि, पाणिनेः पूर्वभवः ; अष्टके "मधुबभ्रोर्ब्राह्मणकौशिकयोः"-इति (पा० ४. १. १०६.) सूत्रस्य दर्शनात्। एतस्य च क्रमाध्ययनस्य प्रयोजनकथनावसरे चोक्तं मिदं बहृक्प्रातिशाख्यभाष्ये "भवति चात्र श्लोकः— 'ग्ररदुच्छलो यितिमिरो विभाति भगवान् यथांशुमान्। सत्ववचनवित्तमः क्रमकः क्रमते हि संशयं तमस्तथात्मवान्"-इति (११. २७.)। एवञ्च वेदसंहितासु श्रुतानां मन्त्राणा मर्थबोधोपयोगिपदच्छेदादिविषयकसंशयनाशायैव क्रमग्रन्थाः प्रादुर्भूताः पुरा इत्येव क्रमहेतुसारम्। तादृशसंशयस्तु भवेत्तामेदृशसर्वतोमुखव्याकरणाविर्भावात् प्रागेव ; आविष्कृते श्लेतादृशे व्याकरणे नैव तादृशसंशयस्य प्रसर-

नेति। इतश्च ज्ञायते पाणिनेः पूर्वं बाभ्रव्यकालेऽपि नासीदेवं सर्वतोमुखं सर्वाङ्गसम्यक् व्याकरणं नाम किमपीति पञ्चमम्।

बाभ्रव्यः खलु ऋग्वेदस्य क्रमकारः; अतो बह्वृक्प्रातिशाख्ये तस्यैव नामग्रहणम्; तथा इयत्त्रीवो यजुर्वेदस्य। स एव चैतस्याः पञ्चतेः प्रथमोद्भावकः। अत एवोक्तं महाभारते तत्पूर्व मेव— "यत्तद्ययशिरः पार्थ समुदेति वरप्रदम्। सोऽह मेवोत्तरे भागे क्रमाक्षरविभागकृत्। वामादेशितमार्गेण मन्त्रसादान्महात्मना"–इति; एवदुत्तर मुक्तं तु प्रदर्शितं पुरस्तादिहैव "पाङ्क्तालेन०—० क्रमपारगः"–इति (११०पृ०)। एवं कण्डरीको गालवर्षिः सामसंहितायाः छन्दोविभागस्य क्रमकृत्, ब्रह्मदत्तश्चाथर्वसंहितायाः। तावित्रौ बाभ्रव्यस्यावरजाविति चास्ति तत्रैव महाभारते तदुत्तरम्— "नारायणाद् वरं लब्ध्वा प्राप्य योग मनुत्तमम्। क्रमं प्रणीय शिक्षाश्च प्रणयित्वा स गालवः। कण्डरीकोऽथ राजा च ब्रह्मदत्तः प्रतापवान् (महाभा० शा०मो० प० ३४२ अ० १०१, १०२ श्लो०)"–इति। अपि च गालवस्यार्यं बाभ्रव्यपरजोऽपि पाणिनिः पूर्वज एव; तदीयाष्टके हि "इको झल्ञो ऽङ्गो गालवस्य (पा० ६. ३. ६१.)"–इत्यादौ गालवनामस्मरणात्। तथाच गालवकालेऽपि नाविष्कृत मेवं सर्वतोमुखं व्याकरण मन्यथा कृतं नाम सामयोनिक्रमपाठेनेति षष्ठम्।

अस्ति चैको ग्रन्थो वैदिकानां "चातुर्ज्ञानम्"–इति। ततश्च ऋक्संहितायन्ये विसर्गसन्धीनां, सन्ध्यक्षरसन्धीनाम्, नान्तपदानाम्, समस्तासमस्तानां च बोधो भवति। तथाहि— ऋग्वेदसंहितायाः प्रथमेऽष्टके अग्निमीळे–इति वर्गे— "सुता विश्वा दधाना अजोषा इद्वृताः सोमपा इमा जुष्टा मरुतो द्रप्सा घृत-

पृष्ठा यजत्रा इविणोदा धानाः शुभ्राः पञ्चदश । तुविजातो दधानाइन्द्रे योगे चक्षसे महाधने ये इहते इमहे यज्ञे सुजिह्वो श्रियत एकादश ; य एकस्वर्षणीनां कक्षीवन्तं य इति वर्जयित्वा । अवीवृधन् इहन् आदित्यान् विश्वान् पर्वतान् पञ्च । पावकासने तदिमं द्वैपदम् , इहन् रोहयञ्छेष आयुत्कर्णैकपदम् , सहस्रसातमं हितीयं नेष्टरिति दीद्यग्नी इति दीद्यग्नी ऋतेन द्वैपदम्"–इति (१. १. १.)। पदगाढ़ाद्यो वैदिकग्रन्था अप्येव मेव । एतादृशाश्च ग्रन्थाः स्युस्तावदेव कृतार्थाः यावद्यैवाविर्भूतं पाणिनीयसदृशं किमपि सर्वतोमुखं व्याकरणम् ; प्रचलिते चैतादृशे व्याकरणे विसर्गसन्ध्यादिसंशयानां प्रसरतैव कथमिति सुधीभिरेवाकल्पतां समन्तादिति सप्रश्रमम् ।

एवं मस्ति चापरो ग्रन्थो वैदिकानां यत्र वेदसंहितायाः प्रतिवर्णस्य पदानाम् , इतिकरणानाम् , हिःखण्डानाम् , विसर्गाणाम् , मकारान्तानाम् , नकारान्तानाम् , तकारान्तानाञ्चेति सप्तविधसङ्ख्याः भङ्गाक्षरैर्निर्दिष्टाः । तथाहि— "अयं देवाय" –इति-प्रथमाष्टकीयद्वितीयाध्यायीयाद्यवर्गे "४३ । २ । ८ । १४ । ८ । २ । ० ।"–इति (२. १. १.)। एतेन तु निःसंशयं विज्ञायत एतत् ;— तत्र वर्गे त्रिचत्वारिंशदेव पदानि ; द्वे एव इतिकरणी ('इरी इति', 'पुनरिति') ; अष्टौ एव हिःखण्डानि ('रत्नऽधातमः', 'वचःऽयुजा', 'परिऽज्मानम्', 'सुऽखम्', 'सवःऽदुघाम्', 'सत्यऽमन्त्राः', 'ऋजुऽयवः', 'राजऽभिः') । द्विखण्ड मित्युक्ते समस्तस्यासमस्तस्य चावगच्छत्यात्मःपदस्य पदस्य बोधो भवति । तथाहि— "अन्तः पदं येषां स्याद् विकारोऽनन्यकारितः । एतानि परिगणीयाद् बहुमध्यगतानि च (ऋ० प्रा० १०. ८८)"

–इत्याह शौनकः। 'अवग्रहाणि द्विःखण्डानि पूर्वोत्तरपद्य-भूतानि'–इत्यादि च तत्रोव्वटः। प्रदर्शितेष्विह तु 'रत्नऽधा-तमः'–इत्यत्र 'रत्नानां धातमः'–इत्येवं समास इष्टः पदकारस्य शाकल्यस्य, तथैवान्येषा मपि पाणिनिपूर्वजानाम्; किञ्च राज-भिरित्यत्र भक्तः पद-कार्यस्य न-लोपस्य कर्त्तव्यत्वात् तस्यापि द्विःखण्डत्व मक्तःपदत्व मिति। एवं तत्र वर्गे सन्ति चतुर्दशैव विसर्गाः; नवैव मकारान्तानि पदानि; द्वे एव स्तो नकारान्ते पदे; तकारान्तं पदन्तु नास्त्येक मपीति। तदेवमादीनां ग्रन्था-नाञ्च प्रादुर्भावदर्शनात् गम्यत एवास्मात् पाणिनीयाष्टकात् पूर्वं नासीदेव किं मपि व्याकरणं सर्वतोमुखं सर्वाङ्गसम्पन्न मीदृ-शम्, यथा चैवमादीनां ग्रन्थानां प्रादुर्भाव एव न स्यादिति; को हि नामाधीतपाणिनीयः पदच्छेदप्रभृतिज्ञानाय, विशेषतो द्विःखण्ड-ज्ञानाय चैतादृशस्यापि ग्रन्थस्याध्ययने यतते साम्प्रत मित्यष्टमम्।

एवं सन्ति च विविध-'लक्षण'–ग्रन्थाः प्राचीनतमाः। तत्त-दनुगतान्येव सङ्केताक्षराणि दृश्यन्ते वर्गादिना मन्तेषु। तादृशाक्षर-सन्निवेशैश्च तत्तद्वर्गादिषु प्रगृह्यसङ्ग्रादीनां निश्चयतावगम्यते। तथाहि— अध्येतारश्चाद्यापि "अग्निमीळे (ऋ० स० १. १. १.)" –इत्यस्य वर्गस्यान्तेऽधीयत एव "ङै"–इति सङ्केताक्षरम्। एतेन हि ज्ञायते— तत्र वर्गे नान्त-विसर्गान्त-पदानां विषमत्वम्, द्विः-खण्डानां तु समत्वम्, प्रगृह्याभावः, स्वन्तवैषम्यञ्चेति। वस्तुतः सन्ति तत्र वर्गे विसर्गान्तानि सप्तदश, द्विःखण्डान्यष्टौ; अस्ति च एक मेव नान्तम्, स्वन्तञ्चैकम्, प्रगृह्याभावश्चेति। एवं "घृतवती (ऋ० स० ५. १. १४.)"–इत्यस्य वर्गस्यान्तेऽधीयत एव खलु 'घृ'–इति सङ्केताक्षरम्। एतेन च तत्र वर्गे नान्त-

स्वस्त-द्विःखण्डानां वैषम्यम्, विसर्गान्तानां साम्यम्, प्रगृह्या-श्चैकत्रिंशत्,— इत्येवं बोधितं भवति ; किञ्च नास्ति तत्र नास्तं स्यस्तं वा पद मेक मपि ; सन्ति च द्विःखण्डानि सप्तविंशतिः, विसर्गान्तानि च प्रदानि चतुर्दश, प्रगृह्याख्यपदानि चैकत्रिंश-देवेति। तदेवमादीनां ग्रन्थानां तदैवोपयोगो विशेषत आसीत्, यदा नासीत् पाणिनीयसमानं सर्वतोमुखं व्याकरणं किं मपि ; मति हि पाणिनीये व्याकरणे, पाणिनीयसमानापरव्याकरणे वा तत्र व्युत्पन्नानां किं मेतादृशसङ्केताक्षराभ्यासेन ; ननु ते हि मन्त्रान् प्रपञ्चेव किमु नावगच्छेयुः प्रगृह्यादीनि ? अवगच्छेयुरिति चेदवश्यं मन्तव्यं नासीत् पाणिनीयात् पूर्वं पाणिनीयसमानं किं मपि सर्वतोमुखं व्याकरण मित्यत एवैवंविधसङ्केतोपदेशाः समुद्भा-विताः, समादृताश्च ते तदानीन्तनैरिति नवमम्।

यश्चैष वोपदेवकृतस्य कविकल्पद्रुमस्य भूमिकाया मिन्द्रादीनां शाब्दिकाना मुल्लेखो विद्यते — "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥ मतानि तेषा मालोच्य सर्वसाधारणः स्फुटः। ०—०। कवि-कल्पद्रुमो नाम पर्यैर्निष्पाद्यतेऽत्र च॥"–इति, तेनापि व्याकरणेषु पाणिनीयस्यादिमत्ता न विहन्यते ; शाब्दिकत्वव्याकरणकर्तृत्वयोः-सामानाधिकरण्यनियमाभावात् ;— न ह्येवं कस्मिन्नियम उप-लभ्यते, ये ये शाब्दिकाः, स्युरेव ते ते व्याकरणकर्त्तार इति ; व्याक-रणकर्तृत्वाभावे हि शाब्दिकत्वं न भवतीत्येवं नियमो नैव विचार-सहः। तदेव मवगम्यते,— अत्रोल्लेखेषु शाब्दिकेषु इन्द्रस्य प्रतिपद-पाठाध्येतृत्वेन शाब्दिकत्वं महाभाष्ये वर्णितम्, प्रदर्शितञ्च तत् पुरस्तादिदैव (१०८ पृ०)। चन्द्रस्तु व्याकरणकर्तेति मयम्,

परं न स पाणिनिः प्राचीनः ; पाणिनिभाष्यानुसारत एव तेन व्याकरणान्तरं प्रणीतं यतः । तथाहि राजतरङ्गिण्याम्— "चन्द्राचार्यादिभिर्लब्ध्वा देशं तस्मात्तदागमम् । प्रवर्त्तितं महाभाष्यं स्वच्च व्याकरणं कृतम् (१. १. ७६.)"–इत्युक्तं पुरस्तात् प्रदर्शित मेव । काशकृत्स्निस्तु शाब्दिक इति सत्यम्, परं न वैयाकरणः ; अपि तु मीमांसकः । तथाहि महाभाष्ये— "काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी"–इति (४ अ० १पा० १आ०) । शाब्दिकाना मन्यतमः खल्वापिशलिर्यतो "वा सुप्यापिशलेः (६. १. ९२.)"–इत्युक्त्या पाणिनिना सम्मानितो दृश्यते, अतः पाणिनिसमकालिकः तत्पूर्वकालिको वेति प्रतीयते च, परं नैतावता तस्य व्याकरणकर्तृत्व मप्यङ्गीकर्तव्यम् ; न ह्युपलभ्यते इदानीम् नापि प्रतीयते कदाप्यासीत् तद्व्याकरणस्य सत्तेति ; सामतन्त्रस्य प्रणेता आपिशलिरिति प्रवादोऽपि क्वाचित्कः । शाकटायनस्य तु ऋक्तन्त्रं व्याकरण मद्यापि विद्यते, परं न ततः समासतद्धितादीनां सर्वथा बोधः समुत्पद्यते ; नापि ततः सुब्व्युत्पत्त्यादिपदानां साधनिका ज्ञायन्ते ; न च तस्यात्र निरुक्ते व्याकरणत्वेन ग्रहण मिष्टं गम्यते ; यास्केन हि प्रायः सर्वत्रैव वैयाकरणेभ्यः पृथक् कृत्वैव तन्नामग्रहणं कृत मिति । तथाहि— "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च ; न सर्वाणीति गार्ग्यो वैयाकरणानां च"–इति (१. ४. १.) । अमरोऽपि न व्याकरणकृत्, नापि पाणिनेः पूर्वभव इति तु सुप्रसिद्ध मेव । जैनेन्द्रस्तु सत्य मभवत् सर्वतोमुखस्यैकस्य व्याकरणस्य प्रणेतेति ; दृश्यत एव हि तद्व्याकरण मद्यापि, परं तस्य पाणिनिपरत्वं तु सर्वसम्मत मेवेति दिक् ॥

यश्चैष प्रवादः,— आसीत् पुरा माहेश्वं नाम व्याकरणं पाणिनीयतोऽपि बृहत्तरं पुरातनश्चेति । तथाचाय मुद्भटश्लोकः—

"यान्युज्जहार माहेशाद् व्यासो व्याकरणार्णवात् ।
किं तानि पदरत्नानि सन्ति पाणिनिगोष्पदे"–इति ।

तदेतस्य माहपिशलनिर्णयहीनत्वादप्रामाण्यमेवेति विदुषाम्परामर्शः । मधुसूदन-सरस्वती-नामा भिक्षुः प्रस्थानभेदे पाणिनीय मेव माहेश्वर मित्याह । तथाहि— "तच्च बृद्धिरादैजित्यादयष्टाध्यायात्मकं महेश्वरप्रसादेन भगवता पाणिनिनैव प्रकाशितम् ; अत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्त्तिकं विरचितम् ; तद्वार्त्तिकत्योपरि च भगवता मुनिना पतञ्जलिना महाभाष्य मारचितम् । तदेतत् त्रिमुनि व्याकरणं वेदाङ्गं माहेश्वर मित्याचक्षते"–इति । "अइउण्"–इत्यादिषु चतुर्दशसु सूत्रेषु पुरासीत् बृहद् व्याख्यानं नन्दिकेश्वरकृतम् , तदेव माहेश्व मिति व्यपदिष्ट मिति च वृद्धाः । अस्मन्मते तु केनचिदतिक्षुद्रव्याकरणाध्यायिना पाणिनीयद्वेषिणैवैष श्लोकः प्रणीतः . आसीन्माहेश्वं नाम अतिबृहद् व्याकरण मिति प्रवादोऽप्येतदनुगत एव ; माहेश्वन्तु वस्तुतः खपुष्प मिव त्रैकालिकाभावसम्पन्न मेवेति ॥

किञ्चेह पाणिनीये अत्रि–शाकल्य–काश्यप–भृगु–कुत्स–वसिष्ठ-गोतम–कौण्डिन्य–जाबाल–वडवा–यस्क–शाकटायन–कौरव्य-मण्डूक–मधु–वभ्रु–पैल–कलापि–वैशम्पायन–तित्तिरि–वरतन्तु-कौशिक–शौनक–गालव–भारद्वाज–चाक्रवर्म–स्फोटायन–आपिशलि–आङ्गिरस–छागलि–कठ–चरक–पाराशर्य्य–शिलालि–प्रभृति-वह्वाचार्यनामस्मरणात् तेभ्यो ह्यवरजत्व मस्य पाणिनेः स्फुट मेवेत्यवश्यं स्वीकार्यम् ; परं न तथा स्वीकारे स्वीकृतं भवेत्,— एतस्मात्

पूर्वं मपि कश्चिदासीद् व्याकरणग्रन्थः सर्वतोमुख इति। एवञ्चैषु ये केचिदाचार्याः पाणिनिसमकालाः, तेषां भाषाव्यवहारतो ज्ञातानि तेन भगवता तेषां शाब्दमतानि ; ये केचन तत्पूर्वभवाः, तेषा मपर-शास्त्रीयग्रन्थादिदर्शनादपि सम्भवेन्नाम तदीयशाब्दमतज्ञानम् ; ये तु व्याकरणकर्त्तारोऽपि, तेषां तान्यपि व्याकरणानि, न ह्येतादृशानि सर्वतोमुखानि सर्ववेद-लोक-विषयाणीति चावश्य मुररीकर्त्तव्य मस्मत्प्रदर्शितहेतुभिरिति।

गरुडपुराणोक्तस्य कुमारव्याकरणस्य तु वोपदेवकृतात् मुग्ध-बोधादप्याधुनिकत्वम् "तिप्तस्झि प्रथमो मध्यम: सिप्थस्थोत्तम-पूरुषः। मिव्वस्मस: परस्मै तु पदानाञ्चात्मनेपदम्"-इत्यादि-पाठादेव सुव्यक्तम्। अग्निपुराणाद्युक्तानि व्याकरणानि तु बाल-क्रीड़नानीव। कार्त्तिकेयोक्त-व्याकरणादीन्यपि पाणिनीयप्रवेशाय कृतान्येवेत्यल मिहानल्पजल्पनेनेति।

तदेवं पाणिनीयस्यैवादिव्याकरणत्वात् यास्कीयेऽत्र निरुक्ते यत्र क्वचित् व्याकरणनामोल्लेखो विद्यते, तत्सर्व मेव यास्कस्य पाणिनीयपरभवत्वे विनिगमकम् ; न हि यास्कीयनिरुक्तात् पूर्वं किञ्चन सर्वतोमुखं व्याकरणं पाणिनीय मन्तरेण स्थित मिति पाणिनेर्यास्कपूर्वजत्वं सुवचम्॥

यत्तूक्तं केन चित् पाटलाविजय-जम्बूवतीविजय-काव्ययोः प्रणेताऽप्यय मेव पाणिनिरिति, तदप्यश्रद्धेय मेव सर्वेषाम् ; न हि व्याकरणाचार्यस्य पाणिनेः रचनायां व्याकरणाशुद्धिः सम्भवेन्नाम, नापि हि महाभाष्यकृत्पतञ्जलिकालपर्यन्ताविर्भूतेन केनचिद् वैयाकरणेन प्रयुक्तं किमपि पदमशुद्ध मिति गणयितुं शक्यते तत्परजातैः कालिदासादिभिश्च प्रयोगपटुभिः। अस्ति च व्याक-

रणाशुद्धिदोषः पाटलाविजये; उदाहृतस्य स कृष्टकृतकाव्यालङ्कार-टीकाकृता नेमिसाधुना श्रुतसंस्कृतिदोषोदाहरणप्रसङ्गे "सन्ध्या-बधूं गृह्य करेण"-इति। तत्र गृह्णीत्येति वक्तव्ये गृह्णेति प्रयोग एवाशुद्धः। अत्रेदं विचार्यम्;— अशेषशेमुषीसम्पन्नस्य, महेश्वरवरप्रसादाल्लब्धव्याकरणविद्यस्य, सिद्धवाग्विभवस्य, व्याकरणस्रष्टुस्तस्य पाणिनेर्व्याकरणाशुद्धिः कदापि सम्भवेत् किमु? इति। यदि नाम गृह्णेति पदं तेनैव पाणिनिना प्रयुक्तं स्यात्, तर्हि तत्प्रयोगबलादेव साध्विति कथं न मन्येतेति च; प्रयोगा अपि हि पाणिनि-कात्यायन-पतञ्जलिनां साधुत्वनियामका भवन्त्येवेत्युररी-क्रियत एव सर्वैः। तदेवं, यत इदं गृह्णेति पदं न कोऽपि साधु मन्यते; अतोऽपि ज्ञायते नेदं व्याकरणाचार्येण तेन पाणिनिना प्रयुक्तम्, न च पतञ्जलिपूर्वकालीनेनापि केनचि-दिति। केचिदाहुः,— व्याकरणस्रष्टुदेव पाणिनिः महाकवेर्वाल्मी-केश्च बहुपूर्वभवः; वाल्मीकीयाद्रामायणात् पूर्व मेव सूत्रकालो गत इति। तेषां नये तदोपज्ञात्यादिदत्तानां कथा तु स्याद् दूरपराहता, आनुष्टुभेनापि छन्दसा कश्चिल्लौकिको ग्रन्थो रचितो न वेति महान् संशय एवेति।

सोऽयं भगवान् पाणिनिः खलु युधिष्ठिरवासुदेवार्जुनेभ्यः पर-भव एव; तदीयेऽष्टके "गवियुधिभ्यां स्थिरः (८. ३. ९५.)"-इत्यस्य, "वासुदेवार्जुनाभ्यां वुन् (४. ३. ९८.)"-इत्यस्य च सूत्रस्य विद्यमानत्वात्। पारिक्षिताद् जनमेजयाच्चायं किञ्चि-दुत्तरभवः; एतदीये ह्यष्टके जनमेजयपदसाधनायैव "एजेः खश् (३. २. २८.)"-विधानदर्शनात्। जनमेजयस्तु युधिष्ठिर-तृतीय-भ्रातुरर्जुनस्यैव पौत्रः। स च अर्जुनः "शतेषु षट्सु सार्धेषु

त्रयधिकेषु च भूतले। कलेर्गतेषु वर्षाणा मभवन् कुरुपाण्डवाः (१. ५०.)"–इति राजतरङ्गिणीलेखदर्शनात् कलेः सप्तमशताब्द्यां स्थितः। ततो जनमेजयः कलेरष्टमशताब्दीज इत्येव सम्भाव्यते। व्यासोऽपि कश्चित् तदानी मासीदिति च महाभारताख्यानादिभिर्ज्ञायत एव; तस्य व्यासस्य पुत्रः शुकोऽपि तच्छताब्दीज एव भवितु मर्हति, परं यत्तु व्यासपुत्रशुकवाचकवैयासकि-पदसाधनाय न कश्चिद् योगोऽस्ति पाणिनीयः, अस्ति तु "व्यासवरुण० (पा० ४. ३. ८७ वा०)"–इति वार्त्तिकम्, अतोऽवगम्यते वैयासकिपरिचयो नैव विदित आसीत् पाणिनेरिति। तदित्थं व्यासपुत्रस्य शुकस्य लोके ख्यातिप्रतिपत्तिलाभात् पूर्व मेव प्रणीत मिद मष्टकम्पाणिनीय मिति कलेरष्टम्या मेव शताब्द्यां खीष्टजन्मतश्च प्राक् चतुर्विंशशताब्द्या मिम मार्यावर्त्तं भूषयामास स पाणिनिरिति ध्रुवम्॥

[आड़िः] उक्तं पुरस्तात् (१०५ पृ०) बङ्गीक्प्रातिशाख्यकृतः शौनकस्य पाणिनिपरजत्वम्, यास्कस्य तु ततोऽपि परजत्व मिति; तत्रैवावसरप्राप्त मिदानीं निर्णेतु मिह व्याडिविषयेऽपि किञ्चिद् ब्रूमः। तथाहि— अस्ति पाणिनेरष्टके स्वरप्रकरणे "आचार्योपसर्जनश्चान्तेवासी (६. २. ३६.)"–इति सूत्रम्; अत्र च कृतः सन्देहो वार्त्तिककारेण— "आचार्योपसर्जने ऽनेकस्यापि पूर्वपदत्वात् सन्देहः"–इति; "आपिशल-पाणिनीय-व्याड़ीय-गौतमीयाः, एकं पदं वर्जयित्वा सर्वाणि पूर्वपदानि, तत्र न ज्ञायते कस्य पूर्वपदस्य स्वरेण भवितव्य मिति"–इत्येवं च तद्भाष्ये तत्सन्देहोपपादनम्। अत्र हि सन्देहोदाहरणे आपिशलादीनां नूनम् "अभ्यर्हितञ्च"–इति (पा० २. २. ३४ वा०) शासनात्

अभ्यर्हितक्रमेणैवास्ति सन्निवेशः; अभ्यर्हितत्वञ्च स्यात् तेषां स्वस्वाचार्यपौर्वापर्यमूलक मेवेति। तथा च आपिशलिः प्राचीनः पाणिनिः, पाणिनितश्च प्राचीनोऽयं व्याड़िरिति तु व्यक्तमेव; अपीह कात्यायनीयोदाहरणे व्याड़ीयशब्ददर्शनात् कात्यायनात् खलु प्राचीनोऽयं व्याड़िरित्यत्र च कास्ति वक्तव्यता? तदेतस्मादेकस्मादेवोदाहरणविन्यासाद् द्वे एव विज्ञाते,— व्याड़ेः पाणिनितोऽवरजत्वं कात्यायनतः पूर्वजत्वञ्चेति।

स एव व्याड़िः, 'सङ्ग्रह'-नामकस्य पाणिनीयव्याख्यानविशेषस्य प्रणेता। तत्र एवोक्तं महाभाष्ये पस्पशायाम्— "सङ्ग्रहे एतत् प्राधान्येन परीक्षितम्,— नित्यो वा स्यात् कार्यो वेति। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र लेष निर्णयः— यद्येव नित्यः अथापि कार्यः उभयथापि लक्षणं प्रवर्त्य मिति" -इति। "सङ्ग्रहे = ग्रन्थविशेषे"-इति च तद्व्याख्यायां कैयटः। "सङ्ग्रहो व्याड़िकृतो लक्षश्लोकसङ्ख्यो ग्रन्थ इति प्रसिद्धः"-इति च तद्विवरणे नागेशभट्टः। तदेतस्मादेकस्माच्चेमे विदिते— व्याड़िरेव सङ्ग्रहस्य कर्त्तेति, स हि पाणिनितोऽवरजश्चेति।

स एव दाक्षायण इत्यप्युक्तः। अस्ति पाणिनिसूत्रम्— "उभयप्राप्तौ कर्मणि"-इति (२. ३. ६६.)। "शेषे विभाषा" -इति च तत्र कात्यायनस्य वार्त्तिकम्। "शोभना खलु पाणिनेः सूत्रस्य कृतिः, शोभना खलु पाणिनिना सूत्रस्य कृतिः; शोभना खलु दाक्षायणस्य सङ्ग्रहस्य कृतिः, शोभना खलु दाक्षायणेन सङ्ग्रहस्य कृतिः"-इति च तदुदाहरणानि। तदेतदामूलसमालोचनया च त्रीणि विज्ञातानि भवन्ति,— दाक्षायण इति सङ्ग्रहकर्त्तुर्व्याड़ेरेव नामान्तरम्, स च पाणिनितोऽवरजः, कात्यायनतोऽग्रजश्चेति।

ये केचिदाहुः,— दाक्षायण इति युवप्रत्ययदर्शनात् तस्य हि व्याडेः दाक्षीपुत्र-(पाणिनि)-समकालिकत्वम्, तदसङ्गत मेव ; न हि समकालिकयोरे कस्यापीदृशी श्रद्धा समुत्पद्येत, यत् तत्र लक्षश्लोकात्मकं व्याख्यान मारचयेदिति । नापि हि पाणिनिकाले एव पाणिनीयसूत्राणा मेवं व्याख्यानं प्रयोजनीयं भवितु मर्हति ; तदानीन्तनानां सर्वेषा मेवातिबुद्धित्वात् ; किञ्च सूत्रकाले एवैवं व्याख्यानं प्रयोजनीयं चेत्, तादृशसूत्रप्रणयनं सूत्रकाराणा मसङ्गत मेव स्यात् ; न हि लोकहितचिकीर्षुभिः पाणिन्यादिभिः लोकविडम्बनायैव दुर्बोधसूत्ररचनं सम्भाव्यते । अतोऽस्मन्मते तु पाणिनिजन्मतोऽत्यूनद्विशताब्यन्तरे जातोऽयं व्याडिः, तदानीन्तनानां पाणिनीयावगमे कष्ट मेवानुभूय सुहृद्भूत्वैवान्वाचचक्षे तदयाख्यानं सङ्गच्छं नाम ; न हि द्विशताब्दी मन्तरा तथा मन्दबुद्धित्वं सम्भाव्यते, यथा च सूत्रबोधाय तादृश मतिबृहद् व्याख्यान मपि प्रयोजनीयं भवेदिति ।

आदिदक्षस्यैवापत्यं युवा स्याद् दाक्षायणो नान्यः, एव मपि न नियमः ; दक्षगोत्रीयस्य शततमस्यापि यस्य कस्याप्यपत्यं युवा भवितु मर्हत्येव दाक्षायण इति ; तत्र बाधादर्शनात्, जीवद्वंश्यत्वमात्रस्यैव युवसञ्ज्ञानिदानत्वाच्च । जीवद्वंश्यत्वन्तु शततमस्याप्युपलभ्येत चेत्, तत्रापि युवसञ्ज्ञया भवितव्य मेवेति ।

किञ्च युवप्रत्ययस्तु जीवद्वंश्यादावेव भवति नान्यत्रेति न नियमः, अपि जीवद्वंश्यादौ भवत्येवेति च नियमः ; वार्त्तिककार-कात्यायनेन हि "वृद्धस्य च पूजायाम्" युवसञ्ज्ञा विहिता, "यूनश्च कुत्सायां गोत्रसञ्ज्ञा" ज्ञातेवेति युवसञ्ज्ञा मधिकृत्य महाभाष्ये सिद्धान्तितम्, लघुशब्देन्दुशेखरे चैतत् सुव्यक्तम् ।

तदेवं दत्तगोत्रजो मान्यः कश्चिदद्यतनीयोऽपि दाक्षायण इत्युच्येतैव, किं सङ्कृष्टकारस्य व्याडेः दत्तगोत्रविभूषणस्य ? इति।

अन्यच्च ; यदि हि नाम स व्याडिः पाणिनेः समकालिको मातुलपौत्रश्च स्यात्, तर्ह्यवश्यं दृश्येत सूत्रं तदर्थके 'व्याद्यादयः शालायाम्'-इत्येव ;— न च "छात्रादयः शालायाम्"-इति (६. २. ८६.) ; व्याडिशालाया एव पाणिनेर्मनसि पूर्वोदयसम्भवात्। तत्र छात्रादिगणे व्याडिशब्दस्य पाठ एव व्याडेः पाणिनिसमकालिकत्वं बोधयतीत्यपि वक्तुं न युज्यते ; गणपाठे हि काले काले शब्दाः सन्निवेश्यन्ते,-इति तु सर्वैरवश्यकर्त्तव्यमेवेति। सिद्ध मित्थं सङ्कृष्टकृतो व्याडेराचार्यस्य व्याकरणाचार्यात् पाणिनितो बहुकालपरत्वं वार्त्तिककाराच्च कात्यायनात् बहुपूर्वजत्वमपीति॥

[शौनकः] प्रातिशाख्यकृत्-सङ्कृष्टकृतोः शौनक-व्याड्योश्च समकालिकत्वमवगम्यते। अस्ति हि शौनकीये ऋक्प्रातिशाख्येऽसकृद् व्याडेरुल्लेखः, अस्ति च व्याडिकृतायां विकृतिवल्ल्यां मसकृच्छौनकस्यावगमश्च। तद्यथा, प्रातिशाख्ये व्याडेरुल्लेखः (३. ८.)—

"परिग्रहे त्वनार्षान्तात्तेन वैकाक्षरीकृतात्।
परेषां न्यास माचारं व्याडिस्तौ चेत् स्वरौ परौ"-इति।

"अनार्षादितिकरणात् परेषा मक्षराणां न्यास मनुदात्तत्व माचारं मन्यते व्याडिराचार्यः"-इत्येवमादिकञ्च तत्रोव्वटकृतं भाष्यम्।

तथा "उभे व्याडिः समस्वरे"-इति (३. १३.)। "व्याडिस्त्वाचार्यः"— इत्यादि च तद्भाष्यम्।

"व्याडेः सर्वत्राभिनिधानलोपः"-इति (६. २१.)।

"व्याडेराचार्यस्य"-इत्यादि च भाष्यम्। अपरञ्च (१३. ३८.)—

"समापाद्यं नाम वदन्ति पत्वं तथा षत्वं सामवशांश्च सन्धीन् ।
उपाचारं लक्षणतश्च सिद्धं माचार्या व्याडिशाकल्यगार्ग्याः"-इति ।

"तथा वदन्ति के ? आचार्याः ,— व्याडिशाकल्य-गार्ग्याः"-इत्यादि च तद्भाष्यम् । अपर मपि (१३ प० ४४.)—

"व्याडिर्नासिक्य मनुनासिकं वा"-इति ।

"व्याडिराचार्यः"-इत्यादि च तत्र भाष्यम् । तान्येवमादीनि व्याडिमतानि तु पाणिनीयव्याख्यानरूपात् सङ्ग्रहग्रन्थादेव शौनकेन सङ्गृहीतानीत्यपीह ध्येयानीति ।

एवं व्याडिकृतायां विकृतवल्ल्याञ्च शौनकस्यावगमः—"अनुलोमे यथाक्रमम् (वि० व० १. ८.)"-इत्यत्र "यथाक्रम-शब्देन प्रातिशाख्योक्ता अन्तस्थरश्चेप्रादयो द्रष्टव्याः"-इत्याह विकृतिकौमुदीकृत् । तथा 'व्युत्क्रमे क्रमवत् सन्धिः (१. ११.)" -इत्यत्र च "विपर्ययक्रमसन्धौ शौनकोक्ताः श्चेप्रादिसन्धयो भवन्ती-त्यन्वयः"-इत्यादि चाह स एव कौमुदीकृद्दाचार्यः । तत्रैव "डकारादिविधानम्"-इत्यस्य व्याख्यायमुक्तम्—"डकारस्य ळकारा-देशः शौनकोक्त एव"-इत्यादि । तथाग्रेऽपि "एकारौकार-परस्तु अकारोऽभिनिहन्यते (१. १३.)"-इत्यस्य कौमुद्याम् "उद्-ग्राहसन्धौ शौनकाचार्यैः प्रकृतिभावनिमित्तं प्रापितः 'प्रकृ-त्यान्तः (पा० ६. १. ११५.)'-इत्यनेन सूत्रेण"-इत्यादि । स्पष्टं चास्ति तत्र शौनकनामोल्लेखः "उदात्तादिविधानं तच्छौनकोक्तं भवेदिह"-इति (वि० व० १ प० १५ श्लो०) ।

अतो मन्यते सुष्ठुनुमितं शौनकव्याड्योः समकालिकत्व मिति । तत्र च प्रथमं तावत् व्याडिराचार्यः पाणिनेरष्टक मवलम्ब्य सङ्ग्रह मारचितवान् ; ततः शौनकाचार्यः शाकलसंहितायां विसर्गे-

ख्यापनाय प्रातिशाख्यं प्रणीतवान्; ततश्च तत्परिशिष्टस्थानीया अष्टप्रकरणा विकृतिवल्ली कृता पुनस्तेनैव व्याडिनेत्यपि प्रतीयते तत्तद्ग्रन्थसमालोचनादिभिरिति॥

अप्येती शौनक-व्याडी गुरुशिष्यौ,— इत्येतदपि विज्ञायते, तत एव विकृतिवल्लीग्रन्थात्। तथाहि तत्प्रकरणाचरणे—

"नत्वादौ शौनकाचार्यं गुरुं वेदमहानिधिम्।
मुनीन्द्रं सर्ववेदज्ञं ब्रह्मज्ञं लोकविश्रुतम्"—इति (२)।

एवमपि सिद्ध मेतयोः शौनकव्याड्योः समकालिकत्वम्। सिद्धञ्चा स्यादून मसौ प्रातिशाख्यकृच्छौनकः पाणिनेः परभव इति॥

ननु शौनकस्य पाणिनिपरभवत्वं सत्य मेवेति चेत्, कथं न तत्कृते बह्वृक्प्रातिशाख्ये पाणिनेर्नामोल्लेखः? अत्रेदं समाधीयते,— यथा च सम्प्रति भट्टोजिदीक्षितकृता वैयाकरणसिद्धान्तकौमुदी नाम वृत्तिः प्रचलिता, अत एवाविशेषेण 'पाणिनीयव्याकरण मधीते'—इत्युक्ते तद्वृत्तिसमन्वितस्यैवाध्ययनस्य बोधो भवति, 'कौमुदी मधीते'—इत्युक्ते च पाणिन्यष्टकान्विताया एव तस्या वृत्तेरध्ययनं प्रतीयते, अपि च व्याकरणकारोल्लेख प्रसङ्गे तद्वृत्तिकर्तुः दीक्षितस्यापि नामोल्लेखः क्रियत एव; तथैव शौनककाले अपि ससूत्रसङ्ग्रहस्यैव व्याकरणत्वेन प्रसिद्धिरासीत्, सङ्ग्रहकारस्य च तस्य व्याडेर्व्याकरणकर्तृत्वेनेति। तदुक्त मस्ति हेमचन्द्रीये चाभिधानचिन्तामणौ— "ससूत्रवृत्त्यर्थपदं महार्थम्"—इत्यादि (१२. २८.) सङ्ग्रह-विवरणम्। एवञ्च व्याडेरुल्लेखादेव पाणिनेरुल्लेखः सिद्धः। सत्येवं शौनकीयप्रातिशाख्यादौ यत्र क्व च व्याकृतिविषये व्याडेराचार्यस्य नामोल्लेखो दृश्यते, तत्सर्व मेव पाणिनिमतस्मारकम्; व्याडेः खलु

पाणिनीयव्याख्यातृत्वेनैव वैयाकरणत्वसिद्धेः ; न हि व्याडिर्व्याकरणसूत्रकारः। तथाच— यदु दृश्यते अत्र "व्याडिर्नासिक्य मनुनासिकं वा"–इति (व० प्रा० १३ प० ४४.), तदिदं "मुखनासिकावचनोऽनुनासिकः (१. १. ८.)"–इत्यस्य पाणिनीयस्य सूत्रस्यैव व्याडिकृतं व्याख्यानं शौनकेन संक्षत्योल्लिखित मित्येव गम्यते। एव मन्यत्रापि। भाष्यकृताप्युक्तं पस्पशायाम्— "अथ व्याकरण मित्यस्य शब्दस्य कः पदार्थः ? सूत्रम्। •—०। न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते। किन्तर्हि ? व्याख्यानतश्च। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति, न केवलानि चर्चापदानि व्याख्यानम्— 'हृद्भिः, आत्, ऐच्'–इति। किन्तर्हि ? उदाहरणम्, प्रत्युदाहरणम्, वाक्याध्याहारः, इत्येतत्समुदितं व्याख्यानं भवति"–इति। अत एव चोक्तं दृश्यते हस्तौ— "ससङ्गहं व्याकरण मधीते"–इति (पा० ६. ३. ७८.)। अपि च शौनकीये हि तत्र प्रातिशाख्ये आचार्यपदेनापि पाणिनेः स्मरणं बहुत्र लक्ष्यते। तथाहि (१. ४. १.)—

"अष्टावाख्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान् स्वरान्।
तन्निमित्ते शाकला दर्शयन्त्याचार्यशास्त्रापरिलोपहेतवः"–इति।

अत्रावश्यं पाणिनिकृतम् "अणोऽप्रगृह्यस्यानुनासिकः (८. ४. ५७.)"–इत्येव सूत्रं लक्ष्यीभूतं तस्येति स्वीकार्यं मिति॥

किञ्च पाणिनीयप्रणयनात् पूर्वं कस्यापि प्रातिशाख्यग्रन्थस्य प्रचारः समभवदित्यपि न प्रतीयते ; क्वचिदपि पाणिनीयसूत्रे प्रातिशाख्यशब्दादर्शनात्, प्रातिशाख्यशब्दव्युत्पत्तये वार्त्तिककृत्कृतयत्नस्योपलाभाच्च। तथाहि— "गम्भीराञ्जः"–इति (४. ३. ५८.) सूत्रे उक्तं कात्यायनेन "आप्रकरणे परिमुखादिभ्य उपसङ्ख्यानम्"

-इति; तत्र परिमुखादिगणे च दृश्यते "प्रतिशाख"-इति। परिषच्छब्दस्तु हि: दृश्यते पाणिनीयेऽपि, परं न तत्रैकत्रापि प्रातिशाख्यार्थोऽवगम्यते; अपि तु गाथकार्थ एव। तथा "पार्षदकृतिरेषा तत्र भवतां नैव लोके नान्यस्मिन् वेदे अहं एकारोऽहं ओकारो वास्मि"-इति (१ अ० १ पा० ७ आ०) महाभाष्यवचनस्य नागेशादिकृतं व्याख्यानं चेहालोच्यम्।

वस्तुतस्तु शाखाविशेषेषु व्याकृत्यादिविशेषबोधनपरा एव प्रातिशाख्यग्रन्थाः, सामान्यतः सर्वशब्दानुशासनाय प्रवृत्तात् पाणिनीयाद्व्याकरणादवरजा एव भवितुं मर्हन्ति। अतस्तथैवोक्तं बह्वृक्प्रातिशाख्यशास्त्रप्रयोजनश्लोकव्याख्यानावसरे तत्तृतीयवृत्तिकृतोव्वटेन, कृतञ्च तत्र पाणिनिसूत्रोद्धरणम्। तथाहि—"तथा व्याकरणे यत् सामान्येन, यथा—'ऋचि तु-नु-घ-मशु-तङ्-कु-त्रोरुणाम्'-इति (पा० ६. ३. १३३.), तद् व्यवस्थापयितुमिदमारभ्यते; न सर्वत्रैतानि पदानि अस्यां शाखायां दीर्घा भवन्ति। यथा—"-इत्यादि। एवं माथर्वणप्रातिशाख्येऽप्युक्तं स्वयं सूत्रकृतैव—"एव मिहेति च विभाषाप्राप्तं सामान्येन"-इति। सामान्येन लक्षणेन पाणिनीयेन यद् विकल्पेन प्राप्तम्, तदेव अस्यां शाखायां व्यवस्थितं भवतीति च तदर्थः। अत एवोक्तं महाभाष्यकारेण च—"अवश्यं खल्वप्यस्माभिरिदं वक्तव्यम्, बहुल मन्यतरस्या सुभयथा वा एकेषा मिति। सर्ववेदपारिषदं ह्येतद् शास्त्रम्, तत्र नैकः पन्थाः शक्य आख्यातुम्"-इति (२ अ० १ पा० ३ आ०)।

अथ केषाञ्चिन्मते प्रातिशाख्यकृच्छौनक एवैकः सूत्रद्रष्टा, मण्डलद्रष्टा, कल्पकृत्, शाखाप्रवक्ता चेति। पूर्वप्रदर्शितानि षड्-

गुरुशिष्यवचनान्येवात्रैकं प्रमाणमुपलभ्यते ; तत्रापि नाभैक्य मेव बीजम्, नान्यत् किञ्चनेत्यस्माकम्। समासतः खण्डितश्चैतत् पुरस्तादेव (५५ पृ०)। वस्तुतस्तु शुनकवंशीयाः अद्यतनीया अपि शौनका एव ; तस्मात्तामैक्यबीजकं तादृग मङ्गतमतं त्वति-भ्रमविजृम्भित मिवैव प्रतिभाति ; न हि तत्र किमपि मानं लक्ष्यते, प्रत्युत लक्ष्यन्त एव वादा बहवः। तेषां कतिचित् पुरस्तादेव ध्वनिताः प्रदर्शयिष्यामश्चोपरिष्टादपि (वेदसमालोचने) कतिचिद्। इह च किञ्चित् प्रकटयामः।—

प्रातिशाख्यकारस्य शौनकस्य तु मुनित्वेन व्यवहारदर्शनात् ऋषिकालात् परभवत्व मद्ययुगीयत्वञ्च। तथाहि— "नत्वादौ शौनकाचार्यं गुरुं वन्दे महानिधिम्। मुनीन्द्रं सर्ववेदज्ञं ब्रह्मज्ञं लोकविश्रुतम्"–इति विष्णुतिवल्ल्यां व्याडिवचनम् (२) ; न हि तेन तत्रोक्तम् ऋषीन्द्र मिति। पाणिन्यादीनां पतञ्जल्यन्तानां मद्ययुगीयानां मेव हि मुनित्वेनैव व्यवहारो दृश्यते प्रधानतः सर्वत्र, ऋषित्वेनापि व्यवहारस्त्वौपचारिकः ; पाणिनि-पूर्वजानां माण्डूकि-शाकटायन-गार्ग्य-शाकल्य-कल्यकृच्छौनक-माण्डव्य-पाराशर्यप्रभृतीनां त्वाचार्यत्वेनैव व्यवहारो दृश्यते प्रधानतः सर्वत्र, ऋषित्वेन व्यवहारस्त्वातिदेशिकः ; तेभ्योऽपि प्राचीनतमानां पुराकल्पश्रुतानां वसिष्ठ-वामदेव-सूक्तमण्डलदृक्-शौनकादीनां मन्त्रद्रष्टृणा मेव ऋषित्वं मुख्य मिति तु प्रतिपादितं पुरस्तादेव (३२–४४ पृ०)। तदेवं प्रातिशाख्यकृच्छौनको नून मद्ययुगीयः ; तत्रापि व्याडिसमकालिक इति पाणिनिपरजन्मातो नास्य कथ मपि युज्यते सूत्रद्रष्टृत्वादिक मितोऽप्यपास्तं षड्-गुरुशिष्यस्याभिमत मिति ॥

एवञ्च यद्यपि बह्वृना मेव वैदिकग्रन्थानां प्रणेतृनाम शौनक इत्येवं श्रूयत एव, परं न हि तन्मात्रेणैव तेषां सर्वेषा मेक एव प्रणेतेति प्रामाण्य मुपगन्तु मर्हतीति शौनकानां विभिन्नव्यक्तित्व मसमकालिकत्वञ्च सुतरां सम्पद्यत एव। वर मनुमीयते,— शिक्षाविशेषकृत् शौनकाचार्यः पाणिनेः पूर्वजः; प्रोक्ताधिकारे "शौनकादिभ्यश्छन्दसि (४. ३. १०६.)"-इतिसूत्रीयशेखरे "छन्दसि किम्? शौनकीया शिक्षा"-इतिप्रत्युदाहरणदर्शनात्। कल्पकृत् शौनकाचार्यस्तु ततोऽपि पुरातनः; तत्रैव तद्ग्रन्थस्यैवोदाहरणत्वेन बोधनात्; छन्दस्त्वसामानाधिकरण्येन प्रोक्तृत्व मेव हि तादृग्योदाहरणत्वे बीजम्। यस्तु कल्पकृत्, स एव कर्त्ता शाखाप्रवचनस्यापि। तथा च्युतं विकृतिकौमुद्यां गङ्गाधरभट्टाचार्येण— "शाकला: शौनका: सर्वे कल्पं शाखां प्रचक्षते"-इति (१. ४.)। तत्त्वतः पाठभेदकल्पभेदावेव शाखाभेदहेतू। मण्डलद्रष्टुः शौनकर्षेस्तु द्रष्टृत्वेन व्यवहारात् ततोऽपि प्राचीनत्व मन्ययुगीयत्वञ्च; न हि एतद्युगीयस्य कस्यापि द्रष्टृत्वेन परिचयः क्वाप्युपलभ्यते; अस्ति चैतस्य शौनकस्य द्रष्टृत्वेनैव व्यपदेशः,— "द्वितीयं मण्डल मपश्यत्"-इति (३१ पृ०)। मण्डलशब्दस्तु वैदिकमन्त्रसूक्तानां सङ्ग्रहविशेषस्यैव वाचकः; तदाह सर्वानुक्रमणीकृच्छौनकोऽपि— "तत्तद्दृषिदृष्टानां बह्वृनां सूक्ताना मेकर्षिकर्तृकः सङ्ग्रहो मण्डलम्"-इति, "सम्पूर्ण ऋषिवाक्यन्तु सूक्त मित्यभिधीयते"-इत्यादि च। ततस्तस्माच्च तादृक्सङ्ग्रहकारात् शौनकात् प्राचीनोऽन्य एव शौनकर्षिः सूक्तकारः,— इत्याद्यविचारित मेव सिद्धम्। तत्त्वतः सर्वत्रैव ग्रन्थकालनिर्णये स्मर्त्तव्य मेतत्,— प्राचीनार्याणां गोत्रनाम्ना मेव व्यवहार आसीन्न पुनर्व्यक्तिनाम्ना

मिति ; यथाद्यापि दृश्यते सपिहनामनामव्यवहारो दाक्षिणात्यानां भारतीयानां तथा दूलण्डीयादीना मपि। अतएव व्यासाश्वलायनपाणिनिशौनकयास्कादीनां बहुत्वात् तत्तत्कृतेष्वव्यश्यभावी पौर्वापर्यविभ्रमो भवत्येव ?

यच्च 'आर्षानुक्रमणी'-प्रभृतीनां दशाना मेवग्वेदीयग्रन्थानां प्रणेता बभूव चेक: शौनक इत्याह सर्वानुक्रमणीवृत्तौ षड्गुरुशिष्य:—

"शौनकीया दशग्रन्थास्त ऋग्वेदस्य गुप्तये।
आर्षानुक्रमणीत्याद्या छान्दसी दैवती तथा।
अनुवाकानुक्रमणी सूक्तानुक्रमणी तथा।
षट्क्पादयोर्विधाने च बार्हदैवत मेव च।
प्रातिशाख्यं शौनकीयं स्मार्त्तं दशम मुच्यते"-इति।

एतदपि तादृशभ्रमादेव। तत्त्वतो बृहद्देवताकृच्छौनकस्तु प्रातिशाख्यकृत: शौनकात्, निरुक्तकृतो यास्काच्च बहुवर: ; तत्र बहुत्वेव तयोर्नामोल्लेखदर्शनात्। तथाहि बृ० दे० २. ११३—

"पद मेकं समादाय द्विधा कृत्वा निरुक्तवान्।
पुरुषाद: पदं यास्को वृत्ते-वृत्ते इति त्वृचि॥"-इति।

दृश्यते चात्र निरुक्ते 'पुरुषानदनाय'-इति (२. २. २.)।

"काक्षीवतं सर्व मिति भगवानाह शौनक:।"-इति च बृ० दे० ३. १५२.। लभ्यते चैवं शौनकीयानुक्रमणिकातोऽपि। न हि कोऽपि विज्ञ: स्वं भगवानिति वक्तु मुत्सहेतेति नून मनुक्रमणीकृच्छौनको बृहद्देवताकृच्छौनकात् प्राचीन इत्येवावगम्यते। तथा च षड्गुरुशिष्यकृत: 'शौनकीया दश ग्रन्था:'-इति सिद्धान्त: कथं न विलीनो जलमध्यस्थमसीधोदवदिति सुधीभिर्विभाव्य मेव। एवञ्च य एव प्रातिशाख्यकृत् स एव

आर्थनुक्रमण्यादीना मपि नवानां प्रणेतेति कथं स्वीकुर्महे वयम् ? पर मेतावत्त्वस्माकं भवेत् स्वीकार्यम्,— सर्व एवैते ग्रन्थाः पाणिनीयतो बहूत्तरभवाः; प्रातिशाख्यकृत्सङ्गृहकृतो गुरुशिष्यत्वेन समकालिकत्वप्रतीतेरिति (१२४ पृ०)।

यच्चाह षड्गुरुशिष्यः— "आसीद् गृहपतिर्यो वै नैमिषारण्यवासिनाम्। शतानीकाय राज्ञे वै जनमेजयसूनवे"-इत्यादि। तदपि न; बह्वृक्प्रातिशाख्यकृतः शौनकस्य व्याड़िसमकालिकत्वात्, व्याड़ेश्च पाणिनितोऽन्यूनद्विशताब्दीपरजत्वं प्रतिपादितं चेतः पुर एवेति (१२१पृ०)। तदेवम् सर्वानुक्रमणीभाष्ये दृष्टानि षड्गुरुशिष्योक्तानि शौनकपरिचायकवचनानि सर्वाण्येवास्मान् विस्मापयन्ते एव। तत्त्वतो सर्व एवैते शौनका नूनं विभिन्नकालजा इति बहुपूर्वापरीभावान्विताः; तत्रायं बह्वृक्प्रातिशाख्यकारः खल्वेष शौनको यतो व्याड़िसमकालिकः, तत एव कलेरन्यूनैकादशशताब्द्यां खीष्टजन्मतश्च द्विसहस्राब्दीतः प्रागिहाक्रीड़दित्येवोपलभ्यत इति॥

[यास्कः] निरुक्तकारोऽयं यास्कस्तु तस्मादस्माच्च शौनकात् पराचीनः। दृश्यते ह्यत्र निरुक्ते (१. ६. १.) शौनकीयप्रातिशाख्यसूत्रं मुद्धृतम्— "पदप्रकृतिः संहिता (ऋ० प्रा० २. १.)"-इति। उक्तञ्चेह— "पदप्रकृतीनि सर्वचरणानां पार्षदानि"-इति (१. ६. १.)। अतोऽस्माच्चिरुक्तात् पूर्व मेव प्रणीताः प्रायः सर्व एव प्रातिशाख्यग्रन्था इत्यप्यनुभवामः॥

यत्तु केन चित् "न दाशतय्येकपदा काचिदस्तीति सैयास्कः"-इतिप्रातिशाख्योक्तिदर्शनात् यास्कस्यैतस्य शौनकाग्रजत्वं निर्णीतम्; तस्य तन्निर्णयस्य तु मूले एव कुठाराघातः कृतः पुरस्तात् (२८पृ०)॥

एवं हि निरुक्तकारोऽयं यास्काचार्यः शौनकपरशताब्दीज इत्यपि वक्तुं शक्यते, सम्पद्यते च तथा पाणिनितः त्रिशताब्दी-परजत्व मस्य ; नापि हि त्रि-चतुः-शताब्दी मन्तरा मनुजाना मेतादृशं बुद्धिवैजात्यं सम्भाव्यते,— यत्रैकेनैव सूत्रेण कृतार्थो मुनिः, तदर्थ एवैवं बृहद्ग्रन्थः प्रयोजनीयो भवेत् ;— पृषोदरादीनीति सूत्रेणैव साधितं पाणिनिमुनिना प्रायः सर्वनैरुक्त-कार्य मिति तु बोधित मेव पुरस्तात् (१०, ११ पृ०)। एवञ्चेद मेव स्फुटं प्रतीयते पाणिनिकाले शिष्टानां भाषाव्यवहारत एव पदाना मर्थाः प्रतीयन्ते स्म, अत एव सूत्रयामास पृषोदरादी-नीति ; तत उत्तरकालम् जाते हि शिष्टाना मपभाषाव्यवहार-बाहुल्ये, सञ्जाते च बुद्धिमालिन्ये ऽवश्य मेव विशेषतो निर्व-चनादेर्वक्तव्यत्व मुपगत मत एव प्रवृत्त मिदं निरुक्तं यास्कीय मिति। तदेवं कलेर्द्वादशशताब्द्यां खीष्टजन्मनश्चोनविंशशता-ब्दीतोऽपि प्राक् समभवदयं यास्क इति सिद्धम् ॥

पाश्चात्याध्यापकगोलड्ष्टूकरोल्लावितप्रणालीतो बोथ्लिङ्गीयं प्लव मारुह्य च अपारकालपारावारे विचरन्तो वय मिमं यास्क मप-श्याम ;—कस्यां नु वेलाया मासीनः स प्रणिनायेदं निरुक्त मिति।

साधवो येन गच्छन्ति तेन गच्छन् न दोषभाक्।
निन्दा वा यदि वा श्लंसा नानुगानां हि युज्यत इति शम् ॥

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

(८)

अथेदानीं विचार्यं मस्ति,— कैमर्थिक्येषा प्रवृत्तिस्तस्य यास्कस्येति; "प्रयोजन मनुद्दिश्य न मन्दो हि प्रवर्त्तते"। किञ्च,

"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्य चित्।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते?"–इति।

न केनापीति भावः। अतोऽस्य च यास्कस्यात्र प्रवृत्तेः प्रयोजनं वक्तव्य मेव। न चात्र साङ्ख्यकर्तुः सृष्टिविषयकः प्रश्न इवायं विचारः स्वार्थः परार्थो वास्मारब्ध इति निर्णयायेति; न ह्यन्यप्रकृतिरिव कोऽपि केवलं परार्थं किमपि कर्त्तुं मुत्सहतेऽत्रेति धीमतां सिद्धान्त एव। अत एवाह भगवान् पतञ्जलिः—"नेह कश्चित् परोऽनुगृह्यतव्य इति प्रवर्त्तते, सर्व इमे स्वभूत्यर्थं प्रवर्त्तन्ते। ये तावदेते गुरुशुश्रूषवो नाम, तेऽपि स्वभूत्यर्थं प्रवर्त्तन्ते;—पारलौकिकश्च नो भविष्यति, इह नः प्रीतो गुरुरध्यापयिष्यतीति। तथा य एते दासाः कर्मकरा नाम, एतेऽपि स्वभूत्यर्थं प्रवर्त्तन्ते; भक्तं चैलञ्च लप्स्यामहे, परिभाषाश्च न नो भविष्यन्तीति ("परिभाषाः = दण्डनादिकाः" कै०)। तथा य एते शिल्पिनो नाम, एते च स्वभूत्यर्थं प्रवर्त्तन्ते; वेतनञ्च लप्स्यामहे, मित्राणि च नो भविष्यन्तीति"–इति (३ अ० १ पा० २आ०)। हरिणाप्युक्त मेव मेव—

"निमित्तेभ्यः प्रवर्त्तन्ते सर्व एव स्वभूतये।
अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये"–इति।

एष च विशेषाशयोऽस्य प्रश्नस्य— यथा च खलु ऋक्तन्त्र-व्याकरणस्य ऋग्वेद एव विषयः, सामतन्त्र-व्याकरणस्य सामवेद

एव ; तथैवास्यापि शास्त्रस्य कश्चिदेव एवैको विषयतया निर्दिष्ट उत यथा पाणिनीयं नाम व्याकरणं लौकिकानां सर्ववेदगतानां च सर्वविधसाधुशब्दाना मविशेषेण व्युत्पादनाय प्रवृत्तम्, तथैवेद मपि ?-इति। अत्र ब्रूमः,— नेद मृक्तन्त्रादिवदेकवेद-विषयम्, इह सर्ववेदीयाना मेव निगमानां दर्शनात्; नापि पाणिनीय मिवेदं लोकवेदयोरविशेषेण शासनम्, इह केवल-लोकविदितानां केवलब्राह्मणगतानाञ्च पदानां निर्वचनाना मनालोचनात्; ततोऽयं ग्रन्थः तृतीयश्रेणीकः सर्ववेदमन्त्रव्याख्या-मार्गबोधनायैव प्रणीतः। अत एवाह यास्कः स्वय मेव— "अथापीद मन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते ऽर्थ मप्रतीयतो नात्यन्तं स्वरसंस्कारोद्देशस्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थ-साधकञ्च"-इति (१. ५. १.)। प्रपञ्चितञ्चैतत्तत्रैव तदुत्तरत्र।

अपरञ्चास्य विशेषतः समालोचनयेद मपि लक्ष्यते,— यथा मन्त्राणा मर्थादिज्ञापनाय च प्रवृत्ता ब्राह्मणग्रन्थाः, तथैवेद मपीति। प्रथमं ब्राह्मणग्रन्थेष्वेव निर्वचनानि च समाम्नातानि, ततोऽनुब्राह्मणग्रन्थेषु तन्निर्वचनादिकम्, ततो निदानसूत्रादिग्रन्थेषु बहु लीलायितं तद् भगवता यास्केनाबहं पृथग् ग्रन्थरूपेणेति। ततश्च नेदं शास्त्रं ब्राह्मणग्रन्थीयपदादिव्याख्यामार्गबोधनाय प्रवृत्तम्; अपि नाम यदर्थं प्रवृत्तं ब्राह्मणम्, तदर्थ मेवेद मपीति सर्वेषां वेदानां मन्त्रगतपदादीना मेव व्याख्यानप्रकारबोधनायास्य प्रवृत्तिरिति। अतएव स स्वय मेवोक्तवान् ग्रन्थोपक्रमे— "छन्दोभ्यः समाहृत्य"-इत्यादि; छन्दस्त्वन्तु मन्त्राणा मेव मुख्य मिति सङ्क्षेपः॥

———

(८)

अथ कोऽयं वेदः ?— वेदशब्दस्य कीदृशी व्युत्पत्तिरिष्टा आर्याणाम्, तथा वेदस्य किं लक्षणम्, स्वरूपञ्च तस्य किमिति त्रयः प्रश्नाः स्वत एव सर्वमनःसु समुत्पद्यन्त एव ; तत्समालोचनायैवैतर्हि किञ्चिदिह यतामह इति यावत्।

[वेदः] "विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मादिपुरुषार्था इति वेदाः"—इत्येतद् वेदशब्द-व्युत्पादनं कृतं दृश्यते देवमित्रपुत्रेण विष्णुमित्रेण बह्वृक्प्रातिशाख्यवृत्त्युपक्रमे। अन्यान्यविधानि च सन्ति बह्वनि वेदशब्दव्युत्पादनानि, तानि चान्यत्रान्यत्र द्रष्टव्यानि।

"प्रत्यक्षानुमानागमेषु (प्रमाणेषु) अन्तिमो वेदः"—इति, "समयबलेन सम्यक् परोक्षानुभवसाधनं वेदः"—इति, "अपौरुषेयं वाक्यं वेदः"—इत्यादीनि च वेदलक्षणानि सायणीये ऋग्भाष्यादौ द्रष्टव्यानि। "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः"—इत्येकेनैव वाक्येन च वेदस्य व्युत्पादन-लक्षणेऽप्युक्ते कृष्णयजुर्भाष्यभूमिकायां सायणेनैव। "प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता"—इति वचनञ्च तत्र मानत्वेनोपन्यस्योक्तं च "स एवोपायो वेदस्य विषयः, तद्बोध एव प्रयोजनम्, तद्बोधार्थौ चाधिकारी ; तेन सहोपकार्योपकारकभावश्च सम्बन्धः"—इति।

वेदस्वरूपञ्चोक्त मेवं बौधायनेन—"मन्त्रब्राह्मण मित्याहुः" —इति। आपस्तम्बेन च यज्ञपरिभाषायां स्फुट मुक्तम्—"मन्त्रब्राह्मणयोर्वेदनामधेयम्"—इति। सर्ववेदभाष्यकारेण सायणाचार्येणापि तदेवापस्तम्बीयलक्षण मवलम्ब्य प्रपञ्चित मृग्भाष्यभूमि-

कायां बहुधैव; सिद्धान्तितञ्चैतत् तत्र "मन्त्रब्राह्मणात्मकः शब्दराशिर्वेदः"-इति। उक्तञ्च भगवता जैमिनिमुनिनापि तथैव; तदनुश्लोकितञ्च सर्वानुक्रमणीवृत्तिभूमिकायां षड्गुरुशिष्येण। तथाहि -

"मन्त्रब्राह्मणयोराहुर्वेदशब्दं महर्षयः ॥
विनियोक्तव्यरूपो यः स मन्त्र इति चक्षते।
विधिस्तुतिकरं शेषं ब्राह्मणं कथयन्ति हि ॥
विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदर्श्यते।
ऋग्यजुःसामरूपेण मन्त्रो वेदचतुष्टये ॥
अहेर्बुध्नीय मन्त्रं मे गोपायेत्यभिधीयते।
ऋक् पादबद्धा, गीतन्तु साम, गद्यं यजुर्मन्त्रः ॥
चतुर्ष्वपि हि वेदेषु त्रिधैव विनियुज्यते।
वेदैरशून्य इत्यादौ मन्त्रे त्रैविध्य मुच्यते ॥
प्रस्तुतत्त्विग्विनियोग ऋचान्त्रो मन्त्र यज्ञकारणे।
'सर्वेब्रह्मा'-निरुक्तोऽपि चतुर्भिरिति निर्णयः ॥
ऋग्रूपमन्त्रबाहुल्याद्ऋग्वेदः स्यात् तथेतरौ।
शान्तिपुष्ट्यादिकब्रह्मवर्गप्रणवविद्यया।
ऋचाञ्च यजुषां तुर्य्यो बाहुल्येन विधायकः ॥
एकविंशत्यध्वयुक्त मृग्वेद मृषयो विदुः।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम्।
नवाध्वाथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम् ॥"-इति।

एतेन खलु सर्वेषा मेव वेदानां सर्वविधस्वरूपाण्युक्तान्येव समासतस्तेन धीमतैवेत्यत्राऽस्माकं नैव किञ्चिदुक्तव्य मस्त्यवशिष्टम्;

शास्त्रं जैमिन्यादिभिर्महात्मभिः प्रपञ्चितं मीमांसासूत्रादिकमेव सुधीभिर्द्रष्टव्य मित्यलं चर्वितचर्वणेन वेदस्य पौरुषेयत्वापौरुषेयत्वादिकविचारेणेति ॥

परन्त्वस्यत्रैतदालोच्यम् ,— आपस्तम्बादिमतानुगाः सायणाचार्यादयस्तु मन्त्राणां ब्राह्मणानाञ्च वेदत्वं चिरात् सिद्ध मिति मन्यन्ते। केचित्त्वयतना ब्राह्मणग्रन्थेषु बहुत्र 'य एवं वेद'-इति दर्शनादेव प्रथमं तावत् ब्राह्मणग्रन्थाना मेव वेदाख्या प्रचलिता, ततः कालक्रमेण मन्त्रेष्वपि सा उपचरितेत्याहुः। वयन्तु तदुभरोरेव विपरीतं ब्रूमः ;— पुरासीत् विद्यापरपर्याय एवायं वेदशब्दः ; तथा यतश्च सर्वासा मेव विद्यानां निधानानीमे मन्त्राः प्रदृष्टाः , अतो मन्त्रकाले एव त्रिविधानां मन्त्राणां वाचकः सम्प्रति वेद इति ; ततो ब्राह्मणकाले ब्राह्मणेष्वपि ग्रन्थेषु मन्त्रमात्रपर एव व्यवहृतो वेदशब्दः ; पश्चात् सूत्रकाले तु मन्त्रब्राह्मणयोरुभयोरेव विद्यानिधानत्वेनादरातिशयस्थितेरुभयोरेव बोधकैः सञ्जातो वेद इति। तदत्र त्रयः पक्षाः सम्प्रत्यन्ते ;— (१) मन्त्रब्राह्मणयोर्वेदत्वम् , (२) ब्राह्मणग्रन्थाना मेव मुख्यं वेदत्वम् , (३) सर्वविद्यानिधानानां हि मन्त्राणा मेव वेद इति व्यवहारो मुख्योऽतिपूर्वकालिकश्चेति। अथैषां कतमः पक्षो ज्यायान् इति पूर्वापरदर्शिभिर्माध्यस्थधिषणावद्भिः सूरिभिरेवालोच्यताम् ।

श्रूयते हि शुक्लयजुषि मन्त्रे एव त्रयीपरो वेदशब्दः— "वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः"-इति (१९. ७८.)। "प्रजापतिः 'सुतासुतौ' सुतासुतयोः रूपे 'वेदेन' ज्ञानेन, त्रय्या विद्यया वा 'व्यपिबत्' विविक्त पीतवान्। सुतः = सोमः , असुतः = पयः परिसुच्च"-इति च तस्य व्याख्यानं भाषितं महीधरेण ।

धरेण। तदत्र वेदेनेत्यस्य द्विविधोऽर्थः क्रतौ दृश्यते— 'ज्ञानेन त्रय्या विद्यया वा'–इति। तत्र द्वितीयोऽर्थ एव युक्ततरोऽस्माकम्; मन्त्रे 'वेदेन'–इत्याद्युदात्तश्रवणात्। अस्ति हि वेदशब्दः उच्चादिगणे (६. १. १६०. पा० सू०) पठितः करणव्युत्पाद्यो यौगिको ऽन्तोदात्तः; अस्ति चापरो हृषादिगणे (६. १. २०३.) पठितस्तस्यां रूढः आद्युदात्तो वेद इति। अत एव ऋक्संहितायां श्रुतस्य "यः समिधा"–इति (६. १. ५.) मन्त्रस्य व्याख्याने भाषितं सायणाचार्येण 'वेदेन= वेदाध्ययनेन'–इति। तैत्तिरीयसंहिताया मप्येव मस्ति त्रयीपरो वेदशब्द आद्युदात्तः (७. ५. ११. २.)। तथैवाथर्वणिका अप्यसकृदामनन्ति संहिताया मेव त्रयीपरं वेदशब्दम्। तथाहि— "यस्मिन् वेदा निहिता विश्वरूपास्तेनोदनेनातितराणि मृत्युम्"–इति (४. ७. ५. ६.); बृहत एवात्र हि वेदा इत्यस्यार्थं ऋगादय इति। तथा तत्रैवोनविंशकाण्डे ऽपि त्रिशः श्रुतो वेदशब्दस्त्रयीपर एव। तदेवं सर्वसंहितास्वेव त्रयीपरो वेदशब्दः श्रूयत एवेति मन्त्राणा मेव वेदत्वं सिद्धम्।

एवं ब्राह्मणेष्वपि सर्वत्र श्रूयत एव वेदस्त्रयीपरः। तथाहि, बह्वृग्ब्राह्मणे— "त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्; तान् वेदानभ्यतपत्"–इति (ऐ० ब्रा० ५. ५. ६.); एव मन्यत्रान्यत्र च तत्रैव (६. १५; ७. १८.)। तैत्तिरीयब्राह्मणेऽपि तृतीयकाण्डे (१०. ११. ४.) श्रूयत एव त्रयीपरो वेदशब्दः। तथा छान्दोग्यब्राह्मणे च— "स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेद माथर्वणं चतुर्थम्"–इत्यादि (८. १. २.)। अथर्वब्राह्मणेऽपि— "इमे सर्वे वेदाः"–इत्यादि (गो० ब्रा० १. २. ८.)। तदेवं सर्वब्राह्मणेषु

च त्रयीपरो वेदशब्दः श्रूयत एवेत्यस्माच्च सिध्यति मन्त्रमात्राणां वेदत्वम्।

किञ्च सर्वसंहितासु त्रयीपरवेदशब्ददर्शनमेव प्रमाणयति, आसीन्मन्त्रकालेऽपि मन्त्राणामेव वेद इति व्यपदेशः; तदापि मन्त्रव्याख्यानार्थकानां ब्राह्मणग्रन्थानामनाविर्भावात्। प्रदर्शित-ब्राह्मणवाक्यानि च तदेव दृढयन्ति; ऋगादिशब्दानां मन्त्रेष्वेव मुख्यशक्तेः। अत एवोपपद्यन्ते तत्र गोपथे— "इमे सर्वे वेदाः" -इत्यत्र विशेषणानि "सब्राह्मणाः"-प्रभृतीनि। निरुक्ते ये चार्थज्ञ-प्रशंसनाय शाखान्तरीयमन्त्रा उद्धृता यास्केन, तत्र च श्रूयते त्रयीपर एवाद्युदात्तो वेदशब्दः— "अधीत्य वेदम्"-इति (१. १. २.)। तदेतस्माच्च विज्ञायते मन्त्रकाले मन्त्रार्थक एव वेदशब्दः प्रसिद्ध आसीदिति। यास्को ऽप्याह— "कर्मसम्पत्तिर्मन्त्रो वेदे"-इति (१. १. २.)। स हि कर्मसम्पत्तिर्मन्त्रः क्वास्ति ब्राह्मणेषु संहितासु वा? संहितास्वेवेति चेदितोऽपि स्फुटं व्यज्यते संहितार्थ एव वेदशब्दोऽभिमतः खलु निरुक्तकारस्यैतस्य यास्कस्यापीति॥

एवमपि ज्ञानार्थस्य विदधातोः रूपं वेद इति विद्यैव तस्य-यौगिकार्थः फलति। अनन्ताश्च विद्या इह जगति सन्ति चिररात्राय; तत एव वेदस्य सनातनत्वं मनन्तत्वञ्च मन्यन्ते सर्व आर्याः। आदिसभ्यकालेऽत्र भारते ये ऋषयः प्रादुर्बभूवुः, आसन्नेव ते विविधविद्याविभूषणाः साक्षात्कृतधर्माणः, अत एव तैर्दृष्टा मन्त्रास्तत्कालादेवोच्यन्ते वेदा इति। तथापि मन्त्रेष्वेव वेदशब्दस्य मुख्या शक्तिः। तथा ह्यामनन्ति—

"भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यं मुवास। तए ह जीर्णिए स्थविरए शयानम्, इन्द्र उपव्रज्योवाच। भरद्वाज! यस्ते चतुर्थ

मायुर्दद्याम्, किं मेनेन कुर्या इति। ब्रह्मचर्यमेवैनेन* चरेय मिति होवाच। तए ह त्रीन् गिरिरूपानविषातानिव दर्शयाञ्चकार; तेषाए हैकैकस्यानुष्टिमाददे। स होवाच भरद्वाजेत्यामन्त्र्य। वेदा वा एते, अनक्ता वै वेदाः, एतद्वा एतैस्त्रिभिरायुर्भिरन्वबोचथाः; अथ त इतरदननूक्त मेव"-इति (तै० ब्रा० ३. १०. ११. ३, ४.)।

छान्दोग्येऽपि श्रूयते वेदपर्यायो विद्याशब्दः। तथाहि-"प्रजापतिर्लोकानभ्यतपत् ०-० अग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात्। स एतां त्रयीं विद्यां अभ्यतपत्"-इत्यादि (१. १७. १-१०.)। एवं तत्रैवान्यत्रान्यत्रापि (४. २१. १; २३. २.)।

अतः सुष्ठूक्त मस्माभिः 'पुरासीत् विद्यापरपर्याय एवायं वेदशब्दः'-इत्यादि (१३६ पृ०); तथा सम्भाव्यते चैष पक्षो युक्ततम एवोपन्यस्तो मन्त्रेष्वेव वेदशब्दस्य मुख्या वृत्तिरिति॥

आपस्तम्बादिसूत्रप्रणयनकाले तु ब्राह्मणग्रन्थाना मपि वेदत्वं व्यपदिष्टम्; ततः प्रभृति सिद्ध मेव "मन्त्रब्राह्मणयोर्वेदनामधेयम्"-इति। अत एव मनुसंहितादावपि "वेदः कृत्स्नोऽधिगन्तव्यः (२. १६५.)"-इत्यादिषु वचनेषूभयोरेव ग्रहण मवगम्यते। अत एवैषा सङ्गच्छते (म० सं० २. १५.)—

"उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः"-इति।

"उदिते जुहोति"-इत्यादिविधयस्तु ऐतरेयादिब्राह्मणेष्वेव विश्रुताः। तथाहि-- "इषमूर्जो ह वात्सावत उवाच जातूकर्ण्यो वक्ष्यो वा इदं वेदेभ्यो यद्देतदग्निहोत्र मुभयेद्युरुद्ययात्येद्युर्वाव तदेतर्हि श्रूयत इत्येतदु हैवोवाच कुमारी गन्धर्वगृहीता वक्ष्यो

वा इदं पितृभ्यो यदेतदग्निहोत्रं सुभयेद्युरक्षयताऽन्येद्युर्वाव तदे-तर्हि क्षयत इत्येतदा अग्निहोत्रं मन्येद्युर्हूयते ; तदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्निहोत्रं सुभयेद्युर्हूयते; यदस्तमिते सायं जुहोत्युदिते प्रातस्तस्मादुदिते होतव्यम् । ०—० । उद्यन्वु खलु वा आदित्य आहवनीयेन रश्मीन्त्समन्दधाति । स योऽनुदिते जुहोति, यथा कुमाराय वा वत्साय वाऽजाताय स्तनं प्रतिदध्यात् तादृक् ; तद् ; अथ य उदिते जुहोति, यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रतिदध्यात् तादृक् ०—० । तदेषाभियज्ञगाथा गीयते--

प्रातः-प्रातरृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् । दिवाकीर्त्यं मदिवा कीर्त्ययन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषा मिति"

–इति (ऐ०ब्रा० ५. ५. ४, ५, ६.)। तथा "श्रुतिस्तु वेदो विज्ञेयः (म० सं०२. १०.)"–इत्यत्र च श्रुतिलक्षणे मन्त्राणां ब्राह्मणानाञ्च ग्रहण मिष्टं तस्येत्यपि प्रतीयत एव । ज्ञायते च तथा श्रुतिरिति वेदस्यैव नामान्तर मिति ॥

[श्रुतिः] श्रवणात् श्रुतिरित्याख्या । "श्रुयजीषिसुभ्यः करणे –इति (पा० ३. ३. ८५. वा० २.) निष्पादितः श्रुतिशब्दस्तु श्रवणेन्द्रियपरः ; इह तु "स्त्रियां क्तिन्"–इति (पा०३. ३. ८४) भावार्थ एव क्तिनिष्टः । एष हि वेदस्थिरः मेव श्रूयते गुरुपरम्परानु-सारेण ;— केनापि कदापि एकस्यापि मन्त्रस्य प्रणयनकाल-निर्णये कथ मपि न समर्थः ! अत एव वायुादिवद् अनादिरपौरु-षेयश्चेति स्तूयत एवाय मिति ह्रस्वाः ।

स एषः श्रुतिशब्दो वेदपरो व्यवहृतो नासीत् मन्त्रकाले ; मन्त्रसंहितासु क्वचिदपि वेदार्थश्रुतिशब्दस्य दर्शनाभावात् । अपि तु ऐतरेयादिब्राह्मणप्रचारात् पुरैव गाथाकाले व्यवहृतो भावसाधनः

प्रवादपरः। तथा ऐतरेयकम्—"तस्मादपत्नीको ऽग्निहोत्र माहरेत्। तदेषाभियज्ञगाथा गीयते—

'यजेत् सौत्रामन्या मपत्नीको ऽग्निसोमपः।
मातापितृभ्या मनृणाद्यजेति वचनाच्छ्रुतिः'–इति।

तस्मात् सौम्यं याजयेत् (७. १. ९.)"–इति। ता मिमा मवलम्ब्य-वाख्यातं ब्राह्मणम् "तदाहुर्वाचाऽपत्नीकोऽग्निहोत्रं ०—० स्वर्गाल्लो-कान् जयन्तीति"–इति (७. १. १०.)। तदेवमादीनां दर्शनादिद मपि व्यक्तम्— आदौ मन्त्रकालः, ततस्तेषां यज्ञादिषु व्यवहार-कालः, ततस्तादृग्प्रवादश्रुतिकालः, ततो गाथाकालः, ततश्च ब्राह्मणकालः; गाथामूलान्येव हि बह्वनि ब्राह्मणवचनानि इति॥

स एषः प्रवादार्थः श्रुतिशब्दो ब्राह्मणकालादुत्तरं मन्त्रब्राह्म-णयोरुभयोरपि वाचकः सम्पन्नः। तत एवैतन्निरुक्तत्रयोदशाध्यायान्ते दृश्यते— "सेयं विद्या श्रुतिमतिबुद्धिः"–इति (१३. १. १३.)। तथा स्मर्यते च मन्वादिभिः—

"श्रुतिस्मृत्युदितं धर्मं मनुतिष्ठन् हि मानवः"–इति (२. ९.),
"उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः (२. १५.)"–इत्यादि च।

वेदस्यानुश्रवनामापि श्रुतिमूलक मेव। तथाद्युक्तम्— "दृष्ट-वदानुश्रविकः"–इतीश्वरकृष्णीयसाङ्ख्यकारिकाव्याख्यानावसरे वाच-स्पतिना— "गुरुमुखादनुश्रूयते इत्यनुश्रवो वेदः"–इति॥

लौकिकप्रवादवाक्याना मपि श्रुतिरितिव्यवहारो दृश्यते बहुत्र। तदेवं यस्य कस्यचिद् वचनस्य प्रचारकालस्यादिर्न निर्णीयते,— कदा केन कथित मिद मिति, अपि च प्रामाणिकतया गुरुपरम्प-रयोपदेशो लभ्यते, तत् किल वैदिकं वा लौकिकं वा वचनं श्रुति-

रित्युच्यते। कल्पयन्ति चानुमितश्रुतीः मन्त्रादिभिर्वेदविद्भिर्विहितानां विधीनां मूलानि स्मार्तग्रन्थेषु; वेदार्थस्मरणमूलकत्वादेव च तेषां स्मृतित्वाख्यानात्। तदेवं यस्य च प्रामाणिकस्मृतिवचनस्य मूलं वैदिकवचनं साक्षाद्वोपलभ्यते, तस्य मूलं तादृग्वैदिकवचनं कल्पनीयं भवति, तत् कल्पितवचन मपि श्रुतिरिति व्यवहृतं रघुनन्दनादिभिः। परे तु श्रुतिकल्पनारीतिरयुक्तेत्याहुः; मीमांसाधिकरणमालायाम् 'औदुम्बरीं स्रुष्टोद्धायेत्'-इति विधान मनुसृत्य 'औदुम्बरी सर्वा वेष्टयितव्या'-इति विधेर्लोभमूलकत्वेनाप्रामाण्याख्यापनात्। तदेवं मन्त्रभागानां श्रुतित्वं तु सर्ववादिसम्मतम्; ब्राह्मणभागानां श्रुतित्वं च मन्वादिभिः स्वीकृत मेव; प्रवादवाक्यानां लौकिकानाञ्च श्रुतित्वं व्यावहारिकं दुर्बलम्; कल्पितश्रुतयोऽपि सन्ति रघुनन्दनादीनामिति श्रुतिचातुर्विध्यं सुस्थिर मिति॥

[आम्नायः] "श्रुतिस्त्री वेद आम्नायस्त्रयी"-इति। नामलिङ्गानुशासनात् श्रुतिः, वेदः, आम्नायः, त्रयी, इत्येतान्येकार्थान्येव पदानि। आम्नायसमाम्नायौ चाभिधार्थौ। अतएव "इति माहेश्वराणि सूत्राणि"-इति भट्टोजिदीक्षितप्रथमवचनव्याख्यानावसरे शुक्लं नागेशेन लघुशब्देन्दुशेखरे— "आम्नायसमाम्नायशब्दौ वेदे एव रूढौ"-इति। वेदशब्देन तु आ सूत्रकालात् मन्त्रा ब्राह्मणवचनानि च गृह्यन्त इत्युक्त मेवानुपदम्। अत एव भगवता जैमिनिना कृते इदानीं प्रचलिते मीमांसादर्शने च बहुत्रैव मन्त्रब्राह्मणार्थपरो आम्नायशब्दो दृश्यते। तथाहि — "आम्नायस्य क्रियार्थत्वादानर्थक्य मतदर्थानाम् (१. २. १.)" -"उक्त समाम्नायेदमर्थ॰ (१. ४. १.)"-इत्येवमादयो द्रष्टव्याः।

"स्याद्वान्नायधर्मित्वाच्छन्दसि नियमः (१. ४.)"-इत्येतस्य वाजसनेयिप्रातिशाख्यसूत्रस्य व्याख्यानावसरे च "आम्नायो वेदः'-इत्यारभ्य 'ब्राह्मणं विध्यर्थवादरूपम्, मन्त्रस्तु कर्माङ्गभूतद्रव्यदेवतास्मारकः'-इत्याद्युक्तं तद्ग्राथक्कदुव्वटेनापि। तथा स्वष्टचोक्तं अथर्ववेदीये कौशिकसूत्रे— "आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च"-इति।

यास्कीयेऽत्र निरुक्तेऽप्युभयोरेवाम्नायत्वं स्वीकार्यं गम्यते। तथाहि —"अथाप्यनुपपन्नार्था भवन्ति—'ओषधे त्रायस्वैनम्', 'स्वधिते मैनं हिंसीः'-इत्याह (य० वा० सं०४. १ ; ६. १५.) हिंसन्"-इत्याक्षिप्य (१. ५. १.), समाहितं तत्तत उत्तरम् "यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत"-इति (१. ५. २.)। तदत्र मन्त्राणां आम्नायत्वेन ग्रहणं दृष्टम्। अन्यत्र तु "एषां लोकानां रोहेण सवनानां रोह आम्नातः (७. ६. ४.)"-इत्यत्र, इत उत्तरं मेतस्मिन्नन्ते "यथो एतद्रोहात्मत्वरोहस्विकीर्षित इति, आम्नायवचनादेतद् भवति (७. ७. १.)"-इत्यत्र च ब्राह्मणानां आम्नायत्वेन ग्रहणं दृष्टम। एवञ्च सुव्यक्तं निरुक्तकारेऽप्युभयोरेव मन्त्रब्राह्मणयोराम्नायत्व मिति।

मन्त्राणां आम्नायत्वं मन्त्रेव ततः सङ्गृहीतस्य निघण्टोश्च समाम्नायत्व मुक्त मादौ तेनैव निरुक्तकृता— "समाम्नायः समाम्नातः, स व्याख्यातव्यः"-इति (१. १. १.)। अत एव तद्वृत्तिकृता दुर्गाचार्येणोक्तं भूमिकायाम्— "छन्दोभ्यः समाकृत्य समाकृत्य समाम्नाता, सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव यथायथापन्नास्ता गौर्गौधर्म्मा इति"-इति॥

वेदाङ्गानां मध्याम्नायत्वं निरुक्तकृत्सम्मत मेव ; तत एवोक्तम्

—"समाम्नासिषुर्वेदञ्च वेदाङ्गानि च"–इति (१. ६. ५.)। तदत्र मन्त्राणाम्, मन्त्रेभ्यः सङ्गृहीतानां नैघण्टुकपदानाम्, वेदानाम् (मन्त्रातिरिक्तानाम्) = ब्राह्मणानाम्, वेदाङ्गानाञ्चाम्नायत्व मुररीकृतं यास्केनेति स्फुटम्।

तथा लघुशब्देन्दुशेखरेऽपि प्रत्याहारव्याख्यानावसरे "ननु चतुर्दशसूत्र्या मत्तरसमाम्नाय इति व्यवहारानुपपत्तिः ?"–इत्यादिकं विचार्य भवतार्य पाणिन्याकरणादीनां वेदाङ्गानां मन्त्राम्नायत्वं प्रमाणीकृतं नागेशेनेति।

"तस्येदम्"–इति (४. ३. १२०.) पाणिनीयसूत्रे यदुक्तं वार्त्तिकम्—"चरणाद्धर्मान्नानयोः (२)"–इति, तदनुसृत्यैव "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाङ्गाः"–इति (पा० ४. ३. १२८.) सूत्रतो नाट्यस्याप्याम्नायत्व मुररीकृतं दीक्षितेन। तथा ह्युक्तम्—"चरणाद् धर्मान्नानयोरित्युक्तं तत्राहचर्यान्नटशब्दादपि तयोरेव"–इति। एवञ्च शिलालिप्रभृतिकृतानां प्राचीनतमानां नटसूत्रादीनां मन्त्राम्नायत्वं दीक्षितादिसम्मत मिति॥

ब्रह्मास्त्वाहुः—यतो हि 'म्ना अभ्यासे'–इति धातुत आम्नायपदं निष्पन्नम्, अतो यः कश्चन ग्रन्थोऽभ्यस्त उक्तः, स एवाम्नायः। एकस्यैव पुनःपुनरुच्चारणादिना स्मृत्यनुगतकरण मेवाभ्यसनम्। युगावसानकाले प्रायः सर्वेष्वेव प्राण्यादिष्ववसन्नेषु ये केचिच्छिष्टा अवशिष्टा बभूवुः, तैः स्वस्वस्मृत्यनुरूपः साङ्गो वेदः प्रोक्तः स्वस्वान्तेवासिभ्यः, तैश्च बहुभ्य इत्येवं पुनर्विस्तृतः सः; पुनर्युगान्ते चोपगते पुनः सर्व एव ते ऽन्तर्हिताः, पुनर्नवयुगारम्भे लयावशिष्टैः शिष्टैः स्वस्वस्मृत्यनुरूपत एव प्रोक्तः स्वस्वान्तेवासिभ्यः। एव मेवाभ्यासः सम्पद्यते साङ्गस्य वेदस्य सदैवेति स साङ्गो वेदः

सर्व एव समाम्नाय इत्याख्यायते। अत एव ज्योतिषविषये सूर्य-सिद्धान्ते ज्योतिषोपनिषदध्यायेऽप्युक्त मेव मेव (१८ श्लो०)—

"युगे-युगे समुच्छिन्ना रचनेयं विवस्वतः।
प्रसादात् कस्यचिद्भूयः प्रादुर्भवति कामतः"—इति।

तत्र चायं विशेष उपलभ्यते,— मन्त्राणा मेव यथावत् स्वरवर्णमात्रादियुतानां यथाश्रुताना मभ्यासः क्रियते; स एव मन्त्रभागो दृष्ट इत्युच्यते। तत्रापि स्मृतिच्युत्यादिहेतुभिः पाठ-न्यूनाधिक्यं पाठान्तरत्वं क्रमान्यत्वञ्चानिवार्य मिति शाखान्तरत्वं सम्पद्यते। ब्राह्मणानान्तु तदर्थाभिधानोपयोगित्वात्तच्चान्यथा-प्युपपद्येतेति न तत्र यथावत्पाठाभ्यासः स्वीकृतः प्रत्युत तदर्था-भ्यास एव कृतोऽपरग्रन्थप्रवचनेनेति; स एव ब्राह्मणभागः प्रोक्त इत्युच्यते। एवं वेदाङ्गग्रन्थाना मपि मूलतत्त्वाना मभ्यसनीयत्वे-ऽपि तत्तत्प्रयोगस्थानाना मस्ति देशकालाद्यपेक्षेति देशकालाद्यनु-सारेणैव विधान मुचित मिति प्रतिनवयुगे नवकल्पनैव कृता; स एव वेदाङ्गभागः कल्प इति चोच्यते। तदेवं सर्व एव वेदाङ्गाः तत्त्वतोऽभ्यस्ता अपि अक्षरशः प्रतियुगे नूतनाः कल्प्यन्ते—इति कल्पनाभाजः स्युः, परं शिक्षाप्रभृतीनां षण्णां कल्पनामतो व्यवहारो न दृश्यतेऽपि तु यागादिविधायकानां पैङ्गीप्रभृतीना मेव ग्रन्थाना श्रौतसूत्राणां कल्प इति प्रसिद्धिः; व्यवहार एवात्र निदा-नम्। तथाच वेदाङ्गग्रन्थेषु तेषा मेव श्रौतसूत्रग्रन्थानां प्राथम्य मनुमीयते; यथा हि शैशिरीयाणां षण्णा मेव शाकलत्वेऽपि आद्याया एव शाखायाः शाकल इति प्रसिद्धिः, यथा च सर्वेषां सामवेदीयार्चिकानां छन्दस्त्वेऽपि पूर्वभागस्यैव छन्द इति।

अत एव ब्राह्मणग्रन्थेष्वपि निरुक्तादिनामदर्शनं न विस्मयकरं

भवत्यार्याणाम्। नात्यादिग्रन्थोऽपि नासीत् पुराकल्पे इति को वदितुं क्षमते? परं मन्त्रातिरिक्तानां केषा मपि प्रबन्धानां न हि यथावदक्षरशोऽभ्यसनं सप्रयोजन मित्यतिप्राचीननटसूत्रादीनां कृतकत्वेऽप्याम्नायत्व मव्याहत मेव। तदेवं नटशब्देनापि कात्यायनोक्तधर्मान्नानयोरभिसम्बन्धे को दोषः पाणिनिवृत्तिकृतः खलु भट्टोजिदीक्षितस्य।

पर मत्र चेद मवश्यं धार्यम्, यद् भवतु नाम मन्त्रब्राह्मणात्मकस्य वेदस्य, मन्त्रोद्धृतपदसङ्ग्रहात्मकस्य निघण्टोः, षड्भिभागोपेतस्य वेदाङ्गस्य, अन्येषाञ्च नटसूत्रादीनां सर्वेषा मेव प्राचीनतमाना मार्ष्यशास्त्राणा मान्नायत्वम्; परं मन्त्रभागस्यैवान्नायत्वं मुख्यम्, प्रतिकल्पे मन्त्राणा मेवाक्षरश आम्नानात्; तथैव नैघण्टुकपदानाम्; तदनु ब्राह्मणभागस्य, तस्यापि तथा व्यवहारात्; तदनु वेदाङ्गानाम्, यास्कादिभिः स्वीकारात्; नटशास्त्रादीनान्तु तथात्वे प्रामाण्यं विप्रकृष्टत इतीति॥

[त्रयी] अमरसिंहोक्तेषु वेदनामसु त्रयीत्वेवावशिष्ट मालोचयितुम्; तदप्यालोच्यते यथाज्ञानम्।— रचनायास्त्रैविध्य मेव मन्त्राणां त्रयीत्वे बीजम्। अस्ति हि काचिद्रचना पद्यं नाम, सैव पुरा ऋगिति श्रुता; अस्ति काचिद्रचना गद्यं नाम, सैव पुरा यजुरिति श्रुता; अस्ति काचिद्रचना गानं नाम, सैव पुरा सामेति श्रुता। यतो हि गद्यपद्यगानातिरिक्तो नास्ति रचनाप्रकारः, अत एव ऋक्संहितासु, यजुःसंहितासु, सामसंहितासु, अथर्वसंहितासु वा ऋग्यजुःसामभ्योऽन्यो नैव दृश्यते कोऽपि वेदमन्त्रः। पद्यगद्यगानातिरिक्ता हि रचना कदापि नासीत्, इदानी मपि नावलोक्यते लोके, तत् कथन्नाम ऋग्यजुः-

सामलक्षणातिरिक्तापि मन्त्ररचना भवेद् वैदिकीति। तदाह भगवान् जैमिनिः— "तेषा ऋग् यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुःशब्दः'–इति (मी० द० २. १. ३२, ३३, ३४.)। तदेतन्न्यायविस्तरे स्पष्टीकृतञ्च माधवेन, द्रष्टव्यं तत् तत्रैव। एवञ्च त्रयी नाम त्रिविधरचनामयी आप्तवाणी; सैव वेदः, सैव आम्नायः, सैव श्रुतिरित्यादि।

यद्यपि मन्त्राणा मेव रचनानियमाधीन मेतत्त्रयीनाम, अतो मन्त्रभागस्यैव त्रयीत्व मङ्गीकर्त्तव्यम्, न तु ब्राह्मणभागस्येति वक्तुं युज्यते; "अहेर्बुध्नीय मन्त्रं मे गोपाय य ऋषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि"–इति (तै० ब्रा० १. २. २६.) श्रुतिस्थात्र साधिकैव। अत्र हि "त्रीन् वेदान् विदन्तीति त्रिविदः। त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदाः, ते च यं मन्त्रभागम् ऋगादिरूपेण त्रिविध माहुः, तं गोपायेति योजना"–इत्यधिकरणमालाकारो माधवश्चोक्तवान् तथैव। तथापि मन्त्रभागानुगतब्राह्मणग्रन्थाना मपि त्रयीत्वं व्यावहारिक मिदानीं मन्तव्य मेव; सञ्ज्ञायाः खलु व्यवहाराधीनत्वात्। परं यथोक्तं पुरस्तात् मन्त्रभागस्यैव वेदत्वं, श्रुतित्वं, समाम्नायत्वं च मुख्यत्; ब्राह्मणभागस्य त्वप्रधान मिति; तथेवात्रापिबोध्य मिति॥

इह केचिदन्यथैवाहुरन्यदेशीयाः। तद्यथा— पुरा किल यदा ऋग्वेदो यजुर्वेदः सामवेद इति त्रय एव वेदा आसन्, नासीदथर्ववेदः; तदैव वेदस्य त्रयीत्याख्या व्यवहृतेति। अत एव प्राचीनतमेष्वेव ग्रन्थेषु त्रयीति वेदस्योल्लेखो दृश्यते; नानतिप्राचीनेषु। यथा च छान्दोग्यब्राह्मणे— "अग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात्। स एतां त्रयीं विद्या मभ्यतपत् (६. १७.)"

-इत्यादि । एवं मनुसंहिताया मपि— "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थ मृग्यजुःसामलक्षणम्"-इति (१, २३.)। छान्दोग्यादिभ्योऽर्वाचीना ये ग्रन्थाः, तेषु तु वेदस्य चतुष्ट मेव, न त्रयीत्वम् ; तदानी मथर्ववेदोऽपि सम्भूत इत्येव तथात्वे बीजम् । तथा हि बृहदारण्यके— "अरे अस्य महतो भूतस्य नि.श्वसित मेतद् यद्ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः (४. ४. १०.)"-इत्यादि । किञ्च महाभारतेऽपि —"एकतस्चतुरो वेदान् भारतञ्चैतदेकतः । पुरा किल सुरैः सर्व्वैः समेत्य तुलया धृतम् ॥ चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा । तदा प्रभृति लोकेऽस्मिन् महाभारत मुच्यते"-इति । (१प० २६८, २६९ श्लो०)। पुनस्तत्रैव "यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः । न चाख्यान मिदं विद्यात् नैव स स्याद् विचक्षणः"-इति (१ प० ३६८ श्लो०)। एवञ्च ऋग्यजुःसाम इत्येव त्रयो वेदाः त्रयीशब्दवाच्याः, अथर्ववेदस्तु न त्रयीशब्दस्य यथा वुह्यते, अपि तु गीर्ष्यते। तथा च ऋगादयस्त्रय एव प्राचीनतमाः, अथर्ववेदस्तु तदपेक्षयार्वाचीनस्तेषा मेव परिशिष्ट इति ।

नैतच्चात मस्मन्मनोहरम्, नापि विचारसहम् ; निर्म्मूलत्वात् एकदेशदर्शित्वदोषग्राह्यस्तत्वाच्च । तथाहि— न क्वापि वेदे लोके वा तादृश्यमतस्य किञ्चिदपि मूलं कथ मपि दृश्यतेऽनुमातुं वा शक्यते । त्रयीतिनाम्ना वेदस्य व्यवहार एवात्र निदान मिति चेत्, अस्मदुक्तत्रयीनामकारण मेव तत्संहारकतया सदैव जागर्त्ति ; सत्स्वपि हि चतुर्ष्वपि वेदेषु रचनात्रयभेदनिबन्धनं तेषु त्रयित्व मव्याहत मेव । अत एव, सामवेदे ऋचां यजुषां च पाठा विद्यन्त एव, एवं यजुर्वेदेऽपि ऋचां पाठा दरीदृश्यन्त

एव, कथ मसाङ्कर्यं सामादिलक्षणाना मित्याशङ्क्य सिद्धान्तितं माधवाचार्येण,— अस्तु सामादिनामतः सम्प्रति प्रसिद्धेषु ग्रन्थेषु यजुरादीनां साङ्कर्यम्, परं न हि तेन सामादिलक्षणानां साङ्कर्यं सम्पद्यते; ऋगादिलक्षणानि तु सर्वथा अव्याप्त्यतिव्याप्तिदोषशून्यान्येवेति। तथाहि— "नर्क्सामयजुषां लक्ष्म साङ्कर्यादिति शङ्कते। पादश्च गीतिःप्रश्लिष्टपाठ इत्यस्यसङ्करः॥ ०—०। तत्र त्रिविधाना मृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति। कुतः ? साङ्कर्यस्य दुष्परिहरत्वात्। 'अध्यापकप्रसिद्धेषु ऋग्वेदादिषु पठितो मन्त्रः'–इति हि लक्षणं वक्तव्यम्, तच्च सङ्कीर्णम्। 'देवो वः सवितोत्पुनात्वच्छिद्रेण वसोः सूर्यस्य रश्मिभिः' –इत्ययं मन्त्रो यजुर्वेदे सम्प्रतिपन्नो यजुषां मध्ये पठितः; न च तस्य यजुष्ट्वमस्ति, तदुब्राह्मणे सावित्रर्चे त्यृक्त्वेन व्यवहृतत्वात्। 'एतत् साम गायन्नास्ते'–इति प्रतिज्ञाय किञ्चित् साम यजुर्वेदेऽङ्गीकृतम् (तै० स० १. ६. ५. १)। 'अच्छिन्न मसि। अच्युत मसि। प्राणसंशित मसि'–इति चीणि यजूंषि सामवेदे समाम्नातानि (छा० ब्रा० २. १७.)। तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नायन्ते। तस्मान्नास्ति लक्षण मिति चेत्, न; पादादीना मसङ्कीर्णलक्षणत्वात्। 'पादबन्धेनार्थेन चोपेता वृत्तवद्धा मन्त्राः ऋचः', 'गीतिरूपा मन्त्राः सामानि', 'वृत्तगीतिवर्जितत्त्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि'–इत्युक्ते न क्वापि सङ्करः"–इति (अधि० मा० २. १. ५०.)।

एवञ्च इदानीन्तनाध्यापकप्रसिद्धितो वेदनामग्रहो मुग्धकर एव; वस्तुतो यत्र क्व च ग्रन्थेऽन्यत्र वा यस्य कस्यचिन्मन्त्रस्य पादबन्धेनार्थेनोपेतत्त्वं वृत्तवद्धत्वञ्च दृश्यते, सोऽवश्य मेव ऋङ्मन्त्रः;

एवं यत्र क्व च ग्रन्थेऽग्रन्थे वा यस्य कस्यचिन्मन्त्रस्य गीत्यात्मकत्वं दृश्यते, सोऽवश्य मेव साममन्त्रः; तथैव यत्र क्व च ग्रन्थेऽग्रन्थे वा यस्य कस्यचिन्मन्त्रस्य गद्यात्मकत्व दृश्यते, सोऽवश्यं यजुर्मन्त्रः। एतदेवाङ्गीकृत्योक्तं बह्वृक्प्रातिशाख्यव्याख्याने विष्णुमित्रेण— "तथाचोक्तम्— 'यः कश्चित् पादवान् मन्त्रो युक्तश्चाक्षरसम्पदा। स्वरयुक्तोऽवसाने च ता ऋचं परिजानते'–इति"–इत्यादि। अत एव चातैव निरुक्ते ऋगिति प्रदर्शितं शतपथब्राह्मणीयवचनम् 'अङ्गादङ्गात् सम्भवति"–इति। न ह्येतद्वचन मस्ति क्व चिदपि ऋक्संहितायाम्, प्रत्युत अस्त्येव शतपथब्राह्मणे (१४. ६. ४. २६.); यदि नाम ऋक्संहितावचनाना मेव ऋक्त्व माचार्यसम्मतं स्यात्, तर्हि कथ मुच्येतात्र भगवता यास्केन "तदेतदृक्श्लोकाभ्या मभ्युक्तम् (३. १. ४.)"–इत्यादि। सामवेदीयमन्त्रब्राह्मणेऽपि चैष मन्त्रो विद्यते अङ्गादङ्गादिति (१. ५. १७.), तदेव मिह ऋगिति शतपथीयं मन्त्रब्राह्मणीयं च वचन मभिप्रेतम्, श्लोक इति तदानीं प्रचलिताया मनुसंहिताया वचनञ्च प्रदर्शितम्। तदेव मेवैषाचार्यप्रवृत्तिर्ज्ञापयति यत्र क्व चेदे स्यात् ऋग्लक्षणो मन्त्रः, भवत्येव ग्रहणं तस्य ऋगिति; एवं यजुरपीत्यादि। एवञ्च ग्रन्थानां कालकृतबहुत्वेऽपि वेदस्य त्रैविध्यं तदनु त्रयीत्वञ्च यथा पुरा तथाद्यापि सुस्थित मित्यथर्ववेदोऽपि नात्माद् भिन्नः; तस्यापि ऋग्यजुर्मयत्वात्। अपि च यथा सामबहुले सामवेद इति प्रसिद्धेऽपि ग्रन्थे पठिताना मृचा मृक्त्वं यजुषां यजुष्ट्व मुररीकार्य मेव, न च तत्स्वीकारात् तस्य सामवेदत्वं विहन्यते; तथैव अथर्वक्लृप्तबहुले अथर्ववेद इति प्रसिद्धेऽपि ग्रन्थे पठिताना मृचा मृक्त्वं यजुषाञ्च यजुष्ट्वं कथं न स्वीका-

र्थम् ? तथा स्वीक्रते च तस्य अथर्ववेदत्वं कथं वा विहन्येत ? एवं हि अस्त्यथर्ववेदस्य स्वातन्त्र्यम्, तदीयमन्त्राणां केषाञ्चिदृक्त्वं केषाञ्चिच्च यजुष्ट्वं न केनापि कदापि कथ मपि वारितुं शक्यते। तत् सिद्ध मेतत्,— वेदानां ग्रन्थभेदकृतचतुष्ट्वेऽपि रचनाभेदकृतत्रयीत्वे न कोऽप्यस्ति संशयः। उक्त मप्येतत् सर्वानुक्रमणीवृत्तौ—

"विनियोक्तव्यरूपस्य त्रिविधः सम्प्रदर्श्यते।
ऋग्यजुःसामरूपेण मन्त्रो वेदचतुष्टये।
अहिर्बुध्नीय मन्त्रं मे गोपायेत्यभिधीयते।
ऋक् पादवद्धा, गीतन्तु साम, गद्यं यजुर्मन्त्रः।
चतुर्ष्वपि हि वेदेषु त्रिधैव विनियुज्यते"—इति।

यच्चोक्तम्,— प्राचीनतमेष्वेव ग्रन्थेषु छान्दोग्यादिषु त्रयीव्यवहारः; तदपि त्रय्यर्वाचीनेषु बृहदारण्यकादिष्वेवाथर्वनामेति। तदिदं तेषा मेकदेशदर्शित्व मेवावेदयति; सर्वत्र सर्वविधदर्शनात्। तथाहि, तत्रैव छान्दोग्ये— "ऋग्वेदं विजानाति यजुर्वेदं सामवेद माथर्वणञ्चतुर्थम्"—इति (७. ७.) च; तत्रैव मनुसंहिताया मपि—(९. २९.) "अभिचारेषु", "कृत्यासु"—इति। तत्रैव शतपथब्राह्मणेऽपि—"त्रयो वेदा अजायन्त (११. ५. ८.)"—इत्यादि च; तत्रैव महाभारतेऽपि— "अग्निहोत्रं त्रयी विद्या (१. १००. ६६.)", "कच्चिद्धर्मे त्रयीमूले (२. ५. ८८.)", "न सामऋग्यजुर्वर्णाः (३. १५०. १३.)"—इत्यादि च। किम्बहुना यत्र क्वच ग्रन्थे वेदस्य त्रित्वं दृश्यते, तत्र सर्वत्रैव चतुष्ट्व मपि। तदेवं ग्रन्थानां प्राचीनत्वार्वाचीनत्वभेद एव वेदस्य त्रित्वचतुष्ट्वर्णने बीज मिति मतं सर्वथैवापास्तम्॥

अथर्ववेदस्याधुनिकत्वे पाणिनेरस्मरण मपि मानान्तर मित्यु-

क्षिप्त्र तेषां तथैव । तथाहि— ऋक्, यजुः, साम— इमानि तु मन्त्रलक्षणानि ; ऋग्लक्षणो मन्त्रः, यजुर्लक्षणो मन्त्रः, साम-लक्षणो मन्त्र इति ; लाट्यमन्त्रासु सर्वेष्वेव वेदेषु राजन्ते इति तेषां ग्रहणेनैव सर्ववेदानां ग्रहणं सम्पन्नम् ; सूत्राणा मेव ग्रहणे-नैव यथा सर्वेषा मेव पटाना मिति । अथर्वेति तु न किंविध-स्यापि मन्त्रस्य लक्षणम् ; अपि तु यथा शाकलादिशाखानां साधारणं नाम ऋग्वेद इति, यथा च कठादिशाखानां साधा-रणं नाम यजुर्वेद इति, यथा च कौथुमादिशाखानां साधा-रणं नाम सामवेद इति ; तथैव शौनकादिशाखानां साधारणं नाम अथर्ववेद इति । शाकलादिसंहितायन्थानान्तु दृष्टत्वाभावः ; अपि तु पाणिनेरतिपूर्वतनीयत्वादार्षत्वाच्च प्रोक्तत्वं पाणिनिसम्म-तम् । अत एव यथाप्रयोजनं प्रोक्ताधिकारे एव शाकलादीना सुल्लेखः कृतः पाणिनिना – "शाकलाद्वा (४. ३. १२८.)"-इत्यादिभिः सूत्रैः ; तत्राथर्ववेदीयशौनकसंहिताप्रोक्तुरप्यस्त्ये-वोल्लेखः— "शौनकादिभ्यश्छन्दसि"-इति (४. ३. १०६.) । तस्मिंश्च सूत्रे छन्दसि इति दर्शनादिदञ्च ज्ञायते यत् प्रोक्तत्वेनैव ग्राह्यो-ऽपि न छान्दसः, एव मप्यस्त्येव कश्चन ग्रन्थः पाणिनेर्विदित इति । स च ग्रन्थः खल्वथर्ववेदीयशिक्षैव ; तत एव तत्र प्रत्यु-दाहृतं नागेशेन "शौनकीया शिक्षा"-इति । अथर्ववेदीयकल्प-स्यापि ग्रहणं कृत मेव तत्र प्रोक्ताधिकारे "काश्यपकौशिकाभ्या मृषिभ्यां णिनिः"-इति (४. ३. १०३.) । चतुरध्यायिकौशिक-सूत्रस्याथर्ववेदीयत्वन्तु सुप्रसिद्ध मेव । किञ्च तत्रैव प्रोक्ताधिकारे यथैव "छन्दोगौक्थयाज्ञिकबह्वृचनटाङ्गाः"-इति (४. ३. १२८) सूचितम् ; तथैव "आथर्वणिकस्यैकलोपश्च (४. ३. १३३.)"-

इत्यपि सूत्रित मेव। तथाच यथैव छन्दोगानां धर्म आम्नायो वा इत्यर्थे साधितं छान्दोग्य मिति, तथैव आथर्वणिकानां धर्म आम्नायो वा इत्यर्थे साधित मेव आथर्वण इति पदम्। "चरणाद्धर्माख्यानयोः"-इति (४. ३. १२६.) वार्त्तिकञ्च पाणिनितात्पर्याख्यानपर मेव न तु वाचनिक मित्यपि तत्रैव भाष्ये स्फुटम्। तथाहि— "न चेदानी मन्यदाथर्वणिकानां स्वं भवितु मर्हति, अन्यदतो धर्म्याद्वा आम्नायाद्वा"-इति। तस्मात: सर्वत्रैव "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्"-इत्येव भाष्यसम्मतम्। तदित्थ मथर्ववेदास्तित्वज्ञानं पाणिनेरासीन्नवेति विचारस्तु दूरे आस्ताम्; प्रत्युत अथर्ववेदीया शौनकसंहिता, अथर्ववेदीयकल्पसूत्रं चतुरध्यायात्मकं कौशिकं नाम, अथर्ववेदीया शिक्षा, अथर्ववेदीयानां पाठप्रकाराद्यात्मको धर्मश्चेति सर्वाण्येतानि आसन्नेव तस्य पाणिनेः सुविदितानीति सुव्यक्तम्।

निरुक्तकारो यास्कः पाणिनेरपि पूर्वतनः,-इतिवादिनां नये तु निरुक्तेऽसक्तदेवाथर्ववेदीयनिगमोद्धृतिदर्शनात् तस्य यास्कबहुपूर्वदृष्टत्वनिर्णयेनैव पाणिनिविदितत्वं सुवचम्। तदथर्ववेदस्य पाणिनिविदितत्वविचारस्त्वस्तु पेटिकाबद्धः; तस्मते हि तत्पूर्वजस्य यास्कस्यापि विदित आसीदथर्ववेद इत्युपपद्यते। तद्यथा— "तथापि निगमो भवति— 'य मच्चिति मच्चितयः पिबन्ति'— इति। ०—०। तथापि निगमो भवति— 'यथा देवा अंशु माप्यायन्ति'-इति"-इति निरु० ५. २. ६। तावेतौ द्वावेव निगमौ अथर्ववेदीयावेव (अथ० सं० ७. ७. ८. ६.)। अन्यत्र च "एकं पादं नोत्खिदतीत्यपि निगमो भवति"-इति (१२. ३. १०.)। एषोऽपि निगमोऽथर्वसंहितात एव लभ्यस्तेन; श्रूयते हि तत्रैवैका-

दशकाष्ठीयद्वितीयानुवाकान्त्यसूक्तान्त्या ऋक् "एकं पादं नोत्खिदति सलिलाद्धंस मुच्चरन्"–इत्यादि। किञ्चात्र निघण्टुस्थितस्यैकपादित्यस्यैष एव निगमोऽन्यत्र वैखदेव्यादृचु तु निपात एवेति निर्णयात् निघण्टुसमाम्नायस्मरणात् पुराप्यासीदथर्ववेद इति यास्कसम्मत मेवेत्युपलभ्यते; निघण्टोर्हि यास्कादिभ्यः पूर्वभुवत्वं प्रतिपादित मेव पूर्वम् (२२-२७पृ०)। तस्मात् ऋग्यजुस्सामवेदसमकालिकत्व मेवाथर्ववेदस्येत्यत्र सन्देहलेशोऽप्यकुण्ठ एवेत्यस्माकं मिति॥

वस्तुत एक एव वेदः, त्रिविधरचनात्मकस्त्रयीति प्रसिद्धोऽपि ऋक्संहिता, यजुस्संहिता, सामसंहिता, अथर्वसंहितेति चतुःसंहिताभिश्चतुःस्कन्धान्वितः। संहितालक्षणं तु प्रातिशाख्यादौ प्रसिद्धम्— "पदप्रकृतिः संहिता"–इति (ऋ० प्रा० २. १.), "वर्णानां मेकप्राणयोगः संहिता"–इति (य०वा०प्रा० १. १५८.), "परः सन्निकर्षः संहिता"–इति (पा० १. ४. १०९.); एवमादि। तत्र,— ऋग्लक्षणानां (पद्यात्मकानां) मन्त्राणां चतुर्विधास्वपि संहितासु विद्यमानत्वेऽपि यत्र ग्रन्थे ऋग्लक्षण मन्त्रभूयिष्ठं, (कुत्सापादीनां) यजुर्लक्षणमन्त्राणा मल्पत्वम्, तस्यैव ऋक्संहितात्वम्। एव मन्यासु त्रिविधास्वपि संहितासु यजुर्लक्षणानां (गद्यात्मकानां) मन्त्राणां विद्यमानत्वेऽपि यत्र ग्रन्थे यजुषा मेवाधिक्यम्, ऋचा मपि यजुष्टेनैव पाठो विनियोगश्च, तस्यैव यजुस्संहितात्वम्। अतएवोक्त मध्वर्युब्राह्मणभाष्यभूमिकायां सायणाचार्येणापि— "तत्र यजुषा मध्वर्युवेदेऽतिबहुलत्वात् क्वचित् क्वचित् ऋचां सद्भावेऽपि यजुर्वेद इत्येवाख्यायते"–इति। सामसंहितायास्तु स्तोमानां गानानाञ्च मूलीभूतानां कासाञ्चिदृचाम्, स्तोभलक्षणानां कतिपयानां यजुषां चाश्रयत्वेऽपि प्रधानतया साम्ना मेवाधारभूमित्वं

स्पष्टम्। तदेवं पद्यगद्यगीतिभेदात् या त्रिविधा रचना भवति; तादृग्रचनात्रैविध्यावलम्बनेनैतानि त्रीणि नामानि सम्यञ्चानि, —ऋक्, यजुः, साम इति; ततश्चतुर्थसंहितायाः किं नाम भवितव्य मिति चिन्तायां मेवं विभागकारिणो नाम्नैवैतस्या नामकरण मुचित मिति सिद्धं तन्नामथर्वसंहितेति॥

अथर्वा नामर्षिरेव हि यज्ञप्रक्रियायाः प्रथममप्रकाशकः; अतः स एव स्वाहोत्रादिकार्यसौकर्यायैव ऋगादिनाम्ना वेदविभाजकश्चे-त्यपि नासङ्गतम्। तथा हि— "यज्ञैरथर्वा प्रथमः पथस्ते"–इति (ऋ० सं० १. ६. ४. ५.), "अस्मिन्जातो अथर्वणा"–इति (ऋ० सं० ७. ७. ४. ५.), "त्वा मग्ने पुष्करादध्यथर्वा निरमन्थत" –इति (ऋ० सं० ४. ५. २३. १.), "अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितरमु युवानम्। य इमं यज्ञं मनसा चिकेत प्र णो वोचस्त मिहेह ब्रवः"–इति (अ० सं० ७. १. २.) चैवमादि-मन्त्रलिङ्गात् प्रतीयत एवाथर्वणो यज्ञाविष्कर्तृत्वम्।

"यद्वैव होत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्याख्या त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियते इति त्रय्या विद्ययेति ब्रूयात् (ऐ०ब्रा० ५. ५. ८.)"–इत्यादिश्रुतेश्च स्फुट मिव प्रतीयते यज्ञकार्य-निर्वाहसौकर्यार्थं मेव च ऋगादिसंहिताविभाग इति। किञ्चात्रैव च "अथ केन ब्रह्मत्वं क्रियते ? अया विद्यया"–इत्यतः समया एव त्रयी विद्या ब्रह्मत्वकरणे साधिकेति स्पष्टम्। न चाथर्वसंहिता-ध्ययन मन्तरा समयायास्तस्याः ज्ञानं भवितु मर्हति; होऽध्वर्यूद्गाढ-त्वव्यवहार्यातिरिक्ताना मप्यृग्यजुर्मन्त्राणां तत्र सद्भावात्। अतएव "ऋचाक्षरे परमे व्योम यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ तस्य वाः पृथिवी व्रतं दुहे धेनुर्न दोहं सकलं सरस्वती। सास्मै सहस्रामिषो दुहाना विश्वेदस्मै दुहे यज्ञियं पयः॥ ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ ऋचः पदं गीयते भारभृत्संविश्वमेजय त्रितस्य योषणा। गातुमग्नेरनृक्षरा ऋतज्या अस्तभ्नन्द्यामृषभो अन्तरिक्षम्॥ ऋचः कुक्षी पवमानो वि धावति एष मायी नि सीदति॥"–इति (ऋ० सं० १०. ७१. ११.) मन्त्रस्य निर्वचनावसरे यास्कोऽप्याह—"ब्रह्मा सर्वविद्यः सर्वं वेदितु मर्हति"

–इति (१. ३. ३.)। अप्यथर्ववेदी एव ब्रह्मा भवति, स एव च यज्ञं समन्तात् रक्षति। तथाहि— "ब्रह्मैव विद्वान् यद् भृग्वङ्गिरोवित् सम्यगधीयानश्चरितब्रह्मचर्योऽन्यूनातिरिक्ताङ्गोऽप्रमत्तो यज्ञं रक्षति, तस्य प्रमादाद् यदि वाप्यसावैध्याद् यथा भिन्ना नौरगाधे महत्युदके सम्ब्रवेत्"–इत्यादिः, "तस्माद् यजमानो भृग्वङ्गिरोविद मेव तत्र ब्रह्माणं वृणीयात्; स हि यज्ञं तारयतीति ब्राह्मणम्"–इत्यन्तो गोपथग्रन्थो द्रष्टव्यः (गो० ब्रा० २. २. ५.)। छन्दोगा अपि ब्रह्मणो भिषक्त्व मामनन्त्येव— "भैषज्यकृतो ह वा एष यज्ञो यत्रैवंविद् ब्रह्मा भवति (छा० ब्रा० ५. १७. ८.)"–इत्यादि। सामवेदभाष्यावतरणिकादौ सायणाचार्योऽप्यवोचत्—

'त्रयाणा मपराधन्तु ब्रह्मा परिहरेत् सदा"–इति।

युक्ततरश्चैतद् तदैव ब्रह्मत्वं जि, यदा खलु तस्य चतुर्वेदवित्त्वेन समग्रत्रयीवेत्तृत्वं स्यात; सर्ववेदवेत्तृत्वैव च तस्य विश्वव्यचा इति समुद्र इति चाख्यानं सङ्गच्छते। श्रूयते हि— "समुद्रोऽसि विश्वव्यचा"–इति (य० वा० सं० ५. ३३.) यजुर्मन्त्रः। स्फुटतरश्चैतदाम्नातं दृश्यते गोपथपूर्वार्द्धे एव। तथाहि— "तस्माद्ब्रह्मविद मेव होतारं वृणीष्व, यजुर्विद मध्वर्युम्, सामविद मुद्गातारम्, अथर्वाङ्गिरोविदं ब्रह्माणम्"–इति, "प्रजापतिर्यज्ञ मकरोत्; स ऋचैव होत्र मकरोत्, यजुषाध्वर्यवम्, साम्नोद्गात्रम्, अथर्वाङ्गिरोभिः ब्रह्मत्वम्"–इति (गो० ब्रा० १. २. १. २.) च।

एवञ्च यज्ञीयहौत्रादिकार्यानुसारत एव चतस्रः संहिताः सम्पन्नाः; यत्र च यदीयं विधानादिकं श्रूयते, तदेव तस्य ब्राह्मण मिति च। तदुक्तं सर्वानुक्रमणीवृत्तिभूमिकायाम् —

"विनियोक्तव्यरूपो यः स मन्त्र इति चक्षते।
विधिस्तुतिकरं शेषं ब्राह्मणं कथयन्ति हि"–इति।

एवं त्रयीकस्यैव वेदस्य चतुर्धा विभागः सम्पन्नस्तत्र कः संशयः। सामवेदीयोद्गात्रग्रन्थयोः प्रकरणसन्निवेशदर्शनेन च यज्ञकार्यसौकर्यायैवैकस्य वेदस्य चतुर्भेदाः कृता इत्याभाति स्फुटम् ; दृश्यते हि तयोरुभयोरेव ग्रन्थयोः क्रमात् दर्श-रात्र-संवत्सर-एकाह-अहीन-सत्र-प्रायश्चित्त-क्षुद्रेतिसप्तपर्वात्मकत्वम्। एव मेव अध्वर्युवेदसंहिताभाष्ये प्रथममानुवाक्याख्यावतरणिकायां यदाह सायणाचार्यः— "अस्मिन् वेदे समाख्याता दर्शपूर्णमासेष्टिमन्त्रास्त्रिविधाः, आध्वर्यवा याजमाना हौत्रकाश्चेति। ०—०। एतेषां मध्ये याजमानानां हौत्राणाञ्च चित्रस्थानीयत्वात् भित्ति-स्थानीयाना माध्वर्यवाणा मेवादौ पाठो युज्यते"–इत्यादि, तदपि सङ्गच्छते ; यदि तावतस्त्र एव संहिता यज्ञकार्यानुक्रमेणैवैव ग्रथिता न स्युस्तर्हि तस्य तथोक्तिरसङ्गतित्व मेवोपगच्छेत्तामिति। अपिवा यजुर्वेदीयमैत्रायणीयशाखायाः परिच्छेदविन्यासानां प्रत्यक्ष-सन्दर्शनेनैवास्तङ्गच्छेदेवैषसंशयस्तत् किं मत्र प्रमाणपारायणेनेति।

तथाच निष्पन्न मेतत् ;— होत्रव्यवहार्यमन्त्रासु सर्व एव ऋचः ; तासा मृचां संहननेनोपनिबद्धो ग्रन्थ एव सम्पन्न ऋक्-संहितेति ; तदर्थविनियोगाद्यभिधायकश्च ग्रन्थ ऋग्ब्राह्मण मिति। तावेव ग्रन्थावधुना ऋग्वेद इति प्रसिद्धौ। अध्वर्युव्यवहार्यमन्त्रासु ऋचोऽपि सन्ति परं प्रधानतो यजूंष्येव ; तादृशयजुःसंहननेनोप-निबद्धो ग्रन्थ एव सम्पन्नो यजुःसंहितेति ; तदर्थविनियोगाद्यभि-धायकश्च ग्रन्थो यजुर्ब्राह्मण मिति। तावेव ग्रन्थावधुना यजुर्वेद इति प्रसिद्धौ। उद्गात्रव्यवहार्यमन्त्राः खलु ऋचो, यजूंष्यपि, सन्ति, परं

प्रधानतः सामान्येव; तादृशयर्ग्यजुःसाम्नां संहननेनोपनिबद्धो ग्रन्थः सम्यग्वो सामसंहितेति; तदर्थविनियोगाद्यभिधायकश्च ग्रन्थः सामब्राह्मण मिति। तावेव ग्रन्थावधुना सामवेद इति प्रसिद्धौ। एवं ये, नाम ऋग्वेदमात्रे कृतश्रमाः, अध्यापयन्ति व्यवहरन्ति च ऋग्वेदमात्रम्, त एव ख्यायन्ते ऋग्वेदीति। तेषां ब्रह्मयज्ञादिसिद्धये ये केचन मन्त्राः प्रयोजनीयाः, तेऽपि तदीयसंहिताया मन्त्रनिविष्टाः। ये तु यजुर्वेदमात्रे कृतश्रमाः, अध्यापयन्ति व्यवहरन्ति च यजुर्वेदमात्रम्, त एव ख्यायन्ते यजुर्वेदिन इति; किञ्च यजुःसंहिताया ऋचा मपि सद्भावात् यजुर्वेदिना किञ्चिदृग्बोधोऽपि सुतरां सम्पद्यते, अतस्ते "द्विवेदी"-इत्यप्युच्यन्ते; देशभाषया 'दुवे'-इति। तेषां ब्रह्मयज्ञादिसिद्धये ये केचन मन्त्राः प्रयोजनीयाः, तेऽपि तदीयसंहिताया मन्त्रनिविष्टाः। ये खलु सामवेदमात्रे कृतश्रमाः, अध्यापयन्ति व्यवहरन्ति च सामवेदमात्रम्, त एवाख्यायन्ते सामवेदीति; किञ्च सामसंहिताया ऋचां यजुषाञ्चाप्राधान्यतया विद्यमानत्वात् सामवेदिना ऋग्यजुषोर्बोधोऽपि सुतरां सम्पद्यते, अतस्ते "त्रिवेदी"-इत्यप्युच्यन्ते; भाषायां 'त्रिवाडी'-इति 'तिवारी'-इति च। तेषां ब्रह्मयज्ञादिसिद्धये ये केचन मन्त्राः प्रयोजनीयाः, तेऽपि तदीयसंहितायां ब्राह्मणे चान्तर्निविष्टाः। एभ्योऽवशिष्टमन्त्राणां पेटिकारूपा संहत्यैव निबद्धा या चतुर्थसंहिता सम्पन्ना। तत्र ऋचोऽपि सन्ति यजूंषि अपि। सैवाथर्वसंहितेति प्रसिद्धा। तदर्थविनियोगाद्यभिधायकश्च ग्रन्थोऽथर्वब्राह्मण मिति। तावेव ग्रन्थावधुना अथर्ववेद इति प्रसिद्धौ। क्रतौ ब्रह्मत्वकार्ये कर्त्तव्ये सर्वासा मेवर्चां सर्वेषा मेव यजुषां सर्वेषाञ्चैव साम्नां बोधः प्रयोजनीयः; तादृशसर्वमन्त्रवेत्तृत्वञ्च ऋग्यजुस्सामसंहिताध्ययन-

वता मपि अथर्वसंहिताध्ययन मन्तरा न सम्भवेत्, अतो यथा होत्रे ऋग्वेदः, यथा च आध्वर्यवे यजुर्वेदः, यथैव औद्गात्रे सामवेदः; तथैव ब्रह्मत्वे अथर्ववेदः। किञ्च यथा ऋग्वेदस्य होतृवेद इत्यपरं नाम, यथा च यजुर्वेदस्य अध्वर्युवेद इत्यपरं नाम, यथैव सामवेदस्य उद्गातृवेद इत्यपरं नाम; तथैवाथर्ववेदस्य ब्रह्मवेद इत्यपरं नाम। अपि च ब्रह्मत्वकरणायैवाथर्ववेदाध्ययनं विशेषतः सप्रयोजनम्, तच्च ऋगाद्यध्ययन मृते न सम्भवति, अतो ऽथर्ववेदाध्ययनेच्छूना मृग्वेदाद्यध्ययन मप्यवश्यं कर्त्तव्य मित्यतो ये त्वथर्ववेदिनस्त एव प्रायशस्तुर्वेदाध्यायिनो भवन्ति, ततः "चतुर्वेदी"-इत्याख्यायन्ते, भाषायां 'चौबे'-इति च।

तदेवं मूलत एकस्यैव वेदस्य रचनाभेदमूलकत्रयीत्वेऽपि होत्रादिकार्यसौकर्यार्थं कृतं चतुष्ट मप्यवश्य मादरणीयम्। अतएव दृश्यतेऽत्र निरुक्तेऽपि— "चत्वारि शृङ्गेति, वेदा वा एत उक्षाः" -इति (१३. १. ७.)। सिद्ध मित्थ मेक एव वेदो रचनाप्रकारभेदतस्त्रयीशब्दवाच्योऽपि होत्रादिकार्यानुसारतः संहिताग्रन्थनभेदात् चत्वार इति॥

[छन्दः] "छन्दः"-इत्यपि वेदस्यैवान्यतम मतिप्राचीनं नाम।

(१) छन्दःशब्देन प्रथमं तावत् ऐशप्रबन्धाना मेषां वायुादीनां सर्वेषा मेव बोधो भवति स्म। तत एवैव माथर्वणिका आमनन्ति— "त्रीणि च्छन्दांसि कवयो ०—० आपो वाता ओषधयः" -इति (१८. १. २. ७.)। तत्र छन्दांसि बन्धनानीत्यर्थः। अत्राप्युपपद्यत एतन्निरुक्तम्— 'छन्दांसि छादनात्'-इति (७. ३. ६.); छादनं नाम बन्धन मेव; बन्धनान्येव ह्येमाः सर्वे विषयाः; तदुक्तं साङ्ख्यतत्त्वकौमुद्याम्— "विषयन्ति विषयिण मनुबध्नन्ति

स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत्, विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनाम् (५ श्लो० वा०)"-इत्यादि ।

(२) तत उत्तरं सर्वेषा मपि अक्षरसमाम्नायानां तत्त्वतस्तु येन केनापि प्रकाशितानां सर्वेषां शब्दाना मकारादीनां छन्दः-शब्देन व्यपदेशो भवति स्म । तत एवैवं तैत्तिरीया आमनन्ति— "छन्दः पुरुष इति य मवोचाम, अक्षरसमाम्नाय एव ; तस्यैतस्याकारो रसः"-इति (३. २. ३. ४.) । तत्राप्युपपद्यत एवैतन्निरुक्तम्— 'छन्दांसि छादनात्'-इति ; छादनान्येव हि शब्दा अकारादयोऽर्थानाम् ।

(३) ततः पश्चादार्षेयाणां प्रबन्धेषु ऋगादि-त्रिविधेषु मन्त्रेष्वपि व्यवहृतं छन्द इति । तत एवैव मथ्यार्थवणिका आमनन्त्युच्छिष्टसूत्रे— "अग्न्याधेय मथो दीक्षा कामश्छन्दसा सह । उक्षन्नग्नयश्राः सत्राण्युच्छिष्टेऽधि समाहिताः"-इति (११. ४. १. ८.) । अन्यत्र च "दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद्रसेन । स मिन्द्रियेण पयसाह मग्ने छन्दोभिर्यज्ञैः सुक्रतां क्रतेन"-इति (६. १२. ११. १.) । तत्राप्युपपद्यत एतदेव निरुक्तं 'छन्दांसि छादनात्'-इति ; छादनान्येव हि ते मन्त्रा मनोभावादीनाम् । निरुक्तारम्भेऽपि यद् भाषितम्— "छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः (१. १. १.)"-इत्यादि, तत्रापि मन्त्रेभ्य इत्येव तस्यार्थः ; तत्र हि निघण्टौ मन्त्रमात्रत एवोद्धृतानां पदानां दर्शनात् । अत एव तस्य वृत्तौ 'छन्दांसि=मन्त्राः' -इत्येवोक्तं दुर्गाचार्येणापि ।

श्रूयते चेदं तैत्तिरीयारण्यके— "यश्छन्दसा ऋषभो विश्वरूपः ०—० भूर्भुवः सुवश्छन्द ओम्"-इति (१०. ६.) । " 'यः' प्रणवः

'छन्दसां' वेदानां मध्ये 'ऋग्भवः' श्रेष्ठः"-इत्यादि च तद्भाष्यं सायणीयम्। तथैव छान्दोग्यब्राह्मणेऽपि— "देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिरच्छादयन्; यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वम्"-इति (३. ४. २.)। शतपथेऽप्येवमेव— "यदेभिरात्मान माच्छादयत्, देवा मृत्योर्बिभ्यत, तच्छन्दसां छन्दस्त्वम्"-इति (४. ५. १. १.)।

निघण्टुस्थस्य (२. ७. १४.) कान्तिकर्मणोऽपि, धातोर्निष्पन्ने छन्द इत्येतत्। तथाच सर्व एव वेदाः काम्यमानाश्चास्माकं सर्वकामपूरकाः कमनीया वा। अर्चतिकर्मण एव (३. १४. २०, २१.) भवति छन्द इति च केचित्। तथाच सर्वेषामेव वेदमन्त्राणां मर्चायां गतिरिति छन्दस्त्वम्; अर्चनीया वा सर्वे वेदा अस्माकमिति। तदेवं पुरा सर्वेषां मन्त्राणां साधारणं नामासीच्छन्द इति सर्वसम्मतम्। अतएव निघण्टौ स्तोत्रनामसु (३. १६. १०.) 'छन्दः'-इति पदमाम्नातम्। पाणिनीयसूत्रेषु, कात्यायनीयवार्त्तिकेषु, पतञ्जलेरिष्टिषु, अन्यत्रान्यत्र चैवमादिषु ग्रन्थेषु सर्ववेदपरं छन्दोवचनं सर्व्वशास्त्रसम्मतं सुप्रसिद्धञ्चेत्यतः सर्व एव वैदिकास्छान्दसा इत्यभिधीयन्तेऽपीति।

(४) अस्मीदृशपरमपि ज्ञेयम्;— "ऋचः सामानि छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे० (अ० सं० ११. ४. २. ४.)"-इत्याथर्वणे, "तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत (ऋ० सं १०. ९.)"-इत्यृचि च "छन्दांसि"-इति पदेन सामवेदीयच्छन्दोनामग्रन्थीयमन्त्राणा मेव ग्रहण मिष्यते छान्दसैरेकमत्येति। सामवेदीयानां हि संहिता, छन्दो गान मिति द्विधा भिन्ना। गानं तत्र

गेयारण्योहोक्तेति चतुर्विधम्; छन्दस्तु योनिरुक्तरेति द्विविधम् तयोश्छन्दोग्रन्थयोर्हयोश्चार्चिक इत्यपि व्यवहारोऽनतिप्राचीनो वैयाकरणतोषकरः। एवं हि यथैव 'तस्मात् सर्वहुतः यज्ञात्' 'ऋचः ऋग्वेदीयाः, यजुर्वेदीयाः, अथर्ववेदीयाश्च; 'यजुः' यजूंषि यजुर्वेदीयानि सामवेदीयानि अथर्ववेदीयानि च हृत्तगीतिवर्जितानि वाक्यानि; 'सामानि' सामवेदीयानि यजुर्वेदीयानि च 'जज्ञिरे' तथैव 'तस्मात्' तत एव यज्ञात् 'छन्दांसि' सामवेदीयगानमूलीभूताश्छन्दोनामकमन्त्राश्च जज्ञिरे इति तदर्थः। नन्वेवं तेषु छन्दःसु च ऋग्लक्षणं विद्यत एवेति पुनश्छन्दोग्रहणमानर्थकं भजेतेति चेत्, न; तेषां प्राधान्यख्यापनाय ब्राह्मणवसिष्ठन्यायेन पृथग्ग्रहणस्येष्टत्वात्; अन्यथा हि ऋग्वेदत एवोद्भूतास्ते मन्त्रा इति भ्रममूलक मप्राधान्यं स्यात्तेषा मिति।

एतेन ऋग्वेदत एव साममूलीभूतास्ता ऋचस्तत्र सङ्गृहीता इति मतं तु दूरोत्सारितम्। पुनर्विशदयिष्यामश्चैतदिहैवोपरिष्टान्मन्त्रनिरुक्तिप्रकरणे। वस्तुतो यज्ञार्थ मेव होत्रम्, यज्ञार्थ मेवौद्गात्रम्; तत्र होत्रकार्यनिर्वाहाय ये मन्त्राश्रिताः, ते हि सर्व एव ऋक्संहितायां दृश्यन्ते; उद्गात्रकार्यनिर्वाहाय ये तु मन्त्राश्रिताः, ते सामरूपा ऋग्रूपाश्च; त एव दृश्यन्ते सामसंहितायाम्। तत्र च सामसङ्गातात्मग्रन्थानां सामेत्येव प्रसिद्धिश्चिरन्तनी, इदानीन्तु गान मित्यपि; ऋक्सङ्गात्मग्रन्थयोस्तु छन्द इत्येव प्रसिद्धिः पुरातनी, आर्चिक इति तु पाणिनीयाना मिति विशेषः। इत्थं त्वत्र पश्यतु तावत्— ऋक्संहितातः सामवेदीयगुंदरणस्य कोऽवसरः? यदैव यथैव यतएव येनैव ऋक्संहितायां ऋचां सङ्ग्रहः सम्पन्नः, तदैव तथैव ततएव तेनैव साममंहितायां

च्छन्दसाञ्च सङ्ग्रहः ; तत्प्रतिपत्त्यापनायैव "छन्दांसि जज्ञिरे तस्मात्"–इति श्रुतः पृथगुपन्यास इति ।

(५) गायत्र्यादीना मपि छन्दस्त्वं व्यवस्थितं पुरैव ; "छन्दांसि च दधतो अध्वरेषु (ऋ० स० ८. १६. ५.)"–इत्यादि मन्त्रेष्वपि तथा प्रतीतेः । अत्रापि छादन मेव बीजम् ; भवति हि शब्दानां छादनं गायत्र्यादिभिः । किञ्च यथा खलु पद्यैर्भवति शब्दानां छादनम् , तथैव गद्यैर्गानैरपीति सर्वविधरचनाना मेव छन्दस्त्वं चिरात्प्रतिष्ठितम् ; कालभेदाल्लौकिकव्यवहारो विभिन्न इत्यन्यदेतत् । अत एव "छन्दांसि=छादनात्"–इति व्याख्यानावसरे श्रुतं दुर्गाचार्येण— "ते (मन्त्राः) छन्दोमयाः ; नाच्छन्दसि वागुच्चरति"–इत्यादि । अतएव च गद्यात्मकस्य यजुर्मन्त्रस्यापि छन्दोनिर्णयं कुर्वन्ति वैदिकाः , याजुषीति गायत्र्यादिभेदोऽपि वर्णितः पिङ्गलाचार्येण (३. ३–८ सू०) । एवञ्च निश्छन्दो यजुरिति चापेक्षिकं वचः ; कात्यायनेन सर्वेषा मेव हि यजुर्वेदीयमन्त्राणां छन्दोज्ञानस्य विधानात् (अनु० १. १.) । माध्यन्दिनीभाष्योपक्रमे महीधरेणाप्युक्तम्— 'तत्र यजुर्वेदमन्त्रेषु कानिचिद् यजूंषि काश्चन ऋचः ; तत्र ऋचां नियताक्षरपादावसानाना मावश्यकं छन्दः कात्यायनेनोक्तम् , यजुषां षडुत्तरशताक्षरावसानाना मेकाक्षरादीनां पिङ्गलेन दैव्येक मित्यादिनोक्तं छन्दो बोद्धव्यम्'–इति ।

(६) यतः प्रभृति 'मन्त्रब्राह्मणयोर्वेदनामधेयम्'–इत्यभूत् सुदृढम् , ततः प्रभृत्येव ब्राह्मणग्रन्थाना मपि छन्दःशब्देन च ग्रहणीयता सुतरां सम्पन्ना ; एव मपि मन्त्रभागाना मेव मुख्यं छन्दस्त्व मिति तु न ततोऽपि विलय मुपगतम् । अतएव यास्को मन्त्रार्थमात्रे एव छन्दःशब्दं प्रायुङ्क्त (१. १. १.), मन्त्रब्राह्मणयो-

उभयोरेवाविशेषेण छन्दःशब्दव्यवहारं ज्ञातवता भगवता पाणिनिनापि क्वचित् प्रायोजि मन्त्रेष्वेव च छन्द इति। तथाहि-- "छन्दोब्राह्मणानि च तद्विषयाणि (४. २. ६६.)"-इत्येवमादीनि समालोच्यानि; न हि तत्र छन्दःशब्दस्योभयपरत्वे ब्राह्मणानां पृथक् ग्रहण मुपपद्यते।

(७) ततो वेदाङ्गाना मपि वेदत्वातिदेशात् छन्दस्त्व मप्यनिवार्य मेव। तदुक्तं भगवता पतञ्जलिना — "छन्दोवत् सूत्राणि भवन्ति"-इति (१ अ० ४ पा० २ आ०), परं तत्रापि ये केचित् शौनकीयशिक्षादयः, तेषां वेदाङ्गत्व मस्तु मास्तु वा छन्दस्त्वं तु नास्त्येव। तथा च दर्शितं प्रत्युदाहरणम्-- 'शौनकादिभ्यश्छन्दसि" -इति-(४. ३. १०६)-सूत्रीयशेखरे 'छन्दसि किम् ? शौनकीया शिक्षा'-इति। अपि वा तत्र सूत्रे मुख्यछन्दस्त्व मेवापेक्षितम्, न च तद्वेदाङ्गाना मित्येव तथोक्तं नागेशेनेति। प्रातिशाख्यादावपि व्यवहृत एव छन्दःशब्दः पतञ्जलिना— "छन्दःशास्त्रेषु"-इति (१अ० २पा० १आ०); प्रातिशाख्यादिष्वेव तदर्थो गम्यते; अपि वा छन्दसां शास्त्रेषु इत्येव तदर्थः।

(८) नागेशादिभिस्तु भिक्षुसूत्रनटसूत्रयोरपि छन्दस्त्वं स्वीकृतम्। तथाहि— "तित्तिरि०। इत आरभ्य वक्ष्यमाणाः प्रत्यास्तेनैकदिगित्येतत्पर्यन्तं छन्दसि वाच्ये इष्यन्ते। शौनकादिभ्यश्छन्दसीत्यतश्छन्दोग्रहणस्य पूर्व मपकर्षादुत्तरत्रानुवृत्तेश्च"-इति लघुशब्देन्दुशेखरे द्रष्टव्यम्। तित्तिर्यादिषु तेनैकदिगिति सूत्रतः पूर्वेषां (४. ३. १०२-१११.) दशानां सूत्राणां नवमे एव "भिक्षुनटसूत्रयोः" ग्रहणं दृश्यते। तदेवं क्रमादिदानी मार्षेतिप्रभृतिग्रन्थमात्रस्यैव छन्दस्त्व मुररीकुर्वन्ति विपश्चित इत्यलम्॥

[स्वाध्यायः] स्वाध्याय इति च तस्यैव वेदस्य नामान्तरम् ; "स्वाध्यायोऽध्येतव्यः (तै० आ० २. १५. ७.)"-इत्यातिश्रुतिषु "यः स्वाध्याय मधीतेऽब्दम् (२. १०७.)"-इत्यादिस्मृतिषु च तथैव व्यवहारात्। द्विजातिभिः सम्यगध्येय एष इत्येवायं स्वाध्याय इति कथ्यते। अतएवाह भगवान् मनुः (२. १६८.)—

"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
सजीवन्नेव शूद्रत्व माशु गच्छति सान्वयः"-इतीति ॥

[आगमः] आगम इति च वेदस्यैव नामान्तरम् ; "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"-इति पाणिनीयवार्त्तिककारकात्यायनाद्युक्तेः। "आगमः,— खल्वपि ब्राह्मणेन षड़ङ्गो वेदोऽध्येयो ज्ञेयश्च"-इति च तत्र पातञ्जलम्। भट्टकुमारिलेनाप्युक्तं स्वश्लोकवार्त्तिकभूमिकायाम्— "आगमप्रवणत्वाहं नापवाद्यः स्खलन्नपि"-इति। साङ्ख्यकारिकाया मीश्वरकृष्णेनापि यदुक्तम् "तस्मादपि चासिद्धं परोक्ष मप्तागमात् सिद्धम्"-इति, तदप्येतदभिप्रायेणैवेति ॥

[निगमः] निगम इति च आगम इति चानर्थान्तरम्। यास्कीयेऽत्र निरुक्ते यावन्ति खलूदाहरणानि दर्शितानि, प्रायस्तावतां सर्वेषा मेव निगम इत्युपन्यासो दृश्यते। तथाहि— "तत्र खलु इत्येतस्य निगमा भवन्ति—"-इत्यादि (३. २. ३.)। "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते, दमूनाः क्षेत्रसाधा इति ; अथापि नैगमेभ्यो भाषिकाः उष्णं घृत मिति"-इति (२. १. ३.) चाह स एव यास्कः। "निगमाः ०—० निगमनात्"-इति (१. १. १.) च नैरुक्त मिति ॥

अत्र चेदं तत्त्वम्— आदौ तु निगम इति मन्त्रभागस्यैवाभि-

धान मासीन्न ब्राह्मणभागस्यापि ; निरुक्तग्रन्थे सर्वत्रैव मन्त्राणां मन्त्रांशानाञ्चैव निगमत्वेनोपन्यासात्, "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः क्रतो भाषन्ते , दमूनाः क्षेत्रसाधा इति (२. १. ३.)"–इति तत्प्रदर्शितयोः 'दमूनाः'–'क्षेत्रसाधाः'–इत्यनयोः पदयोः मन्त्रभागे एव विद्यमानत्वाच्च । मन्त्रभागत उद्धृतानां पदानाम् , तदाश्रयग्रन्थानां चास्ति निगम इति व्यवहारः । तथाहि मनुसंहितायाम्— "नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान्"–इति (४. १९.) । अत्र चोक्तमिदं कुल्लूकेन— "तथा पर्यायकथनेन वेदार्थावबोधकान् निगमाख्यांश्च ग्रन्थान्"–इति । मेधातिथिना तु व्याख्यातम्— "वैदिका निगमाः = वेदार्थज्ञानहेतवो निगम निरुक्तव्याकरणमीमांसाः"–इति । अत्र निगम इति निघण्टोरेव ग्रहणं तस्याभिप्रेतं गम्यते । ततः कालप्रभावाद् ब्राह्मणग्रन्थेष्वप्युपसङ्क्रान्तं निगमाभिधानम् । अत एव भागवतादौ निगमपदेन मन्त्रब्राह्मणोभयात्मकस्य वेदस्यैव बोधो गम्यते । तथाहि (१. १. ३.)—

"निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रस मालयं मुहुरहो रसिका भुवि भावुकाः"–इति।

"निगमो वेदः , स एव कल्पतरुः , सर्वपुरुषार्थोपायत्वात् ; तस्य फल मिदं भागवतं नाम"–इति तत्र श्रीधरस्वामी , "निगमकल्पतरोः सर्वफलोत्पत्तिभुवः शाखोपशाखाभिर्वैकुण्ठ मध्यारूढस्य वेदरूपतरोः"–इति तु तत्र क्रमसन्दर्भः , "निगमो वेदः स एव कल्पतरुः"–इत्यादि च तत्रैव विश्वनाथः ।

वस्तुतो मन्त्रभागस्य निगमत्वं चिरादेव व्यवह्रियते , ब्राह्मणभागस्य तथा व्यवहारस्त्वनतिप्राचीनः ऐतरेयादिभिः प्रोक्ताः प्रसिद्धा ब्राह्मणग्रन्थास्तु तन्निगमव्याख्यानादिपरा एवेति । यदा हि

बहु कालपार्थक्यात् मन्त्रार्थाणां दुर्बोधतोपपन्ना, तदैव यज्ञानुष्ठानतत्परैः तदानीन्तनैर्ब्राह्मणैः तेषां मन्त्राणां विधानादिव्यवस्थया सह मन्त्रान्तर्गतदुर्बोधपदानां मर्थाः अपि भाषिताः ; अतो ब्राह्मणान्येव आदिवेदभाष्याणीतिसुवचम्। तद्यथा श्रूयतेऽत्र मन्त्राः (ऋ०सं० २. ३. २३. ४; ८. ४. १९. ६.)—

"यज्ञेन यज्ञ मयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः"–इति।

तद्विधिव्याख्यानपरश्चैतदैतरेयकं ब्राह्मणम्— "यज्ञेन यज्ञ मयजन्त देवा इत्युत्तमया परिदधाति। ०—०। छन्दांसि वै साध्या देवाः, तेऽग्रेऽग्निनाग्नि मयजन्त। 'ते स्वर्गं लोक मायन्' आदित्यश्चैवेहासन्नङ्गिरसश्च (१. ३. ५.)"–इत्यादि। तत एष निरुक्तेऽपि व्याख्यातः (१२. ४. ७.)।

तथैव योऽयं शुक्लकृष्णयोरुभयोरेव यजुषोरारम्भमन्त्रः—"इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे" –इति। तस्यैतस्य विधानैः सह दुर्गमपदव्याख्यानानि च कृतानि दृश्यन्ते शुक्लकृष्णयोरुभयोरेव ब्राह्मणयोः। तथाहि शतपथब्राह्मणे – "वृष्ट्यै तदाह यदाह इषे त्वेति"–इति, "यो वृष्टादृग् रसो जायते, तस्मै तदाह"–इति, 'यज्ञो वै श्रेष्ठतमं कर्म'–इति च (१. ७. १. १–५.)। तैत्तिरीये "तृतीयस्या मितो दिवि सोम आसीत्"–इत्यारभ्य "श्रेष्ठतमाय कर्मण इत्याह यज्ञो हि श्रेष्ठतमं कर्म तस्मादेव माह"–इति यावत् (तै० ब्रा० ३. २. १. १–४.) ग्रन्थसन्दर्भो द्रष्टव्यः।

तथा श्रूयन्ते सामवेदे सर्वसामस्वेव ये स्तोभाः, ते खलु व्याख्याता दृश्यन्त एव तद्ब्राह्मणे— "अयं वाव लोको हाउ-

कारो वायुर्हायिकारश्चन्द्रमा अथकारः आत्मेहकारोऽग्निरीकारः अदित्य उकारो निहव एकारो विश्वेदेवा ओहोइकारः प्रजापतिर्हिङ्कारः प्राणः स्वरोऽन्नं या वाग् विराट् अनिरुक्तस्त्रयोदश स्तोभः सञ्चारो हुप्कारः (छा० ब्रा० ३. १३. १-३.)"-इति।

वज्रलेपायितश्चाय मर्थो मीमांसादर्शने। तथाह्यस्ति तत्र मन्त्रलिङ्गाधिकरणे सूत्रम्— "विधिशब्दाच्च"-इति (१. २. ५३.)। विधिशब्दाश्च विवक्षितार्थानेव मन्त्रानुवदन्ति,— 'शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येतदेवाह'-इति"-इति तद्भाष्यं शबरस्वामिकृतम्। "मन्त्रव्याख्यानरूपो ब्राह्मणगतः शब्दो विधिशब्द इत्युच्यते"-इति च तत्राह सायणाचार्योऽपि। तत्रैवोदाहृत्य व्याख्यातञ्च तेनापि तथैव ब्राह्मणम्। तथाहि— "स चैव मान्नायते— 'शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येवैतदाह'-इति। तत्र 'शतं हिमाः (ऋ० स० १. ५. ८. ४.)'-इत्येतद् व्याख्येयमन्त्रस्य प्रतीकम्, अवशिष्टं तु तस्य तात्पर्यव्याख्यानम्"-इत्यादि। तद्भाष्येऽप्युक्तम्—'अत्र हिमशब्देन तद्युक्ता हेमन्तर्त्तवोऽभिधीयन्ते; तथाच ब्राह्मणम्'-इत्यादि।

भगवता कात्यायनेनापि यजुःप्रातिशाख्ये निगमापरपर्य्यायस्य मन्त्रभागस्यैव वेदत्वं तद्व्याख्यापरस्य ब्राह्मणभागस्य भाष्यत्व मिति मन्त्रब्राह्मणयोः पार्थक्यं स्फुटं सूचितम्। तथाहि— "ॐकारं वेदेषु (१. १८.)। अथकारं भाष्येषु"-इति (१. १९.)। यदि च तत्र तद्भाष्यकारः खलु उव्वटो वेदशब्देन मन्त्रब्राह्मणयोरुभयोरेव ग्रहणं स्वीचकार, भाष्यशब्देन च कल्पाद्यङ्गानाम्; परं तत्रैवानुपद मेव "सप्त। त्रीन्। द्वौ। एकम्"-इति स्वरविधायकेषु सूत्रेषु (१. १२७-१३०) सामस्वर-नैगमस्वर भाषिक-

स्वर-यज्ञकर्मस्वराणां विधानस्य पर्य्यालोचनयेदमुक्तभाष्यग्रन्थेन ब्राह्मणाना मेव बोधने कात्यायनाभिप्रायोऽनुभूयते ; "अथ ब्राह्मण-स्वरसंस्कारनियम."-इत्यारभ्य "तान एवाङ्गोपाङ्गानाम्"-इत्यन्तेन परिशिष्टग्रन्थेन भाषिकादिस्वराणां सुष्ठु परिचायितत्वात् । ब्राह्मण-ग्रन्थानां हि भाष्यत्वेनैव तदीयस्वराणां भाषिकत्वसिद्धिः । ब्राह्मण-स्वर एव भाषिकस्वर इत्युच्यते इति तु सर्वसम्मतम् । अतएवो-क्तम् "एकम्"-इति सूत्रस्योव्वटभाष्यस्य टीपन्याम्— "मन्त्र-काण्डपठितानां मपि ब्राह्मणभागानां मखस्तूपर इत्यादीनां वैस्वर्यम् (निगमस्वरत्वम् एव ; ब्राह्मणकाण्डपठितानां विश्वेदेवाः ग्रोक्षन मपथेहेत्यादीनां भाषिकस्वर एवेति"-इति । मन्त्रकाण्डे ब्राह्मणवचनानाम्, ब्राह्मणकाण्डे च मन्त्राणां पाठस्तु कृष्णयजु-र्वेदे एवाम्नातो नान्यत्रेति च स्मर्त्तव्यम् ।

तथा तैत्तिरीयसंहिताभाष्यभूमिकाया मपि सष्ट मेवाभि-चख्यौ सायणाचार्य्यो ब्राह्मणानां मन्त्रव्याख्यानग्रन्थत्वम्— "यद्यपि मन्त्रब्राह्मणात्मको वेदः, तथापि ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् मन्त्रा एवादौ समाम्नाताः"-इति ।

तदित्थं सिद्ध मेव सर्वेषां हि मन्त्रग्रन्थाना मसाधारणं नाम मन्त्र इति निगम इति च ; एवं सर्वेषा मेव ब्राह्मणग्रन्थाना मसा-धारणं नाम ब्राह्मण मिति भाष्य मिति च ; तथा मन्त्रग्रन्थेषु श्रुतानां पदानां वाक्यानां स्वराणाञ्च नैयमत्वम् ; ब्राह्मणग्रन्थ-श्रुतानां पदानां वाक्यानां स्वराणाञ्च भाषिकत्व मिति । अत एव "प्रोक्षणन्तु हिरण्यवता पाणिना दर्भपिञ्जूलवता वेति भाषि-कम् (६. २.)"-इत्युक्तं सङ्गच्छते साङ्ख्यायनगृह्यकारस्येति ।

"अथापि भाषिकेभ्यो धातुभ्यो नैगमाः ०—० ; अथापि

नैगमेभ्यो भाषिकाः (२. १. ३.)"–इत्यादौ निरुक्ते श्रुतं भाषिकपदं यदि भाषाशब्दमूलक मेव, तथापि न क्षतिः ; भाषाभाष्ययोरेकधातुजत्वात् । किञ्च भाषयोपनिबद्ध मेव भाष्यं भवति ; मूलार्थबोधने एव हि सर्वभाष्यस्य तात्पर्यम् ; न च चलितभाषया कथन मन्तरा मूलस्य स्पष्टतया बोधः सञ्जायते । तदेवं वेदस्य दुर्बोधत्वपरिहाराय यदा ब्राह्मणग्रन्था विरचिताः, तदा तादृश्या एव भाषाया व्यवहार आसीत् यादृश्या रचितानि वेदभाष्यरूपाणि ब्राह्मणानि । एवञ्च तदानीं ब्राह्मणग्रन्थीयानां वाक्यादीनां यथासीद् भाषिकत्वम्, तथैवाद्यतनीयाना मस्माद्वाक्यादीना मपीति सम मेवेति नक्षैरुक्तञ्च न विरुद्धाते । वस्तुतस्तु पुराकल्पे ब्राह्मणग्रन्थरचनाकाले मन्त्राणा मेव वैदिकत्वेन ग्रहण मासीद्योग्यम् ; ब्राह्मणानान्त्ववश्यं लौकिकत्वेनैव ; पर मिदानीन्तु मन्त्रब्राह्मणयोरुभयोरेव वैदिकत्वेनाभ्यर्चनं सम्पद्यते ; सौत्रिकाणा मपि वचनानां वैदिकवत्त्वम् ; ततः परस्त्याना मेव लौकिकत्व मिति । शास्त्रकृतां व्यवहार एवात्र निदानम् ; तत्रापि कालस्यैव प्राधान्य मित्युभ्युपगन्तव्य मत एव भा सूत्रकालात् सिद्ध मविशेषेण "मन्त्रब्राह्मणयोर्वेदनामधेयम्"–इति ॥

[मन्त्रः] तत्र, तयोर्मन्त्रब्राह्मणयोरादौ तावत् मन्त्रस्य लक्षण मनुसन्धेयम्,— किन्नाम मन्त्रत्वम् ? इति ; लक्षणस्योपयोगो हि पूर्वाचार्यैः प्रदर्शित एव— "ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः । लक्षणेन तु सिद्धाना मन्तं यान्ति विपश्चितः"–इति । तयोऽनुसन्धीयमानञ्च दृश्यते— उक्तं खलु भगवता यास्केनैव "मन्त्राः मननात्"–इति (७. ३. ६.) मन्त्रनिर्वचनम् ; तत एव सिद्धञ्च मन्त्रलक्षणम्— 'मननहेतुर्मन्त्रः'–इति । तथाच तत्र

इत्तिः— "तेभ्यः (मन्त्रेभ्यः) हि अध्यात्माधिदैवाधियज्ञादि-मन्तारो मन्यन्ते तदेषां मन्त्रत्वम्"–इति।

'मननहेतुर्मन्त्र इत्युक्ते ब्राह्मणेऽतिव्याप्तिः'–इति ब्रुवता सायणेन दूषितश्चेतल्लक्षणं ऋग्भाष्यभूमिकायाम्; परं न तत्रोदाहृतं तादृशं ब्राह्मणवाक्य मेक मपि। तथाचावगम्यते— "तच्चोदकेषु मन्त्राख्या (जै० सू० २. १. ३२.)"–इतिसूत्रानुगतम् "अभियुक्तानां मन्त्रोऽय मिति समाख्यानं लक्षणम्"–इति विवक्षया,— 'विहितार्थाभिधायको मन्त्रः'–इत्यस्य पूर्वाचार्यविहितस्य, असिपदात्मादीनां पञ्चदशानां च मीमांसावृत्तिऋदुदाहृतानां, मन्त्रलक्षणानां मीमांसाभाष्यकारकृतखण्डनेभ्यः सोदाहरणेभ्यः कतिचिदुद्धृत्य दिदर्शयिषया चोद्दिग्नचित्तस्तत्रैवैकाग्रमना यास्कोक्ते विचारावसरं नालभत स इति। प्रतिपादितश्चास्माभिर्मीमांसाकारस्य जैमिनेः यास्कायत्वम् (८४ पृ०); तथाच जागरितेऽपि हि तादृशे लक्षणे यदुक्तं यास्केन "मननान्मन्त्रः"–इति, ततः सम्भाव्य मेवैतल्लक्षण मदुष्ट मिति। अपि च सायणतः प्राचीनेन, उद्धृतासिनापि हि शवरस्वामिना तत्सूत्रस्य भाष्ये विहितार्थाभिधायकत्वादीनि मन्त्रलक्षणानि खण्डखण्डीकृतानि; परं न तस्मिन्विहवेऽप्यस्य यास्कीयलक्षणस्यावतरण मपीष्टं तेन; इतश्च ज्ञायते नैतल्लक्षणं दुष्ट मिति। "अविशिष्टस्तु वाक्यार्थः (जै सू० १. २. ४०.) इति सूत्रस्य, "विधिशब्दाच्च"–इति (जै सू० १. २. ५३.) सूत्रस्य च व्याख्यानावसरे, मन्त्राणां मननसाधनत्वं च स स्वयं व्यनक्ति— "तु-शब्देन मन्त्राणा मदृष्टार्थं मुच्चारणमात्रं वारयति ०—० तस्मान्मन्त्रोच्चारणस्य अर्थप्रकाशनरूपं दृष्ट मेव प्रयोजनम्"–इति, "तस्मादिवक्षितार्था मन्त्राः प्रयोगकाले स्वार्थ-

प्रकाशनायैवोद्धारयितव्याः"–इति च । मन्त्राणां मननहेतुत्वलक्षणं मनुलक्ष्यैवोक्तिरेषा भगवतो यास्कस्य— "यत्काम ऋषिर्यस्यां देवतायां मार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति"–इति (७. १. १.) । तदेवं 'मननहेतुर्मन्त्रः'–इति, 'मन्त्रोऽयमित्यभियुक्तोपदिष्टो मन्त्रः'–इति च ह्ये एव मन्त्रलक्षणे निर्दुष्टे इति गम्यते ; तद् यस्मै यद्रोचेत, तदेव स गृह्णात्वित्यत्र मिह नीरसविवादेनेति ।

अथवाऽत्रैतत् सुष्ठु समाधानम्— जैमिनिकृतं मन्त्रलक्षणं ग्रन्थपरम्, यास्कृतलक्षणं तु वाक्यपरमिति । तथाच जैमिनिनये वैदिकसमाम्नासिद्धानां मन्त्रेतिप्रसिद्धानां संहिताग्रन्थानामेव मन्त्रग्रन्थत्वम् ; न त्वन्येषां ताण्ड्यादीनाम् ; यास्कमते तु ग्रन्थानां तथा लक्षणेऽपि न क्षतिः ; परं ताण्ड्यब्राह्मणाद्याध्यायगतानां 'मह्मे वोचः'–इत्यादीनाम्, छान्दोग्यब्राह्मणाद्याध्यायगतानाञ्च 'देव सवितः प्रसुव'–इत्यादीनाम्, तथा तैत्तिरीयारण्यकादिपठितानाञ्चोदुतासीत्यादीनां वाक्यानां मन्त्रत्वसिद्धये खल्विद मवश्यं वक्तव्यम्— 'मननहेतुर्मन्त्रः'–इति । तदेद मुभयलक्षणयोर्विषयभेदात् नैवास्ति विवादविषय इत्यस्माक मिति ॥

"आनन्दपुरवास्तव्य-वज्रटाख्यस्य सूनुना । मन्त्रभाष्य मिदं कृत्स्नं भोजे पृथ्वीं प्रशासति"–इत्युक्त्वा स्वपरिचय मुक्तवताखिलयज्ञमन्त्रभाष्यं कृतवता उव्वटेन तत्रैव भूमिकायां प्रदर्शितास्त्वेते मन्त्रभेदाः ;–

"व्याख्यविदः पठन्ति—

'विध्यर्थवादयाज्ञाशीःस्तुतिप्रेषप्रयोजिकाः ।
प्रश्नो व्याकरणं तर्कः पूर्वेक्षतानुकीर्त्तनम् ।
अवधारणं चोपनिषत् वाक्यार्थासु त्रयोदश ।
मन्त्रेषु ये प्रदृश्यन्ते व्याख्यास्तुतिचोदिताः ।'–इति ।

अथ तेषां मुदाहरणानि। तत्र,—

परमेऽभिहितः— "अक्षस्तूपरो गोसृगस्ते (य०वा०स० २४. १)।

अर्थवादः— "देवा यज्ञं मतन्वत (य० वा०स० १९. १२)"—इति।

याज्या—"तनूपा अग्नेऽसि तन्वं मे पाहि (वा०स० ३.१७)"—इति।

आशीः— "आ वो देवास ईमहे (य० वा० स० ४. ५)"—इति।

स्तुतिः—"अग्निर्मूर्धा दिवः ककुत् (य०वा०स० ३. १२)"—इति।

प्रेषः—"होता यक्षत् समिधाग्निम् (य०वा०स० २१. २९)"—इति।

प्रवक्ष्यका— "इन्द्राग्नी अपादियम् (वा० स० ३३. ८३)"—इति।

प्रश्नः— "कः स्विदेकाकी चरति (य० वा० स० २३. ९)"—इति।

व्याकरणम्— "सूर्य एकाकी चरति (य०वा०स० २३.१०)"—इति।

तर्कः— "मा गृधः कस्य स्विद्धनम् (वा० स० ४०. १)"—इति।

पूर्ववृत्तानुकीर्त्तनम्— "ओषधयः समवदन्त (य०वा०स० १२.९६)"।

अवधारणम् — "तमेव विदित्वातिमृत्युमेति (श्वे० उ० ६. १५)"।

उपनिषत्—"ईशा वास्य मिदं सर्वम् (य०वा०स०४०. १.)"—इति।"

शबरभाष्येऽपि आशीरादयस्त्रयोदशैव मन्त्रभेदाः प्रदर्शिताः, परं तत्त्वन्यथैव ; द्रष्टव्यानि ते तत्रैव (जै० सू० २. १. ३२ भा०)। ऋग्भाष्यभूमिकायाञ्च सायणेन तत एव कतिचिदुद्धृत्य प्रदर्शिताः।

उव्वटेन स्तोतानि सर्वाण्येव यजुरेवाधिकृत्योदाहृतानि ; निरुक्तकारेण भगवता यास्केन त्वेव ऋग्वेदेऽपि दर्शितानि बह्व्युदाहरणानि। तथाहि— "तास्त्रिविधा ऋचः ;— परोक्षकृताः प्रत्यक्षकृताः, आध्यात्मिकयश्च"—इत्युपक्रम्य, "परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठा अल्पश्च आध्यात्मिकयः"—इत्युक्त्वा, "अथापि स्तुतिरेव भवति नाशीर्वादः ०—० ; अथाप्याशीरेव न स्तुतिः ; तदेतद्बहुल माध्वर्यवे याज्ञेषु च मन्त्रेषु"—इति प्रदर्श्य, उदाहृता-

नीमानि— "अथापि अपथाभिशापौ ०—० ; अथापि कस्यचिद् भावस्याचिख्यासा ०—० ; अथापि परिदेवना कस्याश्चिद् भावात् ०—० ; अथापि निन्दाप्रशंसे ०—० "अस्मसूत्रे द्यूतनिन्दा च ऋषिप्रशंसा च एव मुद्भावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति"–इति। (७. १. २.) ॥

स चैष एव मन्त्रभागः संहितेत्युच्यते। तल्लक्षणं चोक्तं पुरस्तात् समासतः (१५४ पृ०)। सा पाठतो द्विविधा ;— निर्भुजसंहिता, प्रत्यक्षसंहिता चेति। "अग्निमीळे पुरोहितम् (ऋ० स० १. १. १. १.)"–इत्यादयः पाठा एव निर्भुजसंहितायाः उदाहरणानि। यैव निर्भुजसंहिता, सैव आर्षी संहितेत्यप्युच्यते। प्रत्यक्षसंहितापि द्विविधा,— पदसंहिता क्रमसंहिता चेति नाम। तत्र, अग्निम्, ईडे, पुरःऽहितम्"–इत्येवं पठ्यते पदसंहिता ; "अग्निम्, ईडे ; ईडे, पुरोहितम्; पुरोहित मिति पुरःऽहितम्"–इत्येवं क्रमसंहितेत्युच्यते। इमा मेव क्रमसंहिता मवलम्ब्य जटाद्या अष्टविधा विकृतयः पठ्यन्ते। तदुक्तं विकृतवल्लयाम्— "जटा, माला, शिखा, लेखा, ध्वजो, दण्डो, रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः"–इति (१. ५.)। तदेषां जटादीना मपि क्रममूलात्मकत्वेन प्रत्यक्षसंहितात्व मेव। तदेव मेकैकमन्त्रस्य एकादशप्रकाराः संहितापाठा भवन्ति। तत्त्वतस्तु पाठप्रकारभेदात् बहुग्रन्थापि सार्षी संहिता प्रतिवेद मेकैकैवेति ॥

तासाञ्च सर्वासा मेव संहितानां बहुप्राचीनत्वात् कालभेद-देशभेदव्यक्तिभेदादिभिरध्ययनाध्यापनयोरुच्चारणादिभेदाः पाठभेदाश्च सम्भवाः, पाठन्यूनातिरिक्तता च किञ्चित् सञ्जाता, आचार्याणां प्रकृतिवैषम्यात् स्व-स्व-देशकालाद्यनुरोधाच्च अनुष्ठेयभेदाः प्रयोग-

भेदाश्च सम्पन्नाः ; अत एवैकैकापि सा बहुशाखत्व मापन्ना । तदे-वोदाहृतञ्च प्राचीनभाषितं चरणषट्कं षड्गुरुशिष्येण —

"एकविंशत्यध्वयुक्त मृग्वेद मृषयो विदुः ।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम् ।
नवाध्वाथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम्"–इति ।

"अध्वा, देवता, गतिः, शाखा इति पर्यायवाचकाः"–इति च तत्रोक्तं तेनैव । पातञ्जले महाभाष्येऽप्युक्तं पस्पशायाम्— "एक विंशतिधा बाह्वृच्यम् , एकशत मध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, नवधाथर्वणो वेदः"–इत्येव ।

वेदव्यासीये शौनकीये वा चरणव्यूहे तु ऋग्वेदस्य पञ्चैव शाखाः समुल्लिखिताः — "शाखाः पञ्चविधा भवन्ति , शाकला बाष्कला आश्वलायनाः शाङ्खायना माण्डूकायनाश्चेति"–इति । तथाच तदानीं मेवान्याः षोडश शाखा विलुप्ता इति गम्यते । तदिदं ऋग्वेदशाखानिरूपणं मत्संस्कृते ऐतरेयालोचने (११८–१४४ पृ०) द्रष्टव्यम् ।

ततस्तत्रैव "यजुर्वेदस्य षडशीतिर्भेदा भवन्ति"–इत्युक्तम् । तथाच तदायजुषोऽपि पञ्चदश शाखाः प्रविलुप्ता इति स्फुटम् ; नान्यथा प्रदर्शितेषड्गुरुशिष्यधृत-प्राचीनवचन-पस्पशावचने चोपप-द्येते इति । यदप्युक्तं षडशीतिरिति, तत्र च "कठानान्तूपग्रन्थविशे-षाश्चतुश्चत्वारिंशत्"–इत्युक्तेर्द्विचत्वारिंशदेवावशिष्यन्त इति चरण-व्यूहकाले ता एव शाखा आसन् प्रचलिता इत्येव तत्त्वम् । तासां द्विचत्वारिंशच्छाखानां नामानि यथा— चरकी, आह्वरकी, कठी, प्राच्यकठी, कपिष्ठलकठी, आष्ठलकठी , औपमन्यवी , चारायणीया, पाराशरीया, वार्त्तान्तवेया, श्वेताश्वतरा, मैत्रायणी चेति

द्वादश चरकाध्वर्युभेदाः। मैत्रायणीभेदाश्च मानवी, दुन्दुभी, छागलेया, हारिद्रवेया, वाराही, ग्रामी, ग्रामायनीया चेति सप्त। ता एता मैत्रायणोऽपि चरकाध्वर्युर्वेव गण्यन्त इत्यूनविंशतिः। जावाली, माध्यन्दिनी, काण्वी, कापाली, गालवी, वैजवापी, औधेया, वैनेया, वैरेया, बौधेया, पाराशरीया, शातातपीया, तापायनीया, कात्यायनीया पौण्ड्रवत्सी आवटिकी, परमाबौधेया, चेति सप्तदश वाजसनेयशाखाः शुक्लयजुर्वेद इत्युच्यन्ते। औख्या, खाण्डिकेया चेति द्वे तैत्तिरीयशाखे। खाण्डिकेया च पुनः पञ्चभेदाः सञ्जाताः —आपस्तम्बी, बौधायनी, सत्याषाठी, हिरण्यकेशी, शाट्यायनी चेति। द्विविधैवैषा तैत्तिरीया कृष्णयजुर्वेद इत्युच्यते। तदेवं चरकाध्वर्युः, वाजसनेयी, तैत्तिरीयेति तिस्र एव मूलशाखाः, आसामेवानुशाखा अन्याः। ता इमाः सङ्कलनया (१८+१७+६=४२) द्विचत्वारिंशच्छाखा यजुर्वेदीया इति। एषु मैत्रायणीया, माध्यन्दिनी, काण्वी, तैत्तिरीयेति प्रसिद्धा औख्या, आपस्तम्बी च पञ्च शाखा अद्यापि सन्ति।

ततस्तत्र तदुत्तरम्— सामवेदस्य किल सहस्रभेद आसीत्, अनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः प्रनष्टाः। तेषाम् प्रवक्ष्यामि— आसुरायणीया, वासुरायणीया, वार्त्तान्तवेया, प्राञ्जलाः, ऋग्वर्णभेदाः, प्राचीनयोग्याः, ज्ञानयोग्याः, राणायनीयाश्चेति। तत्र राणायनीयानां नव भेदा भवन्ति— राणायनीयाः, शाट्यायनीयाः, पारायणीयाः, सात्यमुग्राः, खल्वलाः, महाखल्वलाः, लाङ्गलाः, कौथुमाः, जैमिनीयाश्चेति"-इति। तदिदं चरणव्यूहोक्तं सर्वं मेवार्वैदिककालप्रसूतं पौराणिक मिति नादरणीयं वेदविदुषां सात्यव्रतानाम्। तत्त्वतस्त्रयोदशैव शाखाः

सामवेदस्य ; सहस्रशाखत्वप्रवादस्तु बहुविधस्वरादिसंयोगादेकस्यापि मन्त्रस्य बहुविधसामश्रुतेरित्येव। अतएव तर्पणविध्यादौ त्रयोदशाना मेव सामगाचार्याणां नामोल्लेखो भवति यथा— "राणायणः, शाट्यमुग्र्यः, व्यासः, भागुरिः, औलुण्डिः, गौलुलविः, भानुमानौपमन्यवः, कारादिः, मशको गार्ग्यः, वार्षगण्यः, कुथुमः, शालिहोत्रः, जैमिनिः। त्रयोदशैते मे सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः"–इति। एतदीयशाखासु राणायणी, कौथुमी, जैमिनिशेति तिस्रोऽप्यापि सन्ति।

ततस्तत्र चरणव्यूहे उक्तं श्लोतत्— "अथर्ववेदस्य नव भेदा भवन्ति। पैप्पलाः, दान्ताः, प्रदान्ताः, स्नाताः, स्नोताः, ब्रह्मदावलाः, शौनकी, देवदर्शती, चरणविद्येति"–इति। अस्ति चेषां नाम्नां पाठान्तरतापि। आसां नवशाखाना मेकैव मुद्रितेति सङ्क्षेपः॥

इत्थं बहुशाखत्वेऽप्येकैकस्य वेदस्य, एकैकस्याः शाखाया अध्ययनेनैव भवेदेवाधीत एकैको वेदः; सर्वासेव शाखासु संहिताया: प्रायोऽभेदात्। किञ्चित्पाठन्यूनातिरिक्तेन, किञ्चिदुच्चारणभेदेन, किञ्चिदनुष्ठानपद्धतिपार्थक्येन च न श्लेव भवेत् संहिताया: स्वरूपतो विभिन्नत्वम्; जागर्त्येव श्लेष न्यायः 'एकदेशविकृत मनन्यवत्'–इति (पा० सू० १. १. ७२ भा०), भवत्येव हि छिन्नपुच्छे शुनि श्वत्यव्यवहारः, तथा श्लीपदरोगिण्यपि देवदत्तादौ देवदत्तादिव्यवहारश्च लोके। अत एव सायणाचार्यादय आचार्या एकैका मेव शाखां व्याख्याय एकैकवेदव्याख्यानेऽजभन् स्व-स्व-ज्ञानज्ञत्यता मिति। अत एव च "वेदः कृत्स्नोऽधिगन्तव्य"–इति (२. १६५.), "षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् (३. १.)–"–

इति, "वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्"-इति(२.२.) च मनुवचनानि सङ्गच्छन्ते ; शाखानां मूलतः प्रकृतपार्थक्ये हि कथं सप्तवेदामाध्ययनं द्वादशखेवाब्देषु सहस्रशाखस्य सामवेदस्येति तादृशस्मृतिवचनानां मुग्धोन्मत्तप्रलपितत्व मेव प्रसज्येतेति। अतोऽत्र त्वेव मेवावधार्यम् ,— एष खलु वेदशाखाभेदो न मन्त्राद्यध्यायभेदतुल्यः, प्रत्युत भिन्नकाललिखितानां भिन्नदेशीयानां मेकग्रन्थीयानां मपि बहुतरादर्शपुस्तकानां यथा भवत्येव पाठादिभेदः, तथैवेति। अथाप्यत्र संशयश्चेत् कस्याप्येकस्य वेदस्य कयोरपि शाखयोराद्यन्तपाठसन्दर्शनेनैव तद्दूरोत्सारणं सुकर मेवेति।

परन्त्वेव मपि यजुषस्तु कतिपयशाखाभिः कतिपयशाखानां मेव मस्ति भेदः, यत्तयोरुभयोः शाखासमूहयोः शुक्लकृष्णत्वे एवामंसत प्राचीनाः। तथाच माध्यन्दिनीप्रभृतीनां यजुःशाखानां शुक्लयजुरिति ख्यातिः, तैत्तिरीयादीनान्तु यजुःशाखानां कृष्णयजुरिति समाख्या चेति। ईदृशासदृशभेदकारणन्तु उक्तं बहुषु पुराणेषु बहुविध मपि मूलतः प्रायोऽविभिन्न मेव। तद्विष्कर्षं एष उक्तो महीधराचार्येण शुक्लयजुर्भाष्यभूमिकायाम्— "व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदं मध्यापयत्। तत्र दैवात् केनापि कारणेन क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच 'मदधीतं त्यज'-इति। स योगसामर्थ्यात्मूर्त्तां विद्यां विधायोद्ववाम। 'वान्तानि यजूंषि गृह्णीत'-इति गुरुणोक्ता अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तानि यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्यं माराधान्यानि शुक्लानि यजूंषि प्राप्तवान्। तानि च जाबालगौधेयकाण्वमाध्यन्दिनादिभ्यः स्व-

दशशिष्येभ्यः पाठितवान् ['पञ्चदशशिष्येभ्यः'-इत्यपपाठः]। एतस्मादितिहासात्, मैत्रायणी-माध्यन्दिनी-तैत्तिरीयशाखानां पाठ-प्रकारदर्शनाच्च प्रतीयते चैतत् ,— चरकाध्वर्युयजुःशाखापाठाः यज्ञक्रमाननुसारिण इति याज्ञवल्क्येन स्वमनीषया दर्शपूर्णमास-यज्ञाद्यनुसारिणी संहिता ग्रथिता, पाठिता च सा सप्तदश-शिष्येभ्यः ; सैव यज्ञोपयोगिनीति वाजाना मन्त्राणां सनये लाभाय सम्यञ्चेति वाजसनेयीत्याख्याता, क्रमसौष्ठवसम्यञ्चेति शुक्ला (शुद्धा) इति च। गुरुमुखतोऽधीतापि तत्परित्यक्ता प्राचीनतमा चरकाध्वर्यु-संहितैव अन्यैः आत्रादिदेशीयैस्तित्तिर्यादिसञ्ज्ञकैर्गृहीता, तस्या वाजसनेयीतोऽप्युत्कर्षं चिकीर्षुभिः यत्प्रकरणे ये मन्त्रा पठिता-स्तत्रैव तदुत्तरं तत्तद्विधायकादिब्राह्मणवचनानि च सङ्गृहीतानि। तथा च, यथा पृथक्-पृथक् भुक्तानि च अन्नव्यञ्जनानि कुर्हि-तानि चेद् वान्तं तत् विमिश्रान्नव्यञ्जन मेव भवति, एवं तित्ति-र्यादिभिर्मन्त्राः ब्राह्मणयुतयश्च पृथक्-पृथक् अधीता अपि यज्ञ-कार्येषु तदाहारसौष्ठवं साधयितुं विमिश्रीकृता इति हावेव मन्त्र-ब्राह्मणग्रन्थौ वान्तपूर्णाविव सम्यञ्चौ, अतएव कृष्णेतिव्यपदेश-भागिनौ च। इत एवावकाशादेतयोः शुक्लकृष्णयोर्यजुःशाखयो-रनतिप्राचीनानामपि केषाञ्चिद्वचनानां प्रवेशः सम्भाव्यते, तत एवै-तयोर्मन्त्रन्यूनातिरिक्तत्वादितो मिथो विभिन्नत्वं च सुव्यक्त मेवेति।

एवञ्चायं मन्त्रभागः ऋग्-यजुः-सामेतित्रिविधरचनात्मकोऽपि हौत्राध्वर्यवौद्गात्रब्राह्मेति चतुःसंहितात्मकः, कालेन शुक्ल-कृष्णेति द्वैविध्यं गते च यजुषि सम्प्रति राजते पञ्चसंहितात्मक एव ;— ऋग्वेदसंहिता, शुक्लयजुर्वेदसंहिता, कृष्णयजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेदसंहितेति ॥

अथासु च पञ्चसु वेदसंहितासु बहुधैव पौर्वापर्यं केचिदाहुः । तथाहि — 'ऋक्संहितायाः सर्वत एव प्राथम्यम् ; तत्रापि द्वितीय-मण्डलस्यापेक्षिकनूतनत्वम् , दशममण्डलस्य तु ऋक्संहिता-परिशिष्टरूपत्वञ्च ; सामसंहितायास्तत एवोद्धृतार्चिकमूलकत्वम् ; शुक्लयजुःसंहितायाः तदपेक्षयाप्यर्वाचीनत्वम् ; अथर्वसंहितायास्तु सर्ववेदपरिशिष्टत्वेन ततोऽप्यर्वाचीनत्वम्'–इति । वेदतत्त्वानु-सन्धित्सुभिः प्राज्ञतमैरेवेदं तत्त्व मुद्भावित मित्यत्र विश्वास एवो-चितः सर्वेषाम् ; परं किं कुर्मो वयं नास्माकं बुद्धिः प्रसरति ; एकस्मिन्नेव हि काले , एकस्यैवाचार्यस्य , एकेनैव चयनयज्ञेन चतुष्टयमापन्नानां पौर्वापर्यं कथङ्कारं स्यादिति । यदि कश्चित् फलविक्रयी,— आम्रार्थी आम्र मेव गृह्णातु , जम्ब्वर्थी जम्बू मेव, पनसार्थी पनस मेव, राजादनार्थी राजादन मेवेति क्रयविक्रय-सौकर्यार्थ मेकदैवैकेनैव यत्नेनैक मेव फलराशिं विभज्य चय-नेन चतुरः स्तूपान् विदध्यात् ; तत्र कः खलु धीर एवं वदितु मुत्सहेत,— अयं स्तूपः पूर्वं कृतः , अत्राप्यंशयो नूतन इत्यादि ? तथैवात्रापि । किञ्च यथास्त्येव तत्र फलाना मुत्पत्तौ कालपौर्वा-पर्यम् , न त्वेककालजातान्येव तानि सर्वाणि ; एव मत्रापि अस्तु मन्त्राणा मुत्पत्तौ कालपौर्वापर्यम् , न त्वेककालोत्पन्नास्ते इति स्यात् कृतकवादिनाम् ; परं न हि तेन स्तूपानां संहितानां वा प्राचीना-प्राचीनत्वविचारः रुद्धच्यते ; तत्त्वतो फलानां मन्त्राणाञ्चोत्पत्ति-कालविचारस्तु स्तूपानां संहिताना मुत्पत्तिकालविचारतः सर्वथा स्वतन्त्र एवेति बहुशास्त्रपारावारदृश्वनां विश्वविख्यातकीर्त्तीना मपि तेषा मत्र तद्दचो न प्रमाणकोटिं प्रवेष्टु मिष्ट इत्यस्माकम् ॥

तथापीदं विचार्यते कथङ्कार मृक्संहितायाः प्राथम्य मिति ?—

स्मर्यते हि मनुसंहितायाम्— "ऋग्यजुस्सामलक्षणम्"–इति (२. ११.)। एव मादौ ऋग्वेदस्य प्रथमप्रयोगदर्शनात् तस्यैव वेदेषु प्राथम्यं गम्यत इति चेन्न ; तादृशसमस्तप्रयोगे हि शब्दानुशासनादेव ऋक्शब्दस्य पूर्वनिपातो भवति। तथा हि पाणिनिसूत्रम्— "अल्पाच्तरम्"–इति (२. २. ३४.)। यद्येवम्प्रयोगादेव प्राथम्यं गम्येत, तर्हि "विन्ध्यकिस्किन्धहिमालयाः"–इत्युक्ते विन्ध्यस्यैव प्राथम्य मुररीकार्यं स्यात्। असमस्तप्रयोगेषु च यत्र ऋक्शब्दस्य प्रथमतः प्रयोगो दृश्यते, तत्र प्रयोक्तुः यादृच्छिकत्व मेव बीजम्। अपि वा पद्यगद्यगानात्मिकासु त्रिविधरचनासु तत्त्वतो गानरचनाया एव ज्यायस्त्वेऽपि पद्यरचनायास्तदस्थिरूपत्वेन ततोऽपि गरीयस्त्व मवश्य मभ्युपगन्तव्य मिति रचनानियमाधीन मेव प्राधान्य मृचां बहुत्व आद्युल्लेखे निदानम्। तदेवं सर्वत्रैवर्क्शब्दस्य प्रथमप्रयोग एव ऋग्वेदस्य सर्ववेदप्राथम्ये विनिगमक मिति तेषां मनोराज्यविजृम्भणमात्रम्।

श्रूयते च कौषीतकीब्राह्मणे— "तत्परिचरणावितरौ वेदौ"–इति। एतेन यज्ञकाण्डे होतृकर्मण एव प्राधान्यम्, होत्रर्थं मेव अध्वर्युकृत्य मुद्गातृकृत्यञ्चेत्येव बोधितम् ; एतस्माच्चर्चां प्रथमोत्पन्नत्वं न कथ मपि लभ्यते। एवञ्चास्य तद्विषयकमानत्वेनोपन्यासोऽपि वृथैव।

सर्ववेदभाष्यकारस्य श्रीमतः सायणाचार्यस्य ऋग्वेदभाष्यभूमिकायाम्— "मन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्र-तत्राध्वर्युणा प्रयोज्या ऋचो बहव आम्नाताः। सान्नान्तु सर्वेषा मृगाश्रितत्वं प्रसिद्धम्। आथर्वणिकैरपि स्वकीयसंहिताया मृच एव बाहुल्येनाधीयन्ते"–इत्युक्तिः दृश्यते सत्यम् ; पर मेतस्मादपि ऋग्वेदस्य

प्राथम्ये सायणसम्मतिर्न दृश्यते ; अपि तु मन्त्रेषु ऋचां बाहुल्य मित्येव ध्वन्यते। किञ्चैषां प्राधान्याख्याने च ऋक्संहिताया: प्राधान्यं नैव गम्यते ; ततोऽन्यत्रापि ऋचां सद्भावात्। अत एव ऋचां हि रचनानियमाधीनं बाहुल्यमूलकं वा प्राधान्य मुररी-कुर्वतीऽपि सायणस्य मते ऋग्वेदस्य त्वप्राधान्य मेव। तथा ह्युक्त मध्वर्युभाष्यभूमिकायाम्— "आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातम्। तत्र विशेषापेक्षाया मपेक्षितायां याज्यापुरोऽनु-वाक्यादय ऋग्वेदे समाम्नायन्ते, स्तोत्रादीनि तु सामवेदे। तथा सति भित्तिस्थानीयो यजुर्वेद:, चित्रस्थानीयावितरौ। तस्मात् कर्मसु यजुर्वेदस्य प्राधान्यम्"—इति। सामभाष्यभूमि-कायाञ्च— "अध्वर्युमुख्यैर्ऋत्विग्भिश्चतुर्भिर्यज्ञसम्पद:। निर्म्मीयते क्रियासङ्घैरध्वर्यु र्यज्ञियं वपु:। तदलङ्कुरुते होता ब्रह्मोद्गाते-त्यमी त्रय:। ०—०। यज्ञं यजुर्भिरध्वर्युर्निर्म्मिमीते ततो यजु:। व्याख्यातं प्रयमं पद्यादृचां व्याख्यान मीरितम्। साम्ना मृगा-श्रितत्वेन सामव्याख्याथ वर्ण्यते"—इति। वस्तुतो जगत्सृष्टे: पुरैव ब्रह्मणश्चतुर्भ्यो वदनेभ्यश्चत्वारो वेदा युगपत् समुत्पन्ना इत्येवंवादिनां पौराणिककालप्रभवाणां श्रीमत्सायणादीनां तथा-विधविचारे मनोनिवेशोऽप्यसम्भव एव ; तेषां तादृशशिरस्कविचार-प्रवृत्तौ भवेदेव हि स्वसिद्धान्तव्याकोप:।

किञ्च ऋक्संहिताया: प्राथम्येऽभ्युपगते ऋक्संहिताप्रणयन-काले यजुस्साम्नोरसद्भावात् तत्रैव ऋक्संहितायां यजुस्साम्नो-रुल्लेख: कथङ्कारं श्रूयत इत्येवं तादृशचतुरचेतसां चेत:सु कथञ्च चमत्कार माविष्कृतम् ? पश्यन्तु तावत् धीमन्त:— "यजुस्तस्मा-दजायत"—इति (ऋ० स० १०. ९०. ९.), "त मेव ऋचि तमु

ब्रह्मण माहुर्यज्ञन्यं सामगा मुक्थशासम्"–इति (ऋ० स० १०. १०७. ६.), "ऋक्सामाभ्या मभिहितौ (ऋ० स० १०. ८५. ३१.)"–इत्येवमादीनि। इमानि तु निदर्शनानि दशममण्डलादाहृतानि, दशममण्डलस्यानतिप्राचीनत्व मेव तेषा मिति चेत्, ततोऽन्यतोऽपि दर्शयामः। तथाहि–– "बर्हिरिव यजुषा रक्तमाणः" –इति पञ्चममण्डलीयम् (६२. ५.), "उभे वाचौ वदति सामगा इव"–इति च द्वितीयमण्डलीयम् (४३. १.)। सामविशेषनामान्यपि भूयस्त्व एव ऋक्संहितायाम्। तथाहि— "रथन्तर मा जभारा वसिष्ठः"–इति (१०. १८१. १.), "भरद्वाजो बृहदाचक्रे अग्नेः"–इति च (१०. १८१. २.)। एते च निदर्शने दशममण्डलीये इत्येवान्यत्रापि तेषा मिति चेत्, अन्यत्राप्यस्त्येवं तथैव। तद्यथा–– "रथन्तरे सूर्यम्पर्यपश्यत्"–इति प्रथममण्डलीयम् (१६४. २५.), "प्र गायत्रेण गायत"–इति च नवममण्डलीयम् (६०. १.) इति दिक्। तदेव मृक्संहितायाः ऋङ्लक्षणमन्त्राणां वा प्रथमरचितत्व मिति तेषां स्वकपोलकल्पित मिवाभाति स्फुटम्।

यदप्युक्तं तद्द्वितीयमण्डलस्य अपेक्षाकृत मर्वाचीनत्व मिति, तदप्येव मेव ; मानाभावात्। को नाम धीमान् शुष्कतर्कसहाय एव वटविटपिदुर्गच्छेदने समर्थो भवेत् ? अस्ति खलु ऋक्संहिताया द्वितीयमण्डलीयसायणभाष्यारम्भे "य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् स गृत्समदो द्वितीयं मण्डल मपश्यत्"–इत्यनुक्रमणीवचन मुद्धृतम्। तथाच द्वितीयमण्डलस्य शौनकीयत्वं सुव्यक्तम् ; शौनकीयग्रन्थस्य च पाणिनिना "शौनकादिभ्यश्छन्दसि"–इति (४. ३. १०६.) सूत्रे प्रोक्तत्वस्वीकारात् प्राचीनतमत्वाभावः सुतरां स्फुट मित्येवैकैषा युक्तिर्द्वितीयमण्डलस्य

चिरात्सिद्धप्राचीनतमत्वखण्डने शुष्कतर्कमयी कर्त्तनी। इह पश्यन्तु तावच्चक्षुष्मन्तः— एकवंशीयाश्चाथर्ववंशप्रभवाश्च शौनकाः खलु बहव एव ;— मन्त्राणां द्रष्टारः आसन् शौनकाः ; तेभ्योऽन्ये सूक्तानाञ्च द्रष्टारः स्थिता एव शौनकाः ; द्वितीयमण्डलस्य द्रष्टा च शौनकस्ततोऽप्यन्य एव ; अथर्वशाखाविशेषस्य च प्रवक्ता शौनकोऽप्यन्य एव ; तत्सहवंशप्रभवा ह्यद्यापि बहुत्र बहवः शौनका राजन्त एव। "शौनकादिभ्यश्छन्दसि"–इति (४. ३. १०६.) पाणिनिसूत्रस्य शौनकप्रोक्तग्रन्थ एव विषयः, तथाच शौनकप्रोक्तं अथर्ववेदीयसंहिताग्रन्थं येऽधीयते त एव शौनकिनः ; शौनकदृष्टग्रन्थस्तु न चास्य सूत्रस्य विषयः ; अनुक्रमण्यान्तु "द्वितीयमण्डलमपश्यत्"–इत्युक्तम्, न तु द्वितीयं मण्डलमवोचदिति। शौनकविषये त्विह पुरस्तादप्यसकृदुक्तानि। ततश्च शौनकदृष्टत्व मेव द्वितीयमण्डलस्येति शौनकदृष्टं द्वितीयं मण्डलं ये ऽधीयते इति विग्रहे तत्सूत्रस्य प्रवृत्तिरेव नास्तीति तस्य द्वितीयमण्डलस्य प्रोक्तत्वमूलकापेक्षिकार्वाचीनत्वकल्पनं भ्रमविजृम्भित मेवेति।

वस्तुतः पाणिनिसूत्राणां समालोचनयेद मेव ज्ञायते ; — तस्य भगवतः पाणिनेः शाखाना मेव प्रोक्तत्वेन ग्रहण मीप्सितम्, तदध्येत्रर्थे एव च प्रत्ययादयो विहिताः; मन्त्रसूक्तमण्डलादीनान्तु दृष्टत्वेनैव ग्रहण मिति दृश्यतेऽनुक्रमणिकादावपि। न च क्वचिदपि पाणिनीये मण्डलाध्येत्रर्थे तादृशप्रत्ययविधिः दृश्यते प्रत्युत शाखाध्येत्रर्थे एव ; सन्ति यथैव ऋग्वेदादीनां शाकलादयः शाखाः, तथैवास्ति शौनकसंहितेत्यथर्ववेदस्यापि चिरादेव; एवं यथैव शाकलादिशाखानां प्रोक्तत्व मेव पाणिनिसम्मतम्, तथैव शौनकशाखाया अपि। तत्कथ मत्र द्वितीयमण्डलाध्येतरि तादृशप्रत्ययप्रसङ्गः ?

श्रुतो वा अनुक्रमण्यां यस्य द्रष्टृत्वं भासते, तस्यैवेह बलात् प्रोक्तृत्वेन ग्रहणं भवेत् स्वीकार्यं मिति ?

यद्वाप्युक्तम्— ऋग्वेददितीयमण्डस्य प्रथमसूक्तीयद्वितीयस्याम्—

"तवाग्ने होत्रं तव पोत्र मृत्वियं तव नेष्ट्रं त्व मग्निदृतायतः।
तव प्रशास्तृत्व मध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे"

—इत्यस्या ऋचि यत् होत्रादीनि याज्ञिकाभिधानानि श्रूयन्ते, ततश्च ज्ञायते तन्मण्डलं यज्ञकालभवम्, एतदेव मानान्तरं तस्यापेक्षाकृताधुनिकत्वस्येति। इतश्च वक्तुरेकदेश-दर्शित्व मेव विशदीभवति। यतः खलु यज्ञकाले एव सर्वासां संहितानां ग्रथनं सम्भव मतः संहितासु सर्वत्रैव विद्यन्ते तथाविधा मन्त्राः; न द्वितीयमण्डले एव। तथाहि तत्-प्रदर्शितमन्त्रयुतानि पदानि अन्यत्रापि यथाक्रमेण दर्शयामः— १.७६. ४ होत्रम्, तत्रैव पोत्रम्, ८. ४०. ११ ऋत्वियम्, १. १५. २ नेष्टः, १०. १४. १३ अग्निध्रम्, १. ८४. ६ प्रशास्ता, १. २३. १६ अध्वरीयताम्, १. ८०. १ ब्रह्मा, १. १३. ६ गृह-पतिः, १. १. ७ दमे इति। एवं हि होत्रादिपददर्शनात् तत्त-न्मन्त्राणां यज्ञकालजत्वसिद्धेऽपि प्रथममण्डलादिभ्यो द्वितीयं मण्डल माधुनिक मिति वक्तुं कथ मपि न युज्यत इति सुव्यक्तम्॥

एवं दशममण्डलस्य ऋक्परिशिष्टरूपत्वं कल्पयितुश्चैका आकाशवल्ली अवलम्बिता तैर्भाषापार्थक्यादिनाम; दशममण्ड-लस्य हि भाषा मन्त्रार्थगतताप्यर्याणि च प्रथममण्डलादिभ्यः सर्वथा पृथगेवेत्यस्य परिशिष्टरूपत्वं स्वीकार्यं मिति तदाशयः। किं मत्र ब्रूमो वयम् ? अस्मच्छ्रुतिषु हि दशममण्डलस्य मण्डलान्तराणाञ्च एकविधैव भाषा प्रतीयते, अस्मद्बुद्धिषु च तथैकविध

मेव तात्पर्य मिति न जानीमहे केषां बुद्धिमालिन्यं केषां वा श्रवणेन्द्रियदुष्टत्व मिति ।

वस्तुतो वेदानां कृतकत्वपक्षे मन्त्राणां बहुकर्तृकत्वात् अनेककालजत्वाच्च भाषातात्पर्ययोः पार्थक्यन्तु प्रतिमन्त्रगत मेवेत्यन्यदेतत् ; मण्डलगतपार्थक्यन्तु असम्भव मेव मण्डलरूपेण ग्रन्थाविर्भावाभावात् । न च सर्वास्वेव शाखासु एकविधपरिच्छेदविभागोऽपि विद्यते ; तथाच या नाम शाखा अष्टपरिच्छेदपरिच्छिन्ना , तत्रैव सर्वे मन्त्राः, तस्यां कथं दशममण्डलस्य परिशिष्टत्वं परिरक्ष्येत ? इदानीम्प्रचलितेयं हि संहिता , शाकलबाष्कलेतिशाखाद्वयमिलितेत्येव बुध्यते ; एतस्यां हिविधपरिच्छेदविभागदर्शनात् । तदष्टकाध्यायवर्गैर्विभागो नून मेकशाखाकृतः मण्डलानुवाकसूक्तैर्विभागस्त्वपरशाखाकृतः स्फुट मेव प्रतीयते । अष्टकाध्यायवर्गविभक्तसंहितायां किञ्चित् पाठाधिक्य मपि श्रूयते । वालखिल्यमन्त्रा अपि तस्या मेवाधीयन्ते । न च ते मन्त्राः खिलात्मिकाः ; तेषा मपि पदपाठाद्यध्ययनाध्यापनश्रवणात् , "अथ वालखिल्या विहरेत् (उ० २. २. ३–२२.)"–इत्याद्याश्वलायनीयश्रौतविधानादिस्मरणात् , निरुक्ते निगमत्वेन व्यपदेशाच्च । अतएवाह च षड्गुरुशिष्यः— 'बाष्कलके संहितापाठे अतः शाकलात् अधिकान्यष्टौ सूक्तानि'–इति । भगवता सायणाचार्येण तु शाकलसंहिता मधिकृत्यैव व्याख्यात ऋग्वेद इति नैव व्याख्यातानि वालखिल्यानि ; परं स्वीकृतान्येवैतरेयकभाष्ये तान्यष्टाविति । अपि यथैवान्यत्रान्यत्र, तथैवेहापि वालखिल्याना मष्टसूक्तात्मकत्व मेकादशसूक्तात्मकत्वञ्चेति सूक्तसङ्ख्याविषयकोऽप्यस्ति पाठभेदः । तदेव मष्टकविभागे बाष्कलके दशममण्डल मेव नास्तीति कथङ्कारं

भसेत् तस्य परिशिष्टत्व मिति विचार्यं सुधीभिरेव [शाकलबाष्कल-वालखिल्यादीनां वर्णन मस्माभिः कृत मैतरेयालोचने, करिष्यमा-णञ्च पुनर्ब्राह्मणालोचने, तत् तत्र-तत्रैव द्रष्टव्यं विशेषतः]।

एवञ्च ऋक्संहिताया नवमण्डलात्मकत्व मेवासीत्, ततोऽभवद् दशमण्डलात्मकत्व मिति कथनं यथा सुकरम्; तथा नेदम्— पुरा सप्तमाष्टकीयपञ्चमाध्यायाष्टाविंशतिवर्गान्त मेव ऋक्संहि-ताया: समाम्नान मासीत्, ततस्तदष्टकीयतदध्यायस्योनविंशतित-मादयो वर्गाः प्रणीताः, अष्टमाष्टकस्य समयः प्रणीत इति। न च निरुक्ते दाशतयीति व्यपदेशाद् दशममण्डलात्मकत्व मेव सर्वर्क्-शाखासंहिताना मिति वाच्यम्; तत्र सर्वत्र दाशतयीति शाकल-शाखासंहिताया एव ग्रहणे बाधाभावात्। किञ्च प्रथमादि-मण्डलेषु स्तुतानां बह्वृनां सूक्तानाम्, दशममण्डलस्थितानाञ्च बह्वृनां सूक्तानाम्, द्रष्टारोऽभिन्ना एवावगम्यन्ते; परिशिष्टत्व-वादिनां मते तत् कथ मुपपद्येतेत्यपि विचारयन्त्वत्र माध्यस्थ्य-पद मादधाना एवेति॥

एवं सामवेदीयर्ङ्मन्त्राणा मृक्संहितात उद्धृतत्वकथन मपि प्रौढ़िवादमात्रम्; ऋक्संहिताया मपि छन्द इति श्रवणात्। तथाहि (१०. ८०. ९.)—

"तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत—इति।

अस्या ऋचि छन्दांसीतिपदेन सामवेदीयर्चा मेव ग्रहण मिष्टम्; तथैव सर्ववैदिकप्रसिद्धेरिति प्रतिपादितं पुरस्तादपि (१६१ पृ०); छन्द इति हि सामवेदीयार्चिकग्रन्थानां तथा तत्तद्ग्रन्थीयमन्त्राणां च नाम इति केऽधीतवेदा न जानन्ति?

पाणिनिना च विशेषतः सामवेदीयच्छन्दोग्यस्थमन्त्रा एव छन्दस्त्वेन लक्षिताः। तथाहि — "सोऽस्यादिरिति छन्दसः प्रगाथेषु" –इति (४. २. ५५.) तत्सूत्रम्; "पङ्क्तिरादिरस्येति पाङ्क्तः प्रगाथः"–इत्यादीनि च तदुदाहरणानि। प्रगाथास्तु सामवेदे एव दृश्यन्ते, नान्यत्र; विहिताश्च ते सामवेदीयताण्ड्यमहाब्राह्मणे एव।

किञ्च यतश्च साममूलमन्त्राणां सर्वेषा मेव छन्द इति चिरात्समाख्या, अत एव तेषां गानकारिणः सामवेदिनश्छन्दोगा एवेत्युच्यन्ते, न तु ते क्वचित् कैश्चिदपि ऋग्गा इति। यतश्च सामवेदिन एव छन्दोगा इत्युच्यन्ते, तत एव सामवेदीयब्राह्मणग्रन्थाना मुपनिषदाश्च छान्दोग्य मिति समाख्या प्रसिद्धैव। विहिता च सा पाणिनिना "छन्दोगौक्थिक"–इति (४. ३. १२८)। एवञ्च यच्च केनचिदुक्तम् 'वेदसंहितासु ये केचन प्राचीनतमश्लोकाः, त एव छन्दांसि इत्यभिधीयन्ते; ततोऽप्राचीना एव मन्त्राः' –इति, तदिद मपि जलमध्यगतमसीक्षोदवद्विलीन मेव न वेत्यपि विचारयन्तु त एव।

नन्वेव मपि ऋक्सामोरुत्पत्त्यनन्तर मेव छन्दसा मुत्पत्तिश्रवणात् सामवेदीयर्चा मृक्षोऽवरजत्वं यथावत् स्थित मेवातः 'खादितेऽपि लशुने न शान्तो व्याधिः'–इति चेदत्र ब्रूमः,— तस्माद्यज्ञादिति मन्त्रे नैव क्रमोत्पत्तिशरणेन मिष्टम्; अन्यथा हि ऋगुत्पत्त्यनन्तरं सामोत्पत्तिः, तदनन्तरञ्च छन्दउत्पत्तिः इत्येवं मन्तव्यं स्यात्, तच्चाप्रसिद्धासम्भवदोषग्रस्तं भवेदेव। तथाहि— ऋग्वेदीयर्चोऽवलम्ब्येव सामानि गीतानि इति चेत् ते नून मृग्गा इत्येव प्रसिद्धाः स्युः, न च तथा प्रसिद्धिः दृश्यते क्वचिदपि लोके वेदे वा; प्रत्युत छन्दोनामतः प्रसिद्धाना मेव सामर्चां गातृत्वा-

देव सामवेदीयाः छन्दोगा एवोच्यन्ते ; एवं साम्नां प्रथम मुत्पत्तिस्ततस्तन्मूलानाञ्छन्दसा मित्यप्यसम्भव एव। तस्मात् यदैव यतश्च ऋचः प्रादुरभूवन्, तदैव ततश्च सामानि च, साममूल-च्छन्दांसि च, यजूंषि चेत्येव तन्मन्त्राश्रयस्तथा च सहोत्पत्तिरेव। एतएवाथर्ववेदीयेऽत्र मन्त्रे सहशब्दश्च श्रूयते (१७. ७. २८)—

"ऋचः सामानि छन्दांसि पुराणं यजुषा सह।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः"—इति।

अत्र श्रुतः पुराणशब्दः प्राचीनेतिवृत्तान्याख्यानपरमन्त्रवाचकः। तदेतस्मान्मन्त्रान्नाच्च सर्वविधमन्त्राणां सहोत्पत्तिः सुव्यक्तैव।

किञ्च यदि नाम ऋक्संहितात एव सामयोनिमन्त्रा उद्धृताः स्युः, तर्हि उद्धृतिक्रमत एवेह सामवेदे मन्त्रा दृश्येरन् ; न च तथा दृश्यन्ते। अपरञ्च, एव मपि बहवो मन्त्राः सामवेदे सन्ति, येषा मृक्संहितायां श्रवणं नास्त्येव। अथापर मपि, यथेवर्क्-संहितायां सूक्तानि, तथैवेह दशदादीनि ; ततश्च कुतः कस्यो-च्चरणं किम्मानकं भवेदिति च स्याद् विचार्यमेव, विचार-काले तु विनिगमकाभाव एव मूर्तिमान् दरीदृश्येतेत्यत्र च कः संशयः। वस्तुतः पुरा ऋगादिलक्षणाः सर्व एव मन्त्रा विकीर्ण एव आसन्, ततो यदैव ऋक्चयनेन ऋग्वेदीयसूक्तानि सङ्गृ-हीतानि, तदैव तथैव सामवेदीयान्यपि दशदादीनीति किं चित्रम् ? एकस्या एव हि ऋचश्चयन मुभयत्रैककालेऽपि सम्भवत्ये-वेत्यपास्येतैवोद्धृतिमत मिति दिक्॥

अथर्वविचारस्तु प्रदर्शित एव पुरस्तात् (१४७–१५८ पृ०)॥

[ब्राह्मणम्] ततो ब्राह्मणस्यास्ति किं लक्षण मित्यन्विच्छन्तः पश्याम इद मापस्तम्बसूत्रम्— "कर्मचोदना ब्राह्मणानि"—इति।

कर्मचोदना विधिरिति त्वनर्थान्तरम् । विधिश्चैष द्विविध इत्याह सायणः । तथाहि— "विधिरपि द्विविधः ; अप्रवृत्तप्रवर्त्तनम् , अज्ञातज्ञापनञ्चेति । 'आग्नावैष्णवं पुरोडाशं निर्वपति दीक्षणीयायाम्'–इत्याद्याः कर्मकाण्डगता विधयः अप्रवृत्तप्रवर्त्तकाः ; 'आत्मा वा इद मेक एवाग्र आसीत्'–इत्यादयो ब्रह्मकाण्डगता अज्ञातज्ञापकाः"–इति (ऋ० सं० भा० भू०) ।

एतस्यैव ब्राह्मणस्य शेषरूपवाक्यान्येवार्थवादा उच्यन्ते इत्याह चापस्तम्बः । तथाच तत्सूत्रम्— "ब्राह्मणशेषोऽर्थवादः"–इति । शेषशेषिभावः अङ्गाङ्गिभावश्चेत्यनर्थान्तरं मीमांसकानाम् । तच्च प्रतिपादितम् "अथातः शेषलक्षणम् (३. १. १.)"–इत्यधिकृत्य "शेषः परार्थत्वात् , द्रव्यगुणसंस्कारेषु बादरिः , कर्माण्यपि जैमिनिः , फलञ्च पुरुषार्थत्वात् , पुरुषश्च कर्मार्थत्वात्"–इति (३. १. २–६.) । विधिभिरङ्गाङ्गिभावश्चार्थवादानां ते मन्यन्त एव । तथाहि— "आम्नायस्य क्रियार्थत्वादानर्थक्य मतदर्थानां तस्मादनित्य मुच्यते"–इत्यादिभिः षड्भिः सूत्रैः (१. २. १–६.) अतदर्थानाम् = अक्रियार्थानाम् = अर्थवादानाम् आनर्थक्यम् , तस्माच्चैषा मनित्यत्व माशङ्का "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थत्वेन विधीनां स्युः"–इत्यादिभिः षड्भिः सूत्रैः (१२. ७–१२.) विधीनाम् = 'वायव्यां श्वेत मालभेत'–इत्यादीनाम् ब्राह्मणवाक्यानां स्तुत्यर्थत्वेनैव "वायुर्वै क्षेपिष्ठा देवता"–इत्येवमादीना मर्थवादवाक्यानां सार्थकता , तस्मान्नित्यता च सिद्धान्तिता । एतदेवाभिप्रेत्याह सायणाचार्यः— "द्विविधं ब्राह्मणम्— विधिः , अर्थवादश्च"–इति ।

अर्थवादाना मपि ब्राह्मणत्वं स्वीकृतं निरुक्ते च । तथाहि—

"प्राशित्र मस्याच्छिणी निर्जघानेति च ब्राह्मणम् (१२. २. ३.)" -इत्येवमादीनि द्रष्टव्यानि। अपि चार्थवादानां ब्राह्मणत्व मुररी-कुर्वतैव तेन तेषां तत्त्वख्यापनेऽप्रामाण्यञ्च ध्वनितं तत्रैव। तथाहि- "बहुभक्षित्रवादीनि हि ब्राह्मणानि भवन्ति(७. ७. २.)"-इत्यादि॥

अत्र खेतदपि ज्ञातव्य मस्ति,— सायणस्य प्रदर्शितप्रकारं विधिद्वैधन्तु वैदान्तिकाना मनुरोधतः प्रौढिवादमात्र मिति; कर्मचोदनैव विधिरिति आपस्तम्बादियाज्ञिकानां जैमिन्यादि-मीमांसकानाञ्च सम्मतत्वात्। न हि कोऽपि याज्ञिकाः "आत्मा वा इद मेक एवाग्र आसीत्"-इत्यादीनां विधित्वं मन्यन्ते; अपि त्वर्थवादत्व मेव। अत एवोक्तं मीमांसा शालिकनाथीयप्रकरणपञ्चि-कायाम्— "केवलवस्तुवादी वेदभागो नास्ति"-इत्येवमादि, मन्यन्ते चात एव साङ्ख्याः— "द्रष्टवदानुश्रविकः"-इति॥

विध्यर्थवादयोः प्रकारभेदादीनि जैमिनीयादौ बाहुल्येन वर्णि-तानि; लौगाक्षिभास्करेणार्थसङ्ग्रहे, कृष्णयज्वना च मीमांसा-परिभाषायां सङ्क्षेपेण निर्णीतानि; विधिविचारादिप्रकरणेषु प्रपञ्चि-तानि च; तेभ्य एव विशेषतोऽवगन्तव्यानि॥

मीमांसावृत्तिकारेण तु ब्राह्मणलक्षणान्येव मुदाहृतानि— 'इतिकरणबहुलम्', 'इत्याहोपनिबद्धम्', 'आख्यायिकास्वरूपम्'- इति च। इमानि लक्षणानि प्रायिकाभिप्रायेणोक्तानि; मन्त्रे-ष्वपि तथादर्शनात्, ब्राह्मणेष्वपि क्वचित्तदभावदर्शनाच्चातिव्याप्त्य-व्याप्तिदोषापत्तेरित्याहुः शबरस्वामिसायणौ। जैमिनिस्तु सूत्रया-मास "शेषे ब्राह्मणशब्दः"-इत्येव (२. १. ३३.)। "मन्त्राश्च ब्राह्मणानि वेदः, तत्र मन्त्रलक्षणे उक्ते परिशेषसिद्धत्वात् ब्राह्मण-लक्षण मवचनीयम्, मन्त्रलक्षणेनैव सिद्धम्,— यस्तेतल्लक्षणं न

भवति, तद् ब्राह्मण मिति परिशेषसिद्धं ब्राह्मणम्"-इति च तद्ग्राह्यम्। तदेवं निष्पन्न मेतत्— अभियुक्तानां समाख्यात एव ज्ञेयम्— एष मन्त्रः, एतद् ब्राह्मण मिति; अपि च नैव मन्त्रेण सम्भवेतां तयोर्लक्षणे; इतिकरणबहुलादिषु सर्ववैवाव्याप्त्यति-व्याप्तिदोषयोरनिवार्यत्वात्। अतः सुष्ठूक्तं सायणेन— "इष्टप्रे-व्यत्यन्तविजातीयेषु समाख्यान मन्तरेण नान्यः कश्चिदनुगतो धर्मो-ऽस्ति यस्य लक्षणत्व मुच्येत"-इति। स्वधावाप्युदाहरणपरे प्राचीनपद्ये अपि। तथाहि—

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥
उपमानं दशैवैते विधयो ब्राह्मणस्य तु।
एतद्धि सर्ववेदेषु नियतं विधिलक्षणम्॥"-इति।

तत्र, (१) हेतुः— "सूर्पेण जुहोति, तेन ह्यन्नं क्रियते"-इति।

(२) निर्वचनम्— "तद्ध्नो दधित्वम्"-इति।

(३) निन्दा— "उपावीता वा एतस्याग्नयः"-इति।

(४) प्रशंसा— "वायुर्वै क्षेपिष्ठा देवता"-इति।

(५) संशयः— "तद्विचिकित्सन् जुहवानीश्मा होषाश्मम्"।

(६) विधिः— "यजमानसम्मिता औदुम्बरी भवति"-इति।

(७) परक्रियः— "माषानेव मन्त्रं पचति"-इति।

(८) पुराकल्पः— "पुरा ब्राह्मणा अभैषुः"-इति।

(९) व्यवधारणकल्पना— "यावतोऽश्वान् प्रतिग्रहीयात्, तावतो वारुणांश्चतुष्कपालान् निर्वपेत्"-इति।

दशम मुदाहरणन्तु शबरस्वामिना नैव प्रदर्शितम्; तत एव सम्भवद्भिर्न सायणेनापि कथङ्कारं भवेद् दर्शितम्? अथवा लेखक-

प्रमाद एवात्र निदानम्। यद्यप्येतादृशेऽस्माद्दशानां लेखनीचालन मुपहासास्पद मेव सम्भवेन्नाम, तथापि कर्तव्यपरवशैः कथ मुपेक्षणीयं स्यादिद मिति यथाज्ञानं तत् प्रदर्श्यते— "स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा ऽन्यत्रायतन मलब्ध्वा बन्धन मेवोपश्रयत, एव मेव खलु सोम्य तन्मनो दिशं दिशं पतित्वा-ऽन्यत्रायतन मलब्ध्वा प्राण मेवोपश्रयते; प्राणबन्धनं हि मन इति (छा० ब्रा० ८. ८. २.)"-इत्येवमादिक मेवोपमानोदाहरणं भवेद् दशम मिति ॥

अथात्रेद मध्यालोचनीयम्— ब्राह्मणग्रन्थेषु खल्वेतत्पद्धयोक्ता-तिरिक्ताना मितिहासादीना मपि कतिविधानां वाक्याना मस्तित्व मुपलभ्यते। तथाहि छान्दोग्ये— "स होवाच ऋग्वेदं भगवो-ऽध्येमि ०—० इतिहासपुराणम् (७. १. ३.)"-इत्यादि। शतपथे-ऽप्यश्वमेधप्रकरणे— "अथाष्टमेऽहन् ०—० तानुपदिशतीतिहासो वेदः, सोऽय मिति किञ्चिदितिहास माचक्षीतैव मेवाध्वर्युः सम्प्रेष्यति (१२.)"-इति, "अथ नवमेऽहन् ०—० तानुपदिशति पुराणं वेदः, सोऽय मिति किञ्चित् पुराण माचक्षीतैव मेवाध्वर्युः सम्प्रेष्यति (१३.)"-इत्येवमादि। तैत्तिरीयेऽपि— "यद् ब्राह्म-णानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदाहुतयः (आ० २. ६. २.)"-इति। "ब्राह्मणानि कर्मचोदनाः— 'वाय-व्याए श्वेत मालभेत'-इत्यादयः। इतिहासाः ब्रह्माण्डादि-नियमाः;— 'देवाः सुराः संयत्ता आसन्'-इत्यादयः। 'आत्मा वा इद मेक एवाग्रआसीत्सैवेह किञ्चानाग्रे'-इत्यादीनि सृष्ट्यादिप्रति-पादकानि पुराणानि। कल्पाः कल्पसूत्राणि— प्रयोगप्रतिपाद-कानि। गाथाः गायन्ति-चोदिता मन्त्रविशेषाः;— 'योऽस्य

कौष्ठया'-इत्यादयः ; यमगाथाभिः परिगायतीति विधानात् । नाराशंसीः नाराशंस्यः 'होतायज्ञन्नराशंसम्'-इत्याद्याः । ब्राह्मणात्तःपठिताना मपि पुनरुक्तिः फलातिशयद्योतनार्थम्"-इति च तद्भाष्यं सायणीयम् । तत्त्वतस्त्विह कल्पाः कल्पसूत्रबीजानीत्येव वक्तु मुचितम् ; अस्ति वात्र पाठान्तरता ? गाथाः खलु श्लोकबद्धाः प्रवादवाक्यरूपा ब्राह्मणग्रन्थेभ्योऽपि प्राचीना एव ; ता एव च श्लोका इत्युच्यन्ते ; तद्यथा— "तदेषाभियज्ञगाथा गीयन्ते— 'यजेत्कौत्सामख्या सपत्नीकोऽप्यसोमपः । मातापितृभ्या मनृणार्था-द्यजेतिवचनाच्छ्रुतिः'-इति (ऐ० ब्रा० ७. २. ६.)"-इति । नाराशंस्यस्तु नरस्तुतिश्रुतयः ; तासु मन्त्रात्मिकाः , गाथात्मिकाः , ब्राह्मणात्मिकाश्च भवन्ति । तद्यथा— "अधि ब्रुवः पणीनां वर्षिष्ठे मूर्धन्नस्थात् (ऋ० सं० ४. ७. २६. ६, ७, ८.)"-इत्येवमादयो मन्त्रात्मिकाः ; हिरन्येन परीवृतान् कृष्णान् शुक्लदतो मृगान् । मण्डारे भरतो ददाच्छतं बद्धानि सप्त च (ऐ० ब्रा० ८. ४. ६.)" -इत्येवमादयो गाथात्मिकाः ; "एतेन ह वा ऐन्द्रेण महाभिषेकेणो-दमय आत्रेयोऽङ्ग मभिषिषेच तस्मादङ्गः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे (ऐ० ब्रा० ८. ४. ७.)"-इत्येव-मादयश्च ब्राह्मणात्मिकाः । अथर्ववेदीयगोपथब्राह्मणे तु तत्पश्य-प्रकाशितातिरिक्ता बहुविधा एव श्रुतयः संलक्ष्यन्ते । तथाहि— "इमे सर्वे वेदा निर्मिताः ; सकल्पाः सरहस्याः सब्राह्मणाः सोप-निषत्काः सेतिहासाः सान्वाख्यानाः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्याः (१. २. ६.)"-इति । तत्र कल्पाः खल्विदानीम्प्रचलितकल्पसूत्राणां मूलान्येवोपलभ्यन्ते ; रहस्यानि त्वारण्यकानि ; स्वरा इति तु

इदानीम्प्रचलितशिक्षाग्रन्थानां मूलानि ; निरुक्तानि चाद्यप्रचलित-निरुक्तमूलान्येव ; अनुशासनान्यपि अद्यप्रचलितछन्दोऽनुशासन-मूलानि ; संस्काराः खलु पदसंस्कारकशास्त्राणां पाणिन्यादीनां मूलान्येव ; अनुमार्जनानि चाद्यस्थितशुद्धतमवेदाङ्गज्योतिषस्य मूलानि ; वाकोवाक्यानि तु प्रश्नोत्तररूपाणीति शङ्कराचार्यः, ऊहापोहादितर्कप्रतिपादकमीमांसाशास्त्रमूलान्येवेत्यपि केचित् । तदेतेषा मिह प्रदर्शितपद्योक्तेषु दशसु कथं भवेत् समावेशः ? तदत्र बहुयत्नतोऽपि हयोस्त्रिसृणां वा समावेशानुभवेऽपि न तु सर्वेषां समावेशः सिद्धयतीति कथं स्यादेवंविधानां ब्राह्मणत्वम् ?

अतोऽत्रैवं ब्रूमः ।— आसीत् पुरा सर्वा एवेमाः श्रुतयो विकीर्णा इति । तत्र, विधायकवाक्यानाम् ,— 'वाय्व्यं श्वेत मालभेत'-इत्येवमादीनाम् , तथा प्रवर्त्तकत्वेन (निषेधविध्यादौ निवर्त्तकत्वेन च) 'वायुर्वै क्षेपिष्ठा देवता'-इत्येवमादीनाञ्च कर्म-चोदनापरत्वेनैव ब्राह्मणत्वम् ; तदतिरिक्तानां मर्थतात्पर्यादिनिर्णाय-कानां निरुक्तादीनां मेव वेदार्थवादोपयोगित्वेनार्थवादत्वम् । तयोस्तु प्राचीनपद्ययोः ब्राह्मणभेदा एव निर्दिष्टाः, न त्वर्थवादभेदाः "दर्शै-वैते विधयो ब्राह्मणस्य तु । एतद्वै सर्ववेदेषु नियतं विधिलक्ष-णम्"-इत्युक्तेः । विधिः, कर्मचोदना इत्यनर्थान्तरम् ; "कर्म-चोदना ब्राह्मणानि"-इति हि आपस्तम्बसूत्रम् । अर्थवादशास्त्राणि खलु निरुक्तादीनि ब्राह्मणतो विभिन्नान्येव ; अतएवोक्तं द्वितीयं सूत्रं मापस्तम्बेन— "ब्राह्मणशेषोऽर्थवादः"-इति । ब्राह्मणेभ्यो-ऽवशिष्टो वेदार्थप्रसवकृद् विधिवाक्यसङ्ग एवार्थवाद इत्युच्यते इत्येव च तस्यार्थः । यथा चाह जैमिनिः— "शेषे ब्राह्मणशब्दः (८. १. ३३.)"-इति । न च तत्रावगम्यते मन्त्रस्यैव भागविशेषो

ब्राह्मण मिति, अपि तु गम्यत एव मन्त्रातिरिक्तो वेदभागो ब्राह्मण मिति; तथैवेहापि गम्येतैव ब्राह्मणातिरिक्तो मन्त्रलक्षणविधुरो वेदभागोऽर्थवाद इति। सिद्ध मित्थं वेदत्रैविध्यम्; — मन्त्रः, ब्राह्मणम्, अर्थवादः इति। अत एव वाभवद्वेदस्त्रयीतिव्यपदेश्यभाक्। सायणीय मेतद्वचनञ्चास्माक मनुकूल मेव— "तदेवं वेदे विद्यमानानां त्रयाणां मन्त्रविध्यर्थवादभागाना मप्रामाण्यकारणाभावाद् बोधकानां तेषां प्रामाण्यस्य स्वतस्त्वाङ्गीकारात् कात्स्न्यस्यापि वेदस्य प्रामाण्यं सिद्धम्"-इति (ऋ० सं० भा० भू०)।

यद्यप्येतरेयादिग्रन्थेषु विध्यर्थवादावुभावेव स्तः; परं विधीनां बाहुल्यादेव ब्राह्मण मित्येव ते व्यपदिश्यन्ते; यथाच यजुःसंहितायां ऋग्यजुषोरुभयोरपि विद्यमानत्वेऽप्याख्यायत एव यजुरिति यजुषां बाहुल्यात्। तथा चैतरेये बह्व एव गाथाः प्रमाणत्वेनोल्लिखिता दृश्यन्ते, तैत्तिरीये च शिक्षादयो बहवः श्रूयन्ते, तथा छान्दोग्ये ऽपि छन्दोऽनुकीर्त्तनानि च, गोपथे तु "ओङ्कारं पृच्छामः को धातुः"-इत्यारभ्य, "किं ज्योतिषं किं निरुक्तं किं स्थानं का प्रकृतिः किं मध्यात्म मिति षट्त्रिंशत् प्रश्नाः (१. १. २४.)"-इत्यन्तग्रन्थसन्दर्भेण षडङ्गपरिचया व्यज्यन्त एव; तत्तृतीये तु खण्डे "षडङ्गविदस्तत्तथाधीमहे"-इति स्पष्टमाम्नातं स्फुटम्।

तस्मादिद मेव युक्त मिवाभाति,— ऐतरेयादिग्रन्थाविर्भावात् प्रागेव ब्राह्मणार्थवादेतिश्रेणीहयगतानि सर्वाण्येव वाक्यान्यासन् विकीर्णानि, तदनुस्मृत्यैव कृत मुक्तलक्षणहय मापस्तम्बेन तत उत्तरं विकीर्णामि तान्येव सङ्गृह्य यागकर्मणां पौर्वापर्य मनुस्मृत्यैव ग्रन्थीकृतानि महीदासादिभिः; तत्प्रभृत्येव सर्वेषा मेव निर्वचनादीना मभवद् ब्राह्मणान्तर्गतत्वं तथा तत्रान्तेव व्यपदेशभाक्त्व;

तत एव जैमिनिर्विध्यर्थवादयोरुभयोरेव ब्राह्मणत्व मुररीकृत्य तथैव सूत्रयामास तच्चोदक शेषत्वात् कर्मसमवायार्थत्वाच्च विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन फलेन समाम्नायः क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते पदार्थानां लोकवदिति ॥

न चैष ब्राह्मणभागः शाखा भेदानुगतोऽपि विभिन्नत्व मागतः, प्रत्युत द्वयोर्बहूनां वा शाखाना मेक मेव ब्राह्मणम्। एकस्या अपि शाखाया दृश्यते चैकं ब्राह्मणम्। एवञ्चेदानीं सर्व्वशाखा ब्राह्मणसङ्घातसन्नामानि च सुदुर्ज्ञेयानि साम्प्रतं हि ऋग्वेदस्य ऐतरेयकं कौषीतकञ्च द्वे एव ब्राह्मणे अस्माभि र्दृष्टे।

यजुर्वेदस्यतु शुक्लयजुषो काण्वमाध्यन्दिन्यो र्द्वे शतपथब्राह्मणे दृष्टे। कृष्णयजुषः खलु तैत्तिरीय मेवैकं दृश्यते। आपस्तम्ब-ब्राह्मणस्यापि विद्यमानता गम्यते। चरकाध्वर्य्युषु मैत्रायण्या शाखायाश्च ब्राह्मण मस्तीति श्रुतम्।

सामवेदीयत्रयोदशशाखानान्तु दशैव ब्राह्मणग्रन्था इति गम्यते। अतएव तर्पणविधादौ तेषाम् प्रवक्तृणांनामान्येवमभिगीयन्ते—

शटिः, भाल्लवी, काल्वली, ताण्डः, वृषाणकः, रुरुः, शमवाहुः, अगस्त्यः, वल्कशिराः, हुहुः,—दशैते मे प्रवचनकर्त्तारः स्वस्ति कुर्व्वन्तु तर्पिताः स्वस्ति कुर्व्वन्तु तर्पिताः इति। तत्र च कौथुमशाखिभिस्ताण्ड्य मेवाधीयते, ताण्ड्यांशभूतानि ताण्ड्यपरिशिष्टभूतानि वा अनुब्राह्मणानि वा अपराण्यपि समाधीयन्ते च; तेषा मामानि यथा,—षड्विंशब्राह्मणम्, सामविधिब्राह्मणम्, आर्षेयब्राह्मणम् वंशब्राह्मणम्, देवताध्यायब्राह्मणम्, संहितोपनिषद्ब्राह्मणम्, छान्दोग्यब्राह्मणञ्चेति। अत्र च षड्विंशब्राह्मणस्यान्त्यप्रपाठकः अद्भुतब्राह्मणोच्यते तया छान्दोग्यब्राह्मणस्य आद्यप्रपाठकद्वयम् मन्त्रब्राह्मणञ्चाभिधीयते। विशेषतस्तु मद्भक्ते "मन्त्रसञ्जीवनी" नाम मन्त्रब्राह्मणटीकायां द्रष्टव्यम्।

अथर्ववेदस्य त्वेक मेव गोपथं नाम ब्राह्मण मद्य यावदस्माभिर्दृष्ट मिति दिक् ॥

अथ दृश्यते चैको ग्रन्थो निदानसूत्राभिधः सामवेदीयो दशप्रपाठकः । तत्रादौ 'अथातश्छन्दसां विषयं व्याख्यास्यामः'–इत्यादिभिः सामवेदच्छन्दोग्रन्थान्तर्गतानां सूचां छन्दोविषया निर्णीताः, ततः 'अथातः स्तोभान् व्याख्यास्यामः (१. ८.)'–इत्यारभ्य सामवेदीयस्तोभग्रन्थगतस्तोभा निर्णीताः, ततः 'अथातः सामान्तानां चत्वारो भागाः (१. १२.)'–इत्यारभ्य सामान्तापरपर्यायाणि सामनिधनानि निर्णीतानि, ततो द्वितीयाध्यायारम्भे सामवेदीयोहग्रन्थादिविषया अप्यत्र चिन्तिताः, तत्रैव पञ्चमखण्डादौ 'अथातो यज्ञस्थानानि (२. ५.)'–इत्यारभ्य सामवेदीयकल्पशास्त्राख्यातानि, ततस्तृतीये 'अथायज्ञसन्धिरन्तर्भागं भवति'–इति (३. ६.) सामवेदीयमन्त्रेषु व्याकरणविधयश्च सूचिताः, ततः पुनरेव क्रतुविधयो महानाम्न्यादिविधयश्च प्रपञ्चिताः, ततः पञ्चमाध्यायान्तखण्डत्रये 'अथातः संवत्सरवर्गाणां पञ्चसंवत्सरवर्गाः''–इति (५. ११–१३) ज्योतिषग्रन्थविषयाः कालादयोऽपि निर्णीताः । ततश्च पुनरासमाप्तिं सामग्रन्थीयव्रतहन्द्वादिपर्वविषयाः, क्षुद्रद्रथन्तरादिसामविषयाः, सत्राहीनैकाहादिक्रतुसम्पादकविविधसामादिविषयाश्च विधयः प्रपञ्चिताः । अत्रैव यथाप्रयोजनं निरुक्तं स्वरादिशिक्षाविधानं च क्वचित् क्वचिदुपदिष्टञ्च, परं न तथापि सर्वत्र तत् कृतकृत्यतां प्रतिभाति । नापि निरुक्तोक्तं श्यालग्रब्दनिर्वचनं सामशब्दनिर्वचनञ्चात्र यथोक्तं पश्यामः ; अत इदानीं प्रसङ्गसङ्गत्येदमपि ब्रूमः ,— सर्वेषा मेव वेदाना मेकैकं निदानसूत्र मासीदेवैतर्हि तानि लुप्तानीव, सन्त्येव वास्मदगोचराणीति ।

ादेभ्य एव निरुक्तादीनि वेदाङ्गशास्त्राणि समुद्भूतानि ; दृश्यन्ते ह क्षुद्रतमन्यग्रोधबीजादिभ्यः प्ररोहन्तो न्यग्रोधादिमहामहीरुहा ापि ; अतएव चास्य शास्त्रस्य ग्रथितं नाम निदानसूत्र मिति। निरुक्तोक्तताप्यसङ्गदेव प्रमाणत्वेनोपन्यस्तं (६. २. ६; ७. ३. ६.) नैदानाः'–इति। एवं निदानसूत्रे बहुत्रैव अनुब्राह्मणनामकीर्त्तनं ा श्रूयते। यथाष्टमप्रपाठकीयतृतीयखण्डे— "षोड़शिनोऽनु-ाह्मणम्"–इति, तत्रैव पुनः "अनुब्राह्मणम्— 'स्युरेकविंश स्तोमाः'–इति"–इति। पाणिनिश्च सूत्रयामास— "अनुब्राह्मणा-दिनिः"–इति (४. २. ६२.) "तदधीते तद्वेद (पा० ४. २. ६९.)" -इत्यधिकारेऽस्य सूत्रस्य पाठादवगम्यत चैष ग्रन्थो वैदिक एवेति। ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम्, तदधीतेऽनुब्राह्मणी'–इति च त्र दीक्षितवृत्तिः। ब्राह्मणसादृश्याच्चास्य चतुर्वेदीयत्व मपि ातीयते, ततस्तत्सद्भावाद्वहुत्वञ्च सुतरां स्वीकार्य मेव। तत् कि नेतदनुब्राह्मणम् ? केन चित् क्वचिदपि दृष्ट मेक मपि किं न ेति वर्वर्त्ति महान् संशयः।

अस्मद्गुरुचरणास्त्वत्रैव मुपादिशन्,— ब्राह्मणोक्तानां छन्दो-वेध्यादीनां वैशद्याय, तदनूक्तानां दैवतादीनाञ्च कथनायैव ेषा मभवदाविर्भावः। ततस्ततोऽपि प्रकृष्टतमेषु समुत्पन्नेषु निदानसूत्रेषु तेषा मादरास्पदत्वं सञ्जातम्। ततस्ततोऽपि प्रकृष्ट-तमेषु निरुक्तादिषड़ङ्गग्रन्थेषु ऋष्यनुक्रमण्यादिषु ऋषिनैगेयादिषु व प्रकटितेषु प्रायोऽद्य विलोपदशां गतानि तानि ; साम्नां देव-तादिख्यापनाय सामवेदीयं निदानसूत्रं सर्वतो नालम्, नाप्यद्या-धीतोऽप्युत्कृष्टतरः कश्चन ग्रन्थ आविर्भूतः सामवेदीय इति तद्विषयकान्येव तानि लुप्तावशिष्टानि सन्ति देवताध्यायादीनि

पञ्चैवेति। तत्र देवताध्यायनामानुब्राह्मणे साम्नां देवताः श्रूयन्ते, आर्षेयनामानुब्राह्मणे ऋषयः, वंशनामानुब्राह्मणे सामवेदीयाचार्यवंशाः, संहितोपनिषन्नामानुब्राह्मणे संहितादिविषयः, सामविधिनामानुब्राह्मणे नित्याग्निहोत्राणां रहस्यप्रायश्चित्तादिसाम्नां काम्येषु प्रयोज्यानां साम्नां च विधानानीति।

सायणाचार्येण तु देवताध्यायादीनामपि ब्राह्मणत्वमेवाख्यातम्। तथाहि ताण्ड्यब्राह्मणादिभाष्यभूमिकादौ— "अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम्। षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत्। आर्षेयं देवताध्यायं भवेदुपनिषत्ततः। संहितोपनिषद् वंशो ग्रन्था अष्टावितीरिताः"—इति। अत्र यदुच्यते प्रौढ मिति, तदेव ताण्ड्य मिति सामगप्रसिद्धम्; यच्चोच्यते षड्विंश मिति, तस्यैवाम्नायोऽद्भुत मिति कथ्यते; यदुच्यते उपनिषदिति, तदेव छान्दोग्य मिति सामगैर्व्यपदिश्यते। तत्र चाद्यद्वितीयाध्याययोर्मन्त्र इति समाख्याविशेषः तृतीयाद्यासमाप्तानां सप्तानामध्यायानामुपनिषदिति चेति॥

अत्राक्षरद्विन्यासस्तत्त्वेवम्,— सायणाचार्यस्तु नासीद् गुरुमुखादधीतसामविद्यः, ततोऽत्र नैव तद्वचनं प्रमाणं भवितुमर्हतीति; अनुभूयत एव हि सामवेदे तस्यापूर्णाधिगतत्वं प्रतिपदमेव। तथाहि प्रथमं तावत्— सामवेदीयार्चिकग्रन्थमाचार्या व्याख्यानेन समग्रसामसंहिता व्याख्याता भविष्यतीति विचारयन्नेव तेनोक्तं नैतत् सामभाष्यावतरणिकावसानकाले— "नन्वस्मिन् सामवेदे ब्राह्मणभागस्य व्याख्यातुं योग्यत्वेऽपि मन्त्रभागस्य न व्याख्यानयोग्यतास्ति"—इत्यारभ्य "ऋचः संहिताग्रन्थे छन्दोनामके समाम्नाताः, ताः सर्वा ऋच आम्नातक्रमेणेह व्याख्यायन्ते"—

इत्यस्तम्। न च तदनुमोदन्ते सामगाः ; पदवाक्यस्तोभादियुक्तानां हि साम्नां भवत्येवार्थान्तरता, तदर्थज्ञानाय च सामग्रन्थव्याख्यानस्याप्यतितरां कर्त्तव्यत्वात्। सामातिरिक्ताश्च मन्त्रा न हि सर्व एव निःशेषेण छन्दोग्रन्थे श्रुताः, यत् तेषा मेव व्याख्यानेन भवेयुर्व्याख्याताः सर्व एव ते ; गानग्रन्थेष्वप्यारण्यके आक्रन्दयेत्यस्या ऋचः, स्तोभग्रन्थे आयुर्विश्वायुरित्यादीनां यजुषां च श्रूयमाणत्वात्। तदेतस्माच्च स्फुट मवगम्यते, नाधिगतास्तेन गानस्तोभादिसामग्रन्थाः ; अपि तु मीमांसादिशास्त्रत एवावगता तेषां विद्यमानतेति द्वितीयम्। तत्रैवोक्त मपर मपि— "न च तासां (ऋचाम्) क्रतुषु स्वातन्त्र्येण विनियोगोऽस्ति"—इति। तदपि भ्रमविजृम्भित मेव ; ऋक्सयाना मपि ह्वहदादिस्तोमानां क्रतुषु विनियोगदर्शनादिति द्वतीयम्। यच्चोक्तम्— "तासा मृचां क्रमव्यत्यासेन बह्वृचैरप्यधीयमानत्वात्तदीयानुक्रमणिकोक्तानि ऋष्यादीनेवात्रानुसन्धेयानि"—इति, तदपि तस्यैकदेशदर्शित्व मेवावेदयति ; बह्वृगधीताना मप्यृचा मिह विद्यमानत्वात्, सामवेदीयर्क्षा मृष्यादिपरिज्ञानाय नैगेयनामग्रन्थानां प्रामाण्यतरत्वाच्च ; सन्ति चानेकत्र मतभेदाः अनुक्रमणीनैगेयशास्त्रयोरिति चतुर्थम्।

तत्रैवानुपद मुक्तम्— "काण्डत्रयात्मको योयं छन्दोनामकः संहिताग्रन्थः"—इति, तदप्यसङ्गत मेव ; सामवेदे— सामसंहितासु, आर्चिकसंहितासु, ब्राह्मणेषु वा न क्वापि हि तैत्तिरीयादाविव काण्डविभागो दृश्यते ; अपि तु सर्वास्वेव संहितासु पर्वेति, ब्राह्मणेषु तु पञ्चिकेति च। तदत्र पर्वत्रयात्मक इति वक्तव्ये यदुक्तं काण्डत्रयात्मक इति, तेन व्यज्यते तस्य तैत्तिरीयादाविव क्रतवबहुश्रमत्व मिति पञ्चमम्। एवं तत्रैवोत्तरत्र सर्वत्रैव 'प्रथमे

दर्शति'–इत्यादि वक्ष्ये "प्रथमे खण्डे"–इत्याद्युक्त मिति षष्ठम् ।

किं बहुना एतस्माच्च भाष्यसमालोचनादिद मेव प्रतीयते,—स ब्राह्मणः खलु सर्ववेदभाष्यकर्तृत्वप्रतिपादनायैव अनधीतायाः अपि सामसंहिताया व्याख्याने प्रवृत्तः प्रायः खलतात् ऋग्वेद-भाष्यादेव यथायथं व्याख्यानान्युद्धृत्य प्रथमेनैव अमंस्त सम्यक्तं सामभाष्यचेति । वस्तुतो नैव तदेतद् बालक्रीड़न मिव भाष्यं साम-भाष्य मिति मन्यते सामगः कोऽपि । यच्च तस्माद् गम्यते, तत्तु लभ्यत एव हि ऋग्भाष्यत एव; यत्तु न लभ्यते ऋग्भाष्ये, तत्तावत्कास्ति च तत्रापीति किमुत मेतेन सामभाष्येणेति ।

तत्त्वतः खलु श्रीमान् सायणाचार्यो ह्यासीदधीततैत्तिरीयः, ततस्तद्विषयकज्ञान मेव तस्य सङ्गात मुपदेशानुरूपम्, वर्द्धितञ्च, तत् ख्यातिवृद्धानुगतविशेषपरिशीलनादिभिः; अत एव तद्भाष्यं नून मादरणीयतमं सम्भवम्; अध्वर्युवेदविदा मृग्वेदवित्त्व मपि न दुराप मिति ऋग्भाष्य मपि सम्भव मेवादरणीयतरम्; ऋग्य-जुषोर्व्याख्यातृत्व ऋग्यजुमयस्यैवाथर्ववेदस्यापि व्याख्यानं न सुदुष्कर मिति तस्यापि भाष्यस्य सम्भवत्येवादरणीयता; परं सामवेदस्तु गुरुमुखादनधीतो नैव भवेदुद्गात्रोऽपि तद्वोधस्तु दूरपराहत एव । सामसंहिताया भाष्ये कर्त्तव्ये—'हुप् हुप्', 'वि वि', 'वं वम्'–इत्यादिपदस्तोभयुक्तानां साम्नां व्याख्यानानि कर्त्तव्यानि; "आयुर्विश्वायुर्विश्वम्"–इत्यादिपञ्चमात्राश्रितानां साम्नाञ्च व्याख्यानानि प्रदर्शयितव्यानि; सर्वत्रैव सामसु मूलतः स्वरवर्णमात्रादिपरिवर्त्तनकारणानि यथायथं प्रदर्शयितव्यानि; कस्यां योनौ कति सामानि किंस्वरूपाणि च तानि परिचाय्यानि; साम्नां सर्वेषा मेव यथायथं नामानि सप्रमाणानि दर्शयितव्यानि;

तथौलीनाञ्च नामानि छन्दआदीनि चोपदेष्टव्यानि ; साम्नां देवताद्य यथायथं विज्ञाप्याः ; यत्र यत्र सामसु स्तोभोऽपि गीयते, तत्र तत्र ऋक्स्तोभयोः समावेशनियमादिकञ्च ज्ञाप्यं तत्तद्विधानानुसारतः ; प्रगाथयथन मपि यथास्थानं वर्णयितव्यम् ; ऋचाम्, स्तोमानाम्, स्तोभानाम्, साम्नाञ्च विनियोगादयः सर्वत्र ब्राह्मणं सूत्रञ्च प्रदर्श्यैव वक्तव्याः ; साम्नां प्रतिहारादिभागोपदेशाश्च सर्वत्र वर्णयितव्याः ; तत्र स्तोत्रियानुरूपाणां निधनविचाराश्च विशेषतः प्रदर्शनीयाः ; १, २, ३, ४, ५, ६, ७, ८, र, उ, स्व, क, $_4$,—, ऽ, इमानि च व्याख्येयानि ; मन्त्रमध्यगतानाञ्च २३४५, २३२, १२१, $\frac{१११}{२३४५}$ -इत्यादीना मर्थाश्च बोधयितव्याः ; प्रतिसामान्ते च यदस्थि क्रु धू धा इत्यादयः, तेषा मर्थाश्च विज्ञाप्या एव ; अपरयोनिषु चापरसामोत्पत्तिप्रभृतयश्चोदाहार्याः ; सामोपासनादयश्च भाषितव्या इत्यलं प्रासङ्गिकेनेति।

प्रकृते त्विद मेव वक्तव्यम् – आर्षेयादिग्रन्थानां ब्राह्मणत्व मनुब्राह्मणत्वं वास्तु, गृह्यान्त एवाद्य तान्यपि ब्राह्मण मित्येव ; मन्त्रब्राह्मणयोरेव वेदनामधेयत्वपर्यवसानात् ; अस्ति च तेषां वेद इति व्यवहारोऽद्यतनानां वैदिकाना मिति। तदेवं ब्राह्मणानाम् (विधायकतदुपयोजकानाम्), अर्थवादानाम् (वेदाङ्गमीमांसा-पुराणेतिहासबीजरूपाणाम्), अनुब्राह्मणानां (ब्राह्मणसदृशानाम्) चेति त्रयाणा मेवेदानीं साधारणं नाम सम्यक् ब्राह्मण मिति ॥

अथात्र मन्त्रब्राह्मणनिर्णयप्रसङ्गादारण्यकोपनिषदोरपि किञ्चिद् ब्रूमः ;— श्रूयते ह्यारण्यकनामा च वेदभागः। स चैकाध्यायात्मक एवेति केचित्। ब्राह्मणभागपरिशिष्टरूप मेव तदारण्यक मिति च केचित्। पाणिनीयतः पुरा नैवासीत् किञ्चिदारण्य-

कथामेत्यपि केचित् । तदेतत् सर्वं मेव वेदानां सुमूर्षुदशात्व मेवावेदयति । हन्त ! यदि ह्यत्र "स्वाध्यायोऽध्येतव्यः"-इत्यादि-श्रुतेरादरः कार्यतो दृश्येत, यदि ह्यत्र "वेदः कृत्स्नोऽधिगन्तव्यः" -इत्यादिस्मृतेश्चादरः कार्यतो दृश्येत, तर्हि सर्वैरवश्य मेतन्नु ज्ञात मेव स्यादारण्यकं न स्वध्यायात्मक मेव ;— नापि ब्राह्मणाव्यभागरूप मेव ;— आसीच्च पाणिनीयतो बहुप्रागपीति । तथाहि— बहुना मेवारण्यकग्रन्थाना मध्यायपरिगणनादेव ज्ञायते, नारण्यकग्रन्थोऽध्यायमात्र एवेति । यदि हि "पथ्यध्यायन्याय-विहारमनुष्यहस्तिभिति वक्तव्यम्"-इत्येतद्वार्त्तिकभाष्ये "आरण्य-कोऽध्यायः"-इत्येकवचनान्तोदाहरणदर्शनादेवारण्यकग्रन्थाना मेका-ध्यायात्मत्व मेव मन्तव्यं स्यात्, तर्हि तत्रैव "आरण्यकः पन्थाः ०—० आरण्यको न्यायः, आरण्यको विहारः, आरण्यको मनुष्यः, आरण्यको हस्ती"-इत्येकवचनान्तोदाहरणानां दर्शनाच्च आरण्यक-पथ-न्याय-विहार-मनुष्य-हस्तिनां चैकैकत्व मेवावधार्यं स्यात् ; न च तथावधार्यते केनचिदपि प्रकृतिस्थेन । तदेवं यथैव लोके पन्थानः, न्यायाः, विहाराः, मनुष्याः, हस्तिनश्च बहव एव सन्त्येव आरण्यकाः, तथैव वेदे अध्याया अपि बहवः सन्त्ये-वारण्यकाः ; तथा सामवेदस्य छन्दोनामार्चिकमध्ये सामसंहिता-ग्रन्थेषु च सामारण्यकदर्शनादेव स्फुट मवगम्यते, नारण्यकग्रन्थो ब्राह्मणे एवोपनिबद्धो, नापि परिशिष्टरूप एवेति ; सामारण्यक-मन्त्राणां हि सामसंहितामध्यस्थत्वेन तत्र न कस्यापि विरुद्धवाक्-प्रवृत्तिसम्भवः, तेषां परिशिष्टता मात्रङ्कितु मपि न भवेत् कोऽपि सक्षमः । "अरण्यान्मनुष्ये"-इति (४. २. १२९.) पाणिनीय-सूत्रेण आरण्यको मनुष्य इत्येव सिद्ध्यति ; न तु आरण्यकः

पत्याः, आरण्यकोऽध्यायः इत्यादीनि पदानि; अतोऽत्र तेषां साधनाय "पथ्यध्याय"-इत्यादिकं वार्त्तिकं मपाठि कात्यायनेन; एवञ्चोपपद्यते नासीत् पाणिनिकाले आरण्यकोऽध्याय इति; सति हि तस्मिन् कथं न साधितस्तादृशार्यवरेणापीदृश आर्यप्रयोगः ? -इति चेत्, अत्रेदं ब्रूमः— आसीत् तदाप्यारण्यकोऽवश्य मेव; सामसंहिता मध्यभागीयत्वादिनारण्यकस्यापि मन्त्रब्राह्मणात्मकत्वादेवातिप्राचीनत्वावधारणात्; परं पाणिनिकाले नासीत् तथाविधमन्त्राणां ब्राह्मणानाञ्चारण्यक मिति व्यवहारः; अपि तु मन्त्रात्मकारण्यकानां मन्त्रत्वेनैव ब्राह्मणात्मकानान्तु ब्राह्मणत्वेनैत्येव सम्भाव्यते। भगवतः पाणिनेः तादृशप्रयोगासाधने तदाश्रयपदार्थानां तात्कालिकोऽभाव एव कारण मिति तु वक्तुं नैव युज्यते; तथावादिनां हि पाणिनिकाले आरण्यकाः पत्यानो ऽपि नासन्,— आरण्यका हस्तिनोऽपि नासन्— अरण्येषु गावः पुरीष मपि नोदसृजन्,—महद्दिम मपि नासीत्,— महदरण्य मपि नासीदेवेत्यादीनि च गलेकुठारन्यायेन स्वीकार्याण्येव; पथ्यध्यायेति वार्त्तिकेन न हि अध्यायवाचक एवैक आरण्यकः प्रयोगः साधितः, नापि कात्यायनेन तथाविध मेक मेव वार्त्तिकं विरचित मित्यपि स्मर्त्तव्य मेवेति॥

केचित्तु "सामध्वनावृग्यजुषी नाधीयीत कदाचन। वेदस्याधीत्य वाप्यन्त मारण्यक मधीत्य च (४. १२३.)"-इत्यत्र मनुवचने ऋग्यजुस्सामभ्यः पृथगेवारण्यकोल्लेखदर्शनाच्च नास्त्यारण्यकस्य त्रयीत्व मित्याहुः, तदपि न साधीयः; ब्राह्मणात्मकारण्यकस्यापि बोधनार्थ मेव तत्र तथोक्तत्वात्। तथाहि तस्य च मनुश्लोकस्याय' मर्थः,— 'सामध्वनौ' सामगानानन्तरम् 'ऋग्यजुषी'

ऋचः यजूंषि वा 'कदाचन न अधीयीत'; न हि समस्तराद्धान्वितगानानन्तरं वैस्वर्यादिस्फुतिर्मधुरा भवेत्, नापि क्षुद्धाता स्वकण्ठतः समस्तराद्धवतीर्थं तदानीं मेव वैस्वर्यं काश्चितुं समर्थः स्यादिति तादृशयत्न एवासत्फलोऽतस्तथा यतन मेव प्रतिषिध्यते। किञ्च 'वेदस्य अन्तम् आरण्यकम् अधीत्य' अपि ऋचो यजूंषि वा मन्त्रान् न अधीयीत; तादृशारण्यकाध्ययनत एवाध्येतुः श्रोतृणाञ्च मनसां ब्रह्मगत्वेन परिश्रमत्वात् ततोऽपि ऋक्सामयजुर्मन्त्रयोः पाठो निषिद्धः; न हि पूर्णोदरस्यास्तेऽपि रुचिसम्भवः। अत्र च वेदस्य अन्त मारण्यक मित्युक्त्या नून मैतरेयकतैत्तिरीयकबृहदारण्यकादीना मेव ग्रहणं बोध्यम्, तेषा मेव ब्राह्मणात्मकवेदस्यावयवत्वात्; सामारण्यकमन्त्राणान्तु मन्त्रभागमध्यस्थितत्वेन वेदस्यान्तरूपत्वाभावादिहाग्रहण मेव; परं पूर्वार्धे सामध्वनावित्युक्तत्वेव तदग्रहणं सम्यक् मिति सामारण्यकाध्ययनात् पर मपि ऋग्यजुर्लक्षणान् मन्त्रान् नाधीयीतेत्येव। एवञ्च वेदेषु श्रुताना मारण्यकानान्तु वेदत्वं तदनुगतप्राचीनतमत्वाच्चत मेव; प्रत्यक्षस्य बाधाभावात्।

ऐतरेयकपञ्चमारण्यकादीनाञ्चवेदत्वं सर्ववादिसम्मत मेव। तथा चाह सर्ववेदभाष्यकारः सायणाचार्यः स्वयम्— "महाव्रतस्य पञ्चविंशति मित्यादि पञ्चमारण्यकं सूत्र मेव; अरण्ये एवैतदध्येय मित्यभिप्रेत्याध्येतार आरण्यकाख्ये उत्सर्गाध्यायीयते" —इत्येवमादि। तदित्थं यथा मन्त्रभागे सन्त्येव खिलरूपाः श्रौतसूत्राद्यात्मकमन्त्राः, परं न च ते सम्मिलिता मन्त्रभागावयवत्वेन; तथैव ब्राह्मणभागेऽपि सन्त्येव पञ्चमारण्यकादीनि च, परं मेव तानि सम्मिलितानि ब्राह्मणभागावयवत्वेनेति। तत् तादृशीनां

मा भूत् वेदत्वं प्राचीनतमत्वस्येति ; तदभावात्तु वेदात्मकारण्यकोपनिषदां वेदत्वं तथा प्राचीनतमत्वमपह्नोतुं न कोऽपि क्षमेतेति सर्वैः स्वीकार्यम् ॥

एवं पाणिनिसूत्रेषु ह्यापि वेदांशवाचकत्वेन उपनिषच्छब्दस्य प्रयोगादर्शनात् पाणिनीयतः पूर्वं नुपनिषदो नासन्नित्यभ्युपगन्तुः केचिदाधुनिकाः, तदभ्युपगम मतिविस्मयकर मेव ; संहितासु पदस्थेषु, ब्राह्मणेषु च बहुषु विकीर्णरूपत्वेन बहुना मेवोपनिषल्लक्षणवचनानां मीमांसाया मित्येवमादीनाम्, उपनिषदिति ब्राह्मणग्रन्थेषु प्रसिद्धानाञ्च प्रत्यक्षदर्शनात्। भगवता पाणिनिना उपनिषत्पदसाधनाय विशेषः कश्चन प्रयत्नो नोद्भावित इत्येव उपनिषदा माधुनिकत्वे बीज मिति त्वच्चिमता मध्यक्षिषु धूलिनिक्षेपणाय यत्न इव। न हि सर्वतोमुखसूत्रकारेणाचार्येण प्रतिपदसाधनायैव विभिन्नं सूत्रं कार्यम्। तथाच साधारणनियमत एव सिद्धे ह्युपनिषच्छब्दे विशेषवचनव्याभावादेव न कृतं सूत्रान्तर मिति सुवच मेवात्र समाधानम्।

"अणृगयनादिभ्यः"-इति (४. ३. ७३.) सूत्रीये ऋगयनादिगणे "वेतनादिभ्यो जीवति"-इति (४. ४. १२.) सूत्रीये च वेतनादिगणे उपनिषच्छब्दस्य पाठोऽपि दृश्यते। इदानीम्यवस्थितस्यास्य गणपाठस्यापाणिनीयत्वस्वीकारेऽपि आसीच्च पूर्वं कश्चनैवं गणपाठोऽपीत्यवश्यं स्वीकार्य मेव ; अन्यथा हि "ऋगयनादिभ्यः"-"वेतनादिभ्यः"-इत्यादिषु सर्वत्रैव आदिशब्दव्यवहार एवाचार्यस्य व्यर्थता मापद्येत। स्वीक्रियते तु तस्मिन् प्राचीनगणपाठे नासीदेवोपनिषच्छब्द इत्यत्र मानाभावादुपनिषदा माधुनिकत्वपक्षः स्वानुरूपनिश्चायकः। ऋगयनादीना माकृति-

गणत्वस्वीकारेऽपि पाणिनेरुपनिषच्छब्दाज्ञानं न सिध्यति; विनिगमनाविरहात्। सति हि पाणिनेरुपनिषज्ज्ञाने "वेतनादिभ्यः"-इत्येवं नोक्ता "उपनिषदादिभ्यः"-इत्येव ब्रूयादिति तु क्षुतर्क एव; तथोक्ते हि पाणिनेर्वेतनज्ञानं नासीदित्यपि उच्येतैवेति तुल्यो न्यायः।

किञ्च वेदांशवाचकोपनिषच्छब्दोच्चारणं पाणिनिना न क्वचिदपि कृत मित्यत एवोपनिषदां पाणिनीयपरभवत्व मनुमीयेत चेत्,— कात्यायनेनापि तथा नोच्चारितम्, पतञ्जलिनापि तथा नोच्चारित मिति वार्त्तिकपाठात् महाभाष्याच्च परभवत्वं तासा मबाध मेव; किं बहुनाद्यतनीयेऽपि क्वचित् व्याकरणे न दृश्यते उपनिषत्साधनाय यत्नविशेष इति नाद्यापि काचिदुपनिषदाविर्भूतेत्यपि वक्तुं युज्येतैव। अथेदृशेऽपि वचने यदि कश्चित् अहधीत, तर्हि तादृशवचनेऽपि ते श्रद्धां विधत्ता मित्येवास्माकम्।

वस्तुतस्तु इदानीं यावत्य उपनिषदः प्रथिता दृश्यन्ते, न च ताः सर्वा एव वेदोपनिषदः; प्रत्युत तत्र सत्येव कतिपया वेदविद्भिर्वेदार्थतत्त्वोपदेशायैव स्वशिष्येभ्य उपदिष्टाः, उपनिषत्तुल्या इति उपनिषदिति गृहीताश्च शिष्टैः; रामतापन्यादयो यत्यास्तु कैश्चिदर्वाचीनैरेव स्वसम्प्रदायमर्यादाहृदये प्रणीताः, तासा मप्युपनिषत्त्वं तु मन्यन्ते तन्मतानुगता एव; अक्षेत्यादयस्तु सर्वथा अर्वाचीना एव; परं यासु मन्त्ररूपा ब्राह्मणरूपाश्च, ताः खलु पाणिनेर्जन्मतो बहु प्रागपि स्थिता इति ध्रुवम्; अपि वेदविदा मुपदेशरूपाश्च याः काश्चिदुपनिषत्तुल्या उपनिषदित्येव प्रसिद्धाः, तासां ब्रह्मयोऽप्यासन्नेव पाणिनीयतोऽपि पूर्वम्; नास्त्यत्र सन्देहलेशोऽपि। इह युक्तीश्च तिस्रोऽवलोकयामः। तथाहि—

(१) अस्त्येकं सूत्रं पाणिनीयम्— "जीविकोपनिषदावौ-

ण्ये"–इति (१. ४. ७९.)। अनेन च सूत्रेण औपम्ये गम्यमाने एव जीविकोपनिषच्छब्दयोर्गतिसञ्ज्ञा विधीयते, सत्याञ्च गतिसञ्ज्ञायां "कुगतिप्रादयः"–इति (२. २. १८.) समासो भवति, "समासेऽनञ्पूर्वे क्तो ल्यप्"–इति (७. १. ३७.) ल्यब्भावश्च तादृशसमासफल मिति चोदाहृतम्— 'जीविकाम् इव कृत्वा'–इति विग्रहे 'जीविकाकृत्य'–इति, 'उपनिषदम् इव कृत्वा'–इति विग्रहे 'उपनिषत्कृत्य'–इति चेति पदद्वयं वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन। तदिदम् 'उपनिषत्कृत्य'–इत्यस्य पदस्य 'उपनिषदृग्ग्रन्थतुल्यग्रन्थकरणानन्तरम्'–इत्येवार्थः सर्ववैयाकरणसम्मतः। तदेवं पाणिनेः प्राचीनतमोपनिषद्विषयकं ज्ञान मासीन्न वेति विचारस्तु दूरे आस्ताम्,— रचनया विषयेण तात्पर्येण च ये ग्रन्था उपनिषत्तुल्याः कृताः पाणिनिपूर्वतनैर्वेदोपनिषद्भिः, तेषा मुपनिषत्तुल्याना मपि बोध आसीत्तस्येत्यपि स्फुटम्। सिद्ध मित्थं कासाञ्चित् कृत्रिमोपनिषदा मप्यस्तित्वं पाणिनिकालात् पूर्वस्मिन्नपीति, तदत्र कः सन्देहस्तदानीं प्रकृतोपनिषदा मस्तित्वे इति विचारयन्तु धीमन्त एव।

(२) अस्ति चैतत् सूत्रम्— "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः"–इति (४. ३. ११०.)। एतच्च पाणिनिनैव कृत मिति मन्तव्यं चेत्, अवश्य मेवैतत्कर्तुः पाणिनेः भिक्षुसूत्रास्तित्वज्ञाने सन्देहाभावः स्वीकार्य एव; स च सूत्रग्रन्थो वेदान्तदर्शनबीजभूतः, उपनिषद एव च तच्चरण मित्युपनिषद्विषयकं ज्ञान मपि पाणिनेरवश्य मेव स्थित मिति सुतरां प्रतीयत एव।

(३) ये तु निरुक्तकारस्य यास्कस्य पाणिनिपूर्वजत्वं स्वीकुर्वन्ति, तेषां प्रबोधायेद मपि स्मारयामः— "यत्रा सुपर्णा अमृ-

तस्व"-इति (ऋ०स० १. १६४. २१.) मन्त्रस्याधिदैवतव्याख्यान-पक्षेऽग्रवीद्यास्कः— "इत्युपनिषदर्थो भवति"-इति (१. २. ६.)। "ज्ञान मुपगतस्य सतो गर्भजन्मजरामृत्यवो निश्चयेन सीदन्ति, सा रहस्यं विद्या उपनिषदित्युच्यते ; उपनिषद्भावेन वर्ण्यत इति उपनिषदर्थं इत्यधिदैवतम्"-इति चायं तदीयं भाष्यं दुर्गाचार्यकृतम्। अथैतर्हि तेऽपि ब्रुवन्तु पाणिनिपूर्वजस्य यास्कस्याप्युपनिषज्ज्ञान मासीच्चेत्, कथन्न तत्परजस्य पाणिनेरुपनिषज्ज्ञान मिति ?

तदेव मेतत्समालोचने प्रवृत्ताना मस्माक मेव मेव बोधः सम्पद्यते— ये केचनोपनिषदां पाणिनीयतोऽप्यर्वाचीनत्वं निरनयन्, ते नूनं "जीविकोपनिषदावौपम्ये"-इति पाणिनिसूत्रस्य प्रकृत मर्थं नाविदन्, भिक्षुसूत्रग्रन्थोऽपि तेषां न कदापि दृग्गोचरतां गतः, प्रदर्शितं यास्कीयवचनञ्च तदानीं तन्मनःसु नोदित मित्येव ते तथा निर्णेतु मभवन् समर्था इति शम्॥

---

(१०)

अथेदानी मेषोऽपि प्रश्नः स्वतः समुदेति नाम,— तस्यैतस्य वेदस्योत्पत्तिकालनिर्णयः शक्योऽशक्यो वास्माक मिति। कथ-ञ्चाम शक्यः ? कथं वा अशक्यः ? तदेवेह समासतश्चिन्तयाम इति यावत्।

पश्याम एव तावत्,— प्राचीनानां कालिदासादिग्रन्थाना मपि कालाः सुनिर्णीता इव, अतिप्राचीनानां भूगर्भोत्थिताना

मपि शिलास्तम्भादीनां भवत्येव कालनिर्णयः ; वेदकालनिर्णये च केचिद्वीमन्तोऽपि यतितवन्त एवेति ; तत एवैव मुत्प्रेक्षते-ऽस्माक मप्येषाशा , शक्योऽस्य कालनिर्णय इति। यदा तु स्मरामः ,— अपौरुषेयोऽय मिति सिद्धान्तो मीमांसकानाम् ; यदा चाध्यापयामः ,— "नित्या वागुत्सृष्टा स्वयम्भुवा"-इति , "अग्नि-वायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्। दुदोह यज्ञसिद्ध्यर्थ मृग्यजुः-सामलक्षणम्"-इति, "वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे" -इत्येवमादीनि च स्मृतिवचनानि , तदैव तत्र हताशाः सम्पद्या-महे ; अकृतकत्वादेवैतस्य। कृतकत्वेऽपि मनुष्यनिर्मितत्वाभावेन वाग्व्यादितुल्यत्वे नैव फल मनुसन्धानस्य। मनुष्यनिर्मितत्वेऽप्य-नद्ययुगीयत्वेन प्रणेतृव्यक्तिनिर्णयसम्भावनाविरहात् स्यादयक्य एवै-तत्कालनिर्णय इति ॥

एष खल्वार्याणा मादिधर्मग्रन्थः ; धर्मग्रन्थानां प्रायः सर्वेषा मेवोत्पत्तौ कथनकथनालौकिकः प्रवादो विद्यत एव ; अस्यो-त्पत्तिविषयेऽपि तथैवैषः ,— 'न केनचिदपि पुरुषेण प्रणीतो वेदः'-इति। मीमांसकानां कर्मशब्दस्यानुगतफललाभवादिना मीश्वरविचारोऽप्यप्रयोजनीयः , परं वेदानां सर्वथानादित्वप्रति-पादने एव महान् यत्नः।, तथाहि— "वेदांश्चैके सन्निकर्षं पुरु-षाख्याः , अनित्यदर्शनाच्च"-इति सूत्रद्वयाभ्यां पूर्वपक्षं निर्माय सिद्धान्तित मुत्तरसूत्रचतुष्टयेन— "उक्तन्तु शब्दपूर्वत्वम् , आख्या-प्रवचनात् , परन्तु श्रुतिसामान्यमात्रम् , कृते वा विनियोगः स्यात् कर्मणः सम्बन्धात्"-इति मी० द० जै० सू० १. १. २८—३२। एतान्येव सूत्राण्यवलम्ब्य बहु विचारितं शास्त्रदीपिकादौ , तथा निर्णीतन्तु वेदाना मकृतकत्व मेव।

भगवता बादरायणेन तु वेदस्य ब्रह्मकार्यत्वं सूचितम्—"शास्त्रयोनित्वात्"—इति (१. १. ३.)। ऋग्वेदादिशास्त्रकारणत्वाद् ब्रह्म सर्वज्ञ मिति हि तत्सूत्राशयः। एतावताप्यपौरुषेयत्वं वाग्वादितुल्यत्वञ्च नापगतं वेदस्य ; मनुष्यनिर्मितत्वाभावात्। फलञ्च तुल्यं तत्कालनिर्णयाय अनुसन्धानाननुसन्धानयोः ; न हि मनुष्यनिर्मितातिरिक्तेषु कालनिर्णयसम्भवः, ततस्तत्र मैव वाचः प्रसरन्ति प्रेक्षावतां विपश्चिताम्। को नाम मर्त्यो निर्णेतुं सक्षमः, कदेषाभवत् सृष्टिः ? आदिसृष्टेर्वर्णनन्तु स्वस्वकल्पनाग्रहेः परिचयदानमात्रम्। पृथिव्याः अन्तस्तरादिदर्शनात् पृथिवीसृष्टिकालकथन मपि धीग्रहेः परिचयदान मेव। पुराणोक्तसृष्टिकथाश्च नैकरूपाः स्मर्यन्ते, अतस्ताः कल्पनाप्रसूता एव ; अस्तु वा कल्पभेदेन तत्र विरुद्धभाषणमीमांसा, न तथापि सृष्टेरादिकालनिर्णयः सम्भवेत्। ब्राह्मणादिष्वपि सृष्टितत्त्वमीमांसा असम्भाव्यैव ; वेदार्थसहायके मीमांसादर्शने हि तादृश सृष्टिप्रतिपादकाख्यायिकावाक्यानां काल्पनिकत्वनिर्णयात्। तथाहि—"बबरः प्रावाहणिरकामत"—इत्येवमादिषु श्रुतिषु बबरादीना मनित्यार्थानां संयोगात् वेदस्याधुनिकत्व माशङ्क्य सिद्धान्तित मेतत्—"न तु तत्रानित्यो बबराख्यः कश्चित् पुरुषो विवक्षितः, किन्तु बबर इति शब्दानुकृतिः ; तथा सति बबरेति शब्दं कुर्वन् वायुरभिधीयते ; स च प्रावाहणिः, प्रकर्षेण वहनशीलः। एव मन्यत्राप्यूहनीयम्"—इति (मी० जै० सू० १. २. ५० शा० भा०)। निरुक्तकारेण भगवता यास्केन तु "बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति"—इत्युक्त्वा (७. ७. २.) तादृशानां निखिलब्राह्मणवचनाना मनादरः सूचितः। वस्तुतो वैदिकसृष्टिविवरणानि तु प्रायो

रूपकाख्येवेति नात्र मैतिहासिकतोपायेति। तदेव मादिसृष्टि-कालनिर्णयो न कदापि भूतो भवति भविष्यति वेति सिद्धान्तः। अतएव श्रूयते (ऋ० सं० १०. १७३. ४.)—

"ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे।

ध्रुवं विश्व मिदं जगद् ध्रुवो राजा विशा मयम्"–इति। आम्नातस्यैष मन्त्रस्तत्रैव दाशतय्याम् (१. १६४. ४.)—

"को ददर्श प्रथमं जायमान मस्थन्वन्तं यदनस्था बिभर्त्ति। भूम्या असुरसृगात्मा क्वस्वित् को विद्वांस मुपगात् प्रष्टुमेतत्"–इति।

स्मर्यन्ते च — "सिद्धे शब्दार्थसम्बन्धे (का० वा० १.)"–इत्यादयः, सिद्धा द्यौः सिद्धा पृथिवी, सिद्धमाकाशम् (पा० भा० १. १. १.)"–इत्येवमादयश्च। सिद्धशब्दस्य चेह नित्यार्थता; तथा ह्याह पस्पशायां भगवान् पतञ्जलिः— "नित्यपर्यायवाची सिद्धशब्दः"–इति। वेदस्यापि तथात्वे तत्कालनिर्णयमनोरथद्रुमो भवेच्चपलाहत एवेति।

यास्केन त्वत्रैष प्रदर्शितः पुरावादः — "साक्षात्कृतधर्माण ऋषयो बभूवुः, तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य: उपदेशेन मन्त्रान्सम्प्रादुः, उपदेशेन ग्लायन्तोऽवरे विल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च"–इति (१. ६. ५.)। इतस्तु वेदानामाम्नातत्वेऽप्यार्षत्व मेव सिध्यति। ऋषयश्च तेऽस्मत्पूर्वपुरुषा मनुष्या एवेति नष्ट मेवापौरुषेयत्वं वेदस्य। परन्त्वेव मप्यग्रक्यनिर्णेयमेव वेदकालस्य; आम्नानज्ञतयोर्मिथो विभिन्नार्थत्वात्। आम्नात इत्युक्ते न ज्ञायते कृत इति, अपि बुद्धते अभ्यस्त इत्येव; अभ्यासे एव ज्ञातेरुपदेशात् (धा० भ्वा० प० ८२८.)। एवं ज्ञाभ्यासस्तु पूर्वस्थितानामेव भवति; न तु क्रियमाणानाम्। अतएव वाम-

देव्यादीनि सामानि वामदेवादिभिर्दृष्टान्येवोच्यन्ते, न तु कृतानीति। तदेव मन्त्र पौरुषेयत्वेऽपि नास्माद्दृशपुरुषकृतत्व मिति आप्तवाक्यत्व मत्राहृतम्। अतएव वैशेषिक-न्याय-साङ्ख्य-पातञ्जलेषु वेदस्य प्रामाण्यं स्वीकृत मपि नोक्त मकर्तृक एष इति, नाप्युक्त मीश्वरकृत इति च; अपि त्वार्षैः ऋषिभिरेवैषः कृत इत्येव सर्वत्र। तथाहि— "बुद्धिपूर्वा वाक्यकृतिर्वेदे, ब्राह्मणे सङ्ज्ञाकर्मसिद्धिलिङ्गम्"–इति (६. १. १, २.), "आर्षं सिद्धदर्शनञ्च धर्मेभ्यः"–इति (८. २. १३.), "तद्वचनादाम्नायस्य प्रामाण्यम् (१०. २१०)"–इत्येवमादि च वैशेषिके। एव मन्येषु च।

एवं "विश्वामित्र ऋषिः ०—० नदीसुष्टाव गाधा भवतेति"–इति (२. ७. २.), "ऋषिपुत्रा विलपितं वेदयन्ते"–इति (५. १. २.), "गत्वमद मर्थं मभ्युत्थितं कपिञ्जलोऽभिववाशे, तदभिवादिन्येषर्ग् भवति (८. १. ४.)"–इत्येवमादिषु यास्कवचनेषु चोपलभ्यते तत्तन्मन्त्राणा मृषिकृतत्व मेव। "सर्प ऋषिर्मन्त्रकृत् (ऐ० ब्रा० ६. १. १.)"–इत्यादिब्राह्मणवाक्येभ्यश्च तथैवावगम्यते मन्त्राणा मृषिकृतत्वम्।

वस्तुतो मन्त्रार्थालोचनतोऽपि व्यक्तं प्रतीयते त्वेषां धीमत्पुरुषकृतत्वमेव; केषुचिन्मन्त्रेष्वप्येषां बहुपुरुषकृतत्वञ्च ध्वन्यते। तद्यथा ऋ० स० १०. ७१. २—

"सक्तु मिव तितउना पुनन्तो यत्र धीरा मनसा वाच मक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि"–इति।

एवञ्चात्मत्पूर्वपुरुषैर्ऋषिभिरेव कृत एष वेदमन्त्रभागोऽपीति ध्रुवम्।

एव मप्येषां कालनिर्णयस्त्वशक्य एव; अनद्ययुगीयत्वात्। तथाहि— एतद्युगप्रथमसङ्कलाद्या मेव जातः पाणिनिराचार्य

इति तु सिद्धान्तितम् (११७ पृ०) ; ततोऽपि पूर्वतनाः क्रमकारा बाभ्रव्यादयः ; ततोऽपि पूर्वतनाः पदकाराः शाकल्यादयः ; ततोऽपि पूर्वतना ऋक्तन्त्रादिप्रणेतारः शाकटायनादयः ; ततोऽपि पूर्वतना नवयुगारम्भजम्भानो लाट्यायनादयः कल्पसूत्रकाराः (तदानी मेव नवकल्पारम्भ इत्येव तत्कालकृता यस्याः कल्पा इत्युच्यन्त इति च नासम्भवम्)। एतद्युगारम्भात् पुरैव प्रणीतानि कुसुरुविन्दादिभिः ऋषिभिः अनुब्राह्मणादीनि ; ततः पूर्वस्मिन्नेव युगे कल्पे वा महीदासादिभिः श्लोकानुश्लोकगाथादीनि सङ्कृत्य तदनुसारेण कृतान्यैतरेयादीनि ब्राह्मणानि ; ततः पुर एव युगे कल्पे वा प्रवादानेवानुसृत्य प्रणीताः श्लोकानुश्लोकगाथादयः ; ततः पुरस्तादेव युगे कल्पे वा श्रूयन्ते स्म विकीर्णाः प्रवादास्तत एवाद्यापि ते श्रुतय इत्याख्यायन्ते च ; ततः पूर्वस्मिन्नेव युगे कल्पे वाभवत् यज्ञप्रयोगारम्भः ; तदेवाथर्वणा कृत एकेनैव यत्नेन चतुःसंहितासङ्ग्रहः (१५५ पृ०)। तत्पूर्व मेव सम्भवा बभूवुः सूक्तमण्डलादिसङ्ग्रहा इत्यत्रापि नास्ति संशयः। ततः पुरा तु बहुकाल मभिव्याप्य बहुभिरात्मैर्ऋषिभिर्बहुभिरेवोच्चावचैरभिप्रायैरीश्वरशक्त्या दृष्टा बहवो मन्त्राः। तदेवं बहुयुगपूर्व मेवारब्धा मन्त्ररचनेति कथङ्कार मद्यतनाः स्युस्तत्कालविनिर्णये समर्थाः ? अनद्यतनीयानां तादृशातिप्राचीनतमानां कालनिर्णये हि न किं मपि लिङ्गं प्रतिभासेत बहुधीमता मप्यद्यतनानाम्। भवति हि व्यक्तिनिर्णयपूर्वक एव कालनिर्णयः, न चात्र क्वापि व्यक्तिनिर्णयः सम्भाव्यते ; न श्रौतत्वतोऽसौ मन्त्र इति क्वापि लिखितं दृश्यते। दृष्टशब्द एव श्रुतवाचक इति चेत्, तथापि न व्यक्तिनिर्णयः सुकरः ; अग्निना दृष्ट इत्यादौ अग्नीत्यादिसञ्ज्ञानां सञ्ज्ञिशून्यत्वेन कल्पित-

सञ्ज्ञित्वेनैव वा प्रायोऽवधारणीयत्वात् । यथा च खलु सूर्यवंशीयानां क्षत्रियाणां मादिपुरुषः सूर्य इति तु शब्दतः प्रतीयत एव, परं मुदीयमानस्योतस्य दिनमणेरेवौरसजातः स वंश्य इति विश्वासस्तु कथं भवेन्नाम सर्वमेसुधीमताम् ? अतस्तद्वंशादिपुरुषस्य प्रकृत-नामाज्ञानात् सौर्यत्वेन च कल्पितो नाम सूर्य इत्येव तत्र स्वीकार्यम् , तथैवात्रापि । "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थं मृग्यजुस्सामलक्षणम्"–इति मनुवचने (१. २३.) तु प्रधानतोऽग्निविज्ञानार्थं मृग्वेदस्य वायुविज्ञानार्थं यजुषः, सूर्य-विज्ञानार्थञ्च सामवेदस्याख्यान मित्येवार्थः प्रतीयते। तस्मात् तस्यतः प्रवेदव्यक्तिनिर्णयासम्भवादेव मन्त्रकालनिर्णयस्याशक्यतैव सम्पद्यते ।

"अर्षिषि भृगुः सम्भूव (निरु० २. ३. ५.)"–इत्यादिनिर्वच-नानि च विज्ञानावेदकान्येव । तदप्युपरिष्टात् वर्णयिष्यामः समासतः । अथ यदि 'तुष्यतु दुर्जनः'–इति न्यायेन स्वीकुर्याम,—तथैव समुत्पन्नः कश्चित् भृगुर्नाम महर्षिरिति, श्रुतं तेनैव भृगुणा भार्गवं नाम सूक्त मिति च, तथापि न सम्भवेत् व्यक्तिनिर्णयः ; को हि जानाति कोऽयं भृगुः कदेमां भुव मलञ्चकारेति ? एवं यत्र क्वचिन्मन्त्रे वसिष्ठ-नाम श्रूयते, तस्यापि रचनाकालनिर्णयो-ऽस्माक मशक्य एव ; यतो हि को जानाति आदिवसिष्ठः कदो-त्पन्न इति ? एवं यान्यपि दृढ़ादिभिर्भृगुभिरिन्द्रप्रमतिप्रभृतिभिर्व-सिष्ठैश्च दृष्टानि सूक्तानि श्रूयन्ते, तेषा मप्युद्भवकालविज्ञेयता गाढ़तमोभिराच्छन्नैव ; सर्वत्रैव हि तत्र तत्रापि कालनिर्णायक-लिङ्गाभावः, नापि हि आदिभार्गवस्यैव भार्गव इति, आदिवासिष्ठ-स्यैव च वासिष्ठ इति व्यवहारनियमो विद्यते लोकेऽत्रत्र वा । तथैव वेदे काश्यपवचन मप्यस्ति सत्यम् । परं न तत्र इयत्ता

मेक एव काश्यपः सञ्जातः ; अहं मपि काश्यपः, मत्पुत्रोऽपि काश्यपः , मत्पौत्रोऽपि काश्यपः, मत्प्रपौत्रोऽपि भविष्यति काश्यप एव । एवं भारद्वाजादयोऽपि । तस्मादेतादृशनामपर्यालोचनया च मन्त्रप्रणयनकालनिर्णये यत्नः सर्वथा व्यर्थ एव ।

एतच्च निर्णीत मेव विद्वद्भिः,— अद्य यावत् यावतां प्राचीन-प्रबन्धाना मनुसन्धानं सम्पन्नम् , तेषु सर्वेष्वेव मन्त्रभागः प्राचीन-तम इति ध्रुवम् ; अस्मादपि पुरातनः कश्चित् प्रबन्धो बभूव, इदानीं लुप्त इत्यपि वक्तुं न कस्यापि पुरातत्त्वानुसन्धित्सोरोष्ठा-धरौ स्फुरिताविव दृश्येते । तदित्थं मनद्ययुगीयत्वात् व्यक्तिलिङ्गान-वाप्तेः रचयित्रव्यक्तिनिर्णयाभावात् मन्त्रभागस्य कालनिर्णयस्तु सर्वथा अशक्य एवास्माक मद्ययुगीयाना मिति ॥

ब्राह्मणग्रन्थाना मपि कालनिर्णये यत्नोऽप्येव मकिञ्चित्कर एव ; न हि तेषु कस्याप्येकस्य कालनिर्णयसहायः संवादोऽव-गम्यते क्वापि लोके शास्त्रे वा । ततः सर्वेषा मेव युगान्तरीय-ग्रन्थानां कालनिर्णये एतल्लक्षकाब्देऽयं ग्रन्थः प्रणीत इति निर्द्धारणे वयं समसमर्था एव सर्वथा । मन्त्रब्राह्मणयोः सम्यक् पर्यालोच-नया मन्त्रभागात् परभवो ब्राह्मणभाग इति तु वक्तुं युज्यते ; एवम् मन्त्रब्राह्मणयोरुभयोरपि भागयोरन्तरे च एतस्मान्मन्त्रा-देष मन्त्रः परभवः , एतस्मात्तेष प्राग्भवः, किञ्चैतस्माद् ब्राह्मणा-देतत् ब्राह्मणं ब्राह्मणवाक्यं वा परभवम् , एतस्मात्तैतद् प्राग्भव मित्यपि प्रायो निःशङ्कं निर्णेतुं शक्यते , परं नैतद्युगीयैतल्लक्षके-ऽब्देऽयं मन्त्रग्रन्थो ब्राह्मणग्रन्थो वा प्रणीतो ग्रथितः सङ्कलितो वेति नास्माकृशां बोधयोग्यम् । अतएव मन्त्रभागस्येव ब्राह्मण-भागस्याध्ययनादित्व मुपचर्य्यतेऽद्येति ॥

यद्यप्यैतरेयभाष्यभूमिकायां सायणाचार्येणापि प्रकाशित एवैतरायाः पुत्रो महिदासाख्यो भूमिदेवतातो वर मवाप्य भाषितं यद् ब्राह्मणं, तदेव प्रथित मैतरेय मितीति प्रवादः । तथापि तस्यापि ब्राह्मणस्य न शक्यः कालनिर्णयः ; प्रदर्शितप्रवादाच्चिद मेव हि ज्ञायते,— इतरेतिप्रसिद्धायाः कस्याश्चिदपि ऋषिरमण्याः पुत्रेणेदं प्रोक्त मिति , परं तस्मात्रैव मभिव्यज्यते,— एतद्युगीये एतस्मिन्वर्ष्णे किल सा ऋषिरमणी तद्ब्राह्मणग्रन्थं प्रणेष्यन्तं कुमारं प्रसूयेमं जगतीतल मलङ्कृतवतीति । एवञ्चैतरेयादिग्रन्थानां कालनिर्णयाय तात्पर्यप्रवादादीना मवलम्बन मपि सुदूरपारसागर मुत्तितीर्षोः प्लवमानकाष्ठकुशावलम्बनकल्प मेवेति ॥

यदप्यैतरेयके— "एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच ; तस्माद् जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे । तदेषाभि यज्ञगाथा गीयते— 'आसन्दीवति धान्यादं बल्बजं हरितस्रजम् । अप्रुं ववन्ध सारङ्गं देवेभ्यो जनमेजयः' -इति (८. ४. ७.)"-इत्येवमादि ; ताण्ड्यब्राह्मणे चैवं श्रूयते — "जनमेजयसार्वसेनो यावः"-इति (२५. १५.)। एवमादिश्रुतेन यदि कश्चिदध्यवस्येत् ,— अर्जुनपौत्रजनमेजयात् परस्तादेवैतानि प्रवीताम्यैतरेयकादीनि ब्राह्मणानीति , तथाच यौधिष्ठिरीयाया मध्यूनद्वितीयशताब्द्या मेवैषां सम्यक् प्रचयन मितो निर्वीत एवैतत्काल इति ; तर्हि सः स्खादवश्यं स्वमावर्त्तमज्ञः स्खातिबुद्धेव वञ्चितः । ऐतरेयादीनां यौधिष्ठिरीयद्वितीयशताब्दीजत्वे हि पाणिनिसमकालत्व मेव प्रसज्येत ; पाणिनेरपि यौधिष्ठिरीयद्वितीयशताब्दीजत्वनिर्णयात् (११६ पृ०)। न च

तत्रेष्टापत्तिः ; पाणिनीये व्याकरणे ब्राह्मणग्रन्थाना मतिप्राचीनत्वेन प्रोक्तत्वादिस्वीकारात् ; न हि समकालिकानां ग्रन्थानां प्रोक्तत्वेन व्यपदेशः सङ्गच्छते, नापि छन्दस्त्वादिक मुपपद्यत इति ।

अस्माभते तु बभूवैव कश्चन पुराकल्पेऽपि पारीक्षितो जनमेजयः, तत्तन्नामश्रुत्यनुसारत एवाभिमन्युपुत्रस्याभवन्नामकरणं परीक्षित इति, तथा तत्पुत्रस्य जनमेजय इति च । तथथा, दृश्यत एव हि भागवतादिषु सत्यव्रतो नाम, ततो मन्नामकरणं च सम्यक् सत्यव्रत इति ; न च मन्नामकरणतः पश्चात् प्रणीतानि भागवतादीनि । अप्येवं वङ्गकवेर्वङ्किमस्य लेखनीजातानि मृणालिनीत्यादीनि च नामानीदानीं बहुष्वेव वङ्गाङ्गनेषु व्यवह्रियन्ते चेति । एव मेव समाधानं सर्वत्रैवावश्य मुररीकर्त्तव्यम् ; अन्यथा वेदेषु भोजनामश्रवणात् भोजसमसामयिकस्य वेदभाष्यकृदुव्वटस्यापि वेदसमकालजत्वं प्रसज्येतेव , तत् कथङ्कारं वार्येतेति । तथा हि ऋक्संहितायां श्रूयते— "भोजस्येदं पुष्करिणीव वेश्म"–इति (१. १०७. १०.), श्रूयते चैतरेयब्राह्मणे तत्रैवाभिषेकप्रकरणे— "भोजं भोजपितरम्"–इति (८. ४. ३.) ; उव्वटेन— "मन्त्रभाष्य मिदं कृत्स्नं भोजे पृथ्वीं प्रशासति"–इति । तदत्र कथयन्तु धीमन्तो यदि नाम नामदर्शनादेव कालनिर्णयः शक्यस्तर्हि तत्तद्वेदग्रन्थाविर्भावकाले एव किं माविरभूत् वेदभाष्यकार उव्वटो वज्रटाल्लजः ? इह नेत्युक्ते स्वीकार्य एवायं न्यायोऽन्यत्रापि सर्वत्रैवेति किमु वक्तव्य मत्रास्तीति ॥

यच्चोक्तम् ,— शतपथं] नाम ब्राह्मणं पाणिनीयतोऽप्युत्तरभवेन कात्यायनसमकालिकेन याज्ञवल्क्येन प्रणीतम् ; "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु"–इति (४. ३. १०५.) हि पाणिनिसूत्रम् ,

तत्सूत्रस्थं वार्त्तिकादिकं च तत्र मान मिति। तदप्यतीव विस्मयकर मस्माकम्; गम्यते हि तस्मादेव सूत्रात् तत्सूत्रीयवार्त्तिकादिभ्यश्च शतपथस्यापि पाणिनीयतः प्राचीनत्व मेवेति। तथाहि यदस्त्येतत् सूत्रं पाणिनीयम्— "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु"— इति (४. ३. १०५.)। "ततोयाल्लात् प्रोक्तार्थे णिनिः स्यात्, यत्प्रोक्तं पुराणप्रोक्तास्चेद् ब्राह्मणकल्पास्ते भवन्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ताः। भल्लु— भाल्लविनः। शाट्यायनः— शाट्यायनिनः। कल्पे—, पिङ्गेन प्रोक्तः पैङ्गी कल्पः। पुराण इति किम्? याज्ञवल्क्यानि ब्राह्मणानि, आश्मरथः कल्पः"— इति तत्रैव वैयाकरणसिद्धान्तकौमुदी। तत्रैतद् विचार्यम्— यदि नाम याज्ञवल्क्यं ब्राह्मणं शतपथ मिति यावत् पाणिनेर्नावगतं स्यात्, तर्हीह किं प्रत्युदाहरणं भवेत्?— ज्ञातिव्याप्तिवारणाय सूत्रे पुराणविशेषण मुपपद्येत? न हि भविष्यमाणग्रन्थस्य शतपथादेः प्रोक्तत्वं पाणिनेरभिमतं भवितु मर्हति, तत् किंव्यावर्तकं सूत्रस्थं पुराणपद मिति। वस्तुतस्तु पाणिनिना यथा प्राचीनत्वेन ज्ञातं पैङ्ग्यादिकं कल्पशास्त्रम्, तथैव ज्ञात मेव आश्मरथ्यादिकं च; अतएव प्रोक्तत्वेन तेषां सर्वेषा मेव ग्रहणसम्भवेऽनिष्टप्रयोगः प्रसज्येतेति प्राचीनेष्वपि कल्पेषु ये पुराणप्रोक्ताः= प्राचीनतराः, तेभ्य एव णिनिर्विधाय आश्मरथ्यादिभ्यो णिनिप्रसङ्गो वारितः; तथा सर्वेभ्य एव कल्पेभ्योऽपि प्राचीनेषु सुतरां प्राचीनतरेषु ब्राह्मणग्रन्थेषु सर्वत्रैव णिनिप्रसङ्गवारणाय तत्रापि पुराणविशेषणं सार्थकम्; सति हि पुराणविशेषणे प्राचीनतरेभ्यः सर्वेभ्य एव ब्राह्मणग्रन्थेभ्यो न भवति णिनिः; अपि तु तत्रापि ये पुराणप्रोक्ताः= प्राचीनतमाः, तेभ्य एवेति सिद्धं शाट्यायनि

ब्राह्मण मित्यादि ; ये तु प्राचीनतरेष्वपि ब्राह्मणग्रन्थेषु शाट्यायनादिपरभवप्रोक्ताः न तेभ्यो णिनिरिति सिद्धं याज्ञवल्क्यं ब्राह्मण मित्यादि च। एवञ्चातिप्राचीनेष्वेव पुराणप्रोक्तत्वं तदितरत्वं चेष्टं पाणिनेरिति याज्ञवल्क्यब्राह्मणादेरप्यतिप्राचीनत्वमत्रत मेव।

एव मेतत्सूत्रस्थं वार्त्तिक मप्यस्मन्मतपोषक मेव। तथाहि— "पुराणप्रोक्तेषु याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्"–इति वार्त्तिकम्। शाट्यायनादिप्रोक्तानां ब्राह्मणानां, पिङ्गादिप्रोक्तानां कल्पानाञ्च यथा पाणिनिपूर्वप्रोक्तत्वम्, तथैव याज्ञवल्क्यादिप्रोक्तानां ब्राह्मणाना मश्मरथादिप्रोक्तानाञ्च कल्पाना मिति सर्वेषा मेवैषां पाणिनिपूर्वप्रोक्तत्वेन तुल्यकालत्वात् पुराणप्रोक्तत्वं समान मिति सर्वेभ्य एवैतेभ्यो णिनिः प्रसक्तः ; तन्निवारणाय याज्ञवल्क्यादिभ्यः प्रतिषेधरूपो यत्नविशेषः कर्त्तव्य इति च तद्वार्त्तिकाशयः। एवञ्चैतद्वार्त्तिकारम्भात् भगवतः कात्यायनस्य अतिप्राचीनेष्वेव ब्राह्मणेषु कल्पेषु चासीत् पुराणप्रोक्तत्वापुराणप्रोक्तत्वनिर्णये संशयः, तन्निरासाय च यत्नोऽवश्यं कर्त्तव्य इत्येव तदाशयः फलितः। कात्यायनसमकालिकस्यैव कस्यचित् याज्ञवल्क्यस्य तु सति शतपथनिर्माटत्वे तत्र पुराणप्रोक्तेष्विति णिनिप्रसङ्ग एव कथम् ? कथं वा तन्निरासाय वार्त्तिकारम्भो भवेत् प्रयोजनीयः ? तत्त्वतो पाणिनिसमकालिकानां पाणिनिसदृशानाञ्च धीमतां प्राचीनतमेष्वपि ग्रन्थेषु पौर्वापर्यनिर्णयो यथा सुगमः, न तथा तत्परकालिकानां कात्यायनादीना मपीति तदानी मेव याज्ञवल्क्यादीनां परिगणनं सप्रयोजनं जातम्, तत् किं मद्यतनानां त्वस्माकम्।

एव मेतदीयं भाष्यञ्चास्मन्मतसाधक मेव। तथाहि— "पुराणप्रोक्तेषु ब्राह्मणकल्पेष्वित्यत्र याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः।

याज्ञवल्क्यानि ब्राह्मणानि, सौलभानीति। किं कारणम्? तुल्यकालत्वात्; एतान्यपि हि तुल्यकालानीति"-इत्येव तद्भाष्यम्। "तुल्यकालत्वादिति— शाट्यायनादिप्रोक्तैर्ब्राह्मणैरेककालत्वादित्यर्थः"-इत्येव च तत्रोक्तवान् कैयटो जैयटाग्रजः। यद्यपीह वार्त्तिकमत मेवानुमोदितं भाष्यकारेणेति गम्यते, तथापि नो न भ्रान्तिः। श्रीमन्नागेशभट्टस्य मते तु शाट्यायनादिसमकालतैव याज्ञवल्क्यादिप्रोक्तानां शतपथादीनाम्; अतस्तेभ्यो णिनिः प्राप्तः, कालायनवचनेन वारितोऽनुमोदितश्च तद्वचनं भाष्यकारेणेति। तथाहि— "याज्ञवल्क्यानीति। कण्ठादिभ्य इत्यण्। ते हि पाणिन्यपेक्षया आधुनिका इत्यभिमानः; भाष्ये तु शाट्यायनादितुल्यकालत्वाद् ०—० वचन मेवारब्धम्"-इति (ल० म० शे०)। वस्तुतो भाष्ये एतत्पूर्व मेव "छन्दोब्राह्मणानि च तद्विषयाणि (पा० ४. २. ६६.)"-इत्यत्रोक्तम्— "वक्ष्यत्येतत् 'याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्'-इति। तत्रैव वक्तव्यम्; तद्विषयता च न भवतीति"-इति। "वक्ष्यत्येतदिति। पुराणप्रोक्तेष्वित्यत्र"-इत्येव च तत्र कैयटः। तथा च अतिप्राचीनेष्वेव ब्राह्मणकल्पग्रन्थेषु ये पुराणप्रोक्ताः, तत्रैव णिनिः पाणिनिना विहितः; ये तु नूतनप्रोक्ताः, तत्र तु णिनिविषयतैव नास्तीति व्यर्थं वार्त्तिक मिति तद्भाष्याशयः। पाणिनिकालेऽपि ये ग्रन्था अतिप्राचीना इति प्रसिद्धा अतएव प्रोक्ता इत्येव व्यपदिष्टास्तदानीन्तनैः शिष्टैः, तेष्वेव ये पुराणप्रोक्ताः ये वा नेति निर्णयायैव परिगणन मवश्यं कर्त्तव्य मिति वार्त्तिककारमतम्। "आख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्"-इति भाष्येऽपि च तत्खण्डनं योग्य मित्येवात्र सारम्। तदित्थं सूत्रकारवचनात्,

वार्त्तिककारवचनात्, भाष्यकारादिवचनाच्चेद मेव सिद्धम्,— याज्ञवल्क्यादिप्रोक्तं शतपथादिकं शाट्यायनादिभ्योऽर्वाचीन मपि पाणिनीयतः प्राचीनतम मेवेति।

वार्त्तिककारकात्यायनसमकालिकः कश्चन याज्ञवल्क्यो नासीदासीदेति नाऽत्रेदिचारविषयः;— अपि तु शतपथप्रवक्ता याज्ञवल्क्यस्तु वार्त्तिककारकात्यायनसमकालिकः कथ मपि नैव; पाणिनिसमकालिकोऽपि न सः कथ मपि; प्रत्युत पाणिन्यादयो यस्मिन् युगे जातः, यस्मिन् कल्पे जातः, ततोऽपि पूर्वतन एव; किञ्च तस्य शाट्यायनादिसमकालिकत्वाभावेऽपि ब्राह्मणकालजत्वन्त्वविवाद मेवेति तत्कालनिर्णयोऽप्यस्माक मशक्य एवेति शम्॥

---

(११)

अथैतर्हि समालोचयितव्य मस्ति, के विषयास्तन्निरुक्तप्रतिपाद्या इति। सर्वेषा मेव वेदाङ्गानां साक्षात्परम्परया वा वेदार्थज्ञान मेव प्रयोजनम्, तत्साधनायोपदेश एवैकः प्रतिपाद्यविषय इति तु वेदविद्प्रसिद्ध मेव; तदिह निरुक्ते वेदार्थज्ञानसाधनाय तत्प्रसङ्गतश्च येऽखिलविषयाः प्रतिपादिताः, तानेव व्याकर्त्तुं समग्र मेवेमं ग्रन्थं समासतः किञ्चिदिस्तरतश्चालोचयाम इति यावत्।

अथैतस्य च निरुक्तशास्त्रस्य बीजानि पुरासन् श्रुतिषारिधौ विकीर्णानि; अतएवोच्यत इद मपि शास्त्र मानुश्रविक मिति। ततो ब्राह्मणग्रन्थेषु यथाप्रयोजन मेकैकं चीयमान मङ्कुरितम्; तस्मादेव च तस्य सम्यक्त्व मालवालीभूतग्रन्थान्तर्गतत्वम्। ततोऽनुब्राह्मणेषु विशेषतः प्रोच्यमानं परिपुष्टम्। तत एव काले

निदानसूत्रेषु पल्लवितं सत् प्रकरणविशेषात्मकत्व मुपगतम् । तत-स्तेभ्य एव शाकपूणादिभिः शाखाप्रशाखादिभिः सञ्जितं ग्रन्था-कारतः प्रणीतं निरुक्त मिति । तान्येव सर्वाण्यवलम्ब्य कृत मेतन्नि-रुक्तं भगवता यास्केन पुष्पितं फलितञ्चैव मेवेति वृद्धाः ।

तस्यास्य प्रथमाध्यायस्तु ग्रन्थभूमिकारूपः ; तत्र निघण्टुशब्द-निर्वचनादीनि च प्रतिपादितानि । द्वितीयतृतीयाध्याययोर्निर्वचन-प्रकारादिकथनपूर्वकं भाषितं नैघण्टुककाण्डव्याख्यानम् । चतुर्था-दिषु तु त्रिष्वध्यायेषु ऐकपदीत्वाख्यानपूर्वकं कृतं नैगमकाण्ड-व्याख्यानम् । तत उत्तरं षट्स्वध्यायेषु देवतातत्त्वबोधनपूर्वक माख्यातं दैवतकाण्डव्याख्यानम् । इत ऊर्ध्वं त्रयोदशाध्यायरूपे प्रथमपरिशिष्टे अतिस्तुति मधिकृत्यात्मतत्त्वोपदेशादीनि प्रदर्शि-तानि । ततश्चतुर्दशाध्यायात्मको द्वितीयपरिशिष्टः, तत्रोर्ध्वमार्गगति मधिकृत्याख्यातानि च परमपुरुषार्थसाधनानीति सङ्क्षेपः ॥

किञ्चिद्दिग्दर्शनमत्रेद मालोचनम् ;—

(१) यद्यप्येतन्निरुक्तं तत्वतो निघण्टुभाष्यरूप मेव, परं न ह्यत्र नैघण्टुकानां सर्वेषा मेव पदानां व्याख्यानान्युक्तानि । यथाहि— नैघण्टुकसमाम्नाये पृथिव्या नामधेयानि एकविंशतिसङ्ख्याकानि परिपठितानि श्रूयन्ते, तेषा मेक मेव गौरिति व्याख्यातं द्वितीया-ध्यायीयेन समग्रद्वितीयपादेन ; अपरेषाम्पुनर्नाम्ना मुल्लेखोऽपि न कृतः । अत एवोक्तं तदन्ते वृत्तिकृता— "अनुक्रमणं त्वधिकृतम् , तस्मिन् गोशब्द एको निरुक्तः प्रकारोपदर्शनार्थनार्थम्"—इत्यादि ।

(२) प्रसङ्गसङ्गत्या वैदिकगूढतत्त्वान्यपीह बहूनि प्रतिपादि-तानि । तथा— "पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे (१. १. २.)"—इत्येवमादीनि चिन्तनीयानि ।

(३) व्याख्यातान्यपीह स्वप्रदर्शितनिगमश्रुतपदादीनि च प्रायः सर्वाण्येव। अतएवोक्तं निघण्टुटीका भूमिकाया— "नैघण्टु-गतेष्वेव पदेष्वध्यर्धशतत्रयमात्राणि पदानि भाष्यकारेणैव तत्र तत्र निगमेषु प्रसङ्गान्निरुक्तानि"—इति।

(४) मन्त्रश्रुतपदान्येव चात्रोदाहरणत्वेन प्रायः सर्वत्रोपात्तानि; ब्राह्मणीयानि तु न तथाहृतानि; तथाचेदानीं मन्त्रब्राह्मणयोर्वेदनामधेयत्वेऽपि मन्त्रगतानामेव पदानां व्याख्यानेन वेदव्याख्याने कृतकृत्यमन्यो बभूव स इति चावगम्यते। प्रत्यक्षयोग्ये कृतं मानान्तरोपादानेन।

(५) नात्र च मन्त्रगतानामेव पदानां निर्वचनानि समुपदिष्टानि; अपि तु तत्सन्नियोगात् लौकिकानाञ्च बह्वनाम्। तद्यथा निर्वचनारम्भे एव— गोशब्दनिर्वचनप्रसङ्गात् पयः-शब्दस्य कृतं निर्वचनम्, तत्प्रसङ्गात् क्षीरशब्दस्यापि (२. २. १.)। एवमेवोत्तरत्रापि बहुत्र।

(६) लोकवेदसाधारण्या अपि विद्याया इह बहव उपन्यस्ताः। तद्यथा— "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपातास्च" —इत्यादयः (१. १. १.)। "अणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके, तेषां मनुष्यवद् देवताभिधानम्"—इति च तत्रैव ततः उत्तरम् (१. १. २.)।

(७) स्वप्रदर्शितेषु निगमेषु समुपात्तानां पदनिर्वचनादीनां स्वकपोलकल्पितत्वदोषपरिहाराय मतभेदप्रकाशाय च पूर्वाचार्याणां बह्वना मेव नामादीन्यपीह कीर्त्तितानि। तद्यथा— आग्रयणः, आग्रायणः, आचार्याः, एके, ऐतिहासिकाः, औदुम्बरायणः, औपमन्यवः, और्णवाभः, कात्यक्यः, क्रौष्टुकिः, गार्ग्यः,

गालवः, चर्मशिराः, तैटिकिः, नैदानाः, नैरुक्ताः, परिव्राजकाः, पार्षदानि, मनुः, याज्ञिकाः, पूर्वे याज्ञिकाः, वार्ष्यायणिः, वैयाकरणाः, शाकटायनः, शाकपूणिः, शाकल्यः, स्थौलाष्ठीविः, हारिद्रवकम्, इत्यादि।

(८) निर्वचनान्येव प्रदर्श्य च न मेने यास्कः स्वकृतकृत्यताम्; अपि तु मन्त्रार्थज्ञानाय यथा-यथा यतितव्यम्, तत्सर्वं मेवेदोपदिष्टम्। द्वितीयाध्यायस्य प्रथमपादस्तु सर्व एवैवमर्थकः। ते त्रयुपदेशा वेदतत्त्वार्थव्याख्यातॄणां पथप्रदर्शिकाः। तथथा—

"अथ निर्वचनम्। तस्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यादिर्ब्रूयान्न त्वेव न निर्ब्रूयात्।

न संस्कार मादृियेत विषयवत्यो हि वृत्तयो भवन्ति। यथार्थं विभाषीः सत्यमयेत्।

प्रस्त मवस्त मिति धात्वादौ एव ग्रियेते, अथाप्यस्तेर्निर्हस्तिक्षानेष्वादिलोपो भवति स्तः सन्तीति, अथाप्यन्तलोपो भवति गत्वामत मिति, अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति, अथाप्युपधाविकारो भवति राजा दण्डीति, अथापि वर्णलोपो भवति तस्वा यामीति अथापि द्विवर्णलोपस्तृच इति, अथाप्यादिविपर्ययो भवति ज्योतिर्वनो बिन्दुर्वाच्य इति, अथाप्यान्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तक्रिति, अथाप्यन्तव्यापत्तिर्भवति ओघो मेघो नाधो गाधो वधूर्मधिति, अथापि वर्णोपजन आख्यद् द्वारो भरुजीति।

तत्रत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद् द्विप्रकृतीनां स्थान मिति प्रदिशन्ति; तत्र सिद्धाया मनुपपद्यमानाया मितरयो-

पपिपादयिषेत्तन्नाप्येकेऽल्पनिष्पत्तयो भवन्ति तद्यथैतदूतिर्मृदुः पृथुः पृथतः कृष्णरु मिति ।

अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते दमूनाः क्षेत्रसाधा इति, अथापि नैगमेभ्यो भाषिका उष्णं घृत मिति, अथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु ,— गवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते [कम्बोजाः कम्बलभोजाः कमनीयभोजा वा, कम्बलः कमनीयो भवति], विकार मस्यार्येषु भाषन्ते गव इति ; दातिर्लवनार्थे प्राच्येषु दात्र मुदीच्येषु । एवमेकपदानि निर्ब्रूयात् ॥

अथ तद्धितसमासेष्वेकपदेषु च पूर्वं पूर्वं मपरं मपरं प्रविभज्य निर्ब्रूयाद्, दण्डः पुरुषो दण्डपुरुषः, दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा, दण्डो ददतेर्धारयतिकर्मणोऽक्रूरो ददते मणि मित्यभिभाषन्ते , दमनादित्यौपमन्यवः , दण्ड मस्याकर्षतेति गर्हायाम् ; कक्षा रज्जुरश्वस्य कक्षं सेवते , कक्षो गाहतेः क्व इति नामकरणः , ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन् ख्यान मिति, कषतेर्वा; तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामान्यादश्वस्य । राज्ञः पुरुषः, राजपुरुषो राजा राजतेः , पुरुषः पुरिषादः पुरिशयः, पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुष मभिप्रेत्य—

'यस्मात्परं नापर मस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥'

—इत्यपि निगमो भवति । 'विश्वकद्रावर्षी' वीति चकद्र इति प्रगती भाष्यते ; द्रातीति गतिकुत्सना , कद्रातीति द्राति-कुत्सना, चकद्राति कद्रातीति सतीऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति विश्वकद्रः । कल्याणवर्ण रूपः कल्याणवर्णस्येवास्य रूपं ; कल्याणं कमनीयं भवति, वर्णो वृणोतेः रूपं रोचतेः । एवं तद्धितसमासानिर्ब्रूयात् ।

नैकपदानि निर्ब्रूयात्सावयाकरणाय नानुपसन्नायानिदंविदे वा [नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया] उपसन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्याद्मेधाविने तपस्विने वा ।—

'विद्या ह वै ब्राह्मण मा जगाम गोपाय मा शेवधिष्टेऽहं मस्मि ।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् ॥
य मातृणस्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्तमसश्च नाह ॥
आध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव तेन गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥
य मेव विद्याः शुचि मप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्तेन द्रुह्येत्तमसश्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥'

—इति । निधिः शेवधिरिति"—इति ॥ एव मन्यत्रापीह बहुत्र ।

(९) विरुद्धार्थाना मपि मन्त्राणां सामान्यविशेषन्यायेन प्रामाण्यं स्वीकार्य मित्यपि प्रादर्शि तेन । तद्यथा— "ओषधे त्रायस्वैनं स्वधिते मैनं हिंसीत्याह हिंसन् ? ०—० आम्नायवचनादहिंसा प्रतीयेत"—इति (१. ५. १, २.) ।

(१०) आग्रहनीयेषु वेदार्थेषु सिद्धान्तीकरणप्रकारश्चोपदर्शितस्तेन । तद्यथा— "पहदवसं गावः पृथ्यदन मवतेर्गत्यर्थस्यासौ नामकरणस्तस्मात्प्रावरट्छन्ति (१. ६. १.)"—इत्यादिः ।

(११) पूर्वतनै राचार्यैरपि प्रणीतेषु ग्रन्थादिषु न तस्यासीद् भ्रमशून्यत्वविश्वासः, प्रत्युत सर्वत्रैवास्ति भ्रमसम्भवः, अतोऽतिविश्वासः सर्वत्रैव दूषणीयः, परीक्षणीयाश्च सर्व एव सिद्धान्ताः, परीक्षया प्रमाणिते च तत्र कुत्रचिद् भ्रमे कर्तव्य एव तस्यानादर इत्येव तस्य भगवतः स्वकीयं मतम् । तच्चेदं

ध्वनित मिह। यथा— बभूव शाकल्यो नामाचार्यः ऋक्-संहिताया: पदकारः, पाञ्चालो बाभ्रव्याचार्यश्च ऋषिश्च तदवलम्बनेनैवाभवत् क्रमप्रवक्ता। इहैकत्रैव तयोरुभयोरपि भ्रमः प्रदर्शितः— "वायः, वेः पुत्रः। ०—०। वेति च य इति च चकार शाकल्यः। उदात्तं त्वेव माख्यात मभविष्यत्, अस्तु समानस्वार्थः"-इति (६. ५. ५.)।

(१२) उणादिसूत्राणा मपि बहुत्वानादरः सूचितः। उक्तं हि एकादशे 'व्योम'-इत्यस्यार्थो 'व्यवने'-इति (११. ४. ६.); तथा च विपूर्वकादवतेरेव व्योम नाम इति व्याख्यातदभिप्रायः। पदकारादीना मप्येषोऽर्थः सम्मत एव; तत्र 'विऽओमन्'-अवग्रहादिदर्शनात् (ऋ० सं० प० २. ३. २२. १.)। उणादिसूत्रेण तु 'व्येञ् संवरणे'-इत्यत एव मनिनि निष्पद्यते व्योमेति (उ० सू० ४. १५०.)। एव मन्यत्रान्यत्रापि बहुत्र द्रष्टव्यम्।

(१३) यत्र यत्र संहितामेदतोऽवग्रहे मतभेदो विद्यते, तादृशपदानां तथा निर्वचनवैविध्य मपि प्रकटितं बहुत्रैव। तद्यथा— अस्ति सूर्यशब्दस्यावग्रहे पदकारादीनां मतभेदः; बह्वृचां पदक्रमग्रन्थयोः किल न क्वाप्यवग्रहीतः पठ्यते सूर्यशब्दः, छन्दोगानान्तु क्वचित् क्वचिदवगृह्यतेऽपि 'सु। जर्यस्य'-इत्यादि (सा० छ० प० ६. १. ५, ६.)। अतएवात्र कृतं तेन तथा निर्वचनवैविध्यम्— "सूर्यः, सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा"-इति (१२. २. ३.)। इतएव गम्यते— बह्वृक्पदकारमते सर्वत्रैव सर्त्तेः सुवतेर्वा निष्पद्यते सूर्य इति न तेन तत्रावग्रहः कृतः क्वापि; सामपदकारनये तु अर्थानुरोधतः क्वचित् सर्त्तेः सुवतेर्वा क्वचित् स्वीर्यतेः (सुपसर्गपूर्वादीर्यतेः) स्वीकार्यं सूर्यनामेति क्वचिदवग्रहः कृतः क्वचि-

क्षेति च । तथाहि— छन्दःपदसंहितायाः षष्ठप्रपाठकीयप्रथमार्द्धस्य पञ्चमे दशति द्वितीये मन्त्रे 'सूर्यम्'-इत्यनवग्रहीत मेव पठितम् , परं तत्रैवानुपदं षष्ठे अवग्रहीतं 'सु । जर्यस्य'-इति । एवं मित्रशब्दोऽपि द्राभ्यां मेकतश्च निरुक्तः— "मित्रः , प्रमीतेस्त्रायते सन्मित्रान्नो द्रवतीति वा मेदयतेर्वा"-इति (१०. २. ८.) । अतएव बह्वृचां "प्रेष्ठं वो अतिथिं सुषे (ऋ० सं० ६. ६. ५. १.)" -इत्यस्य पदपाठे 'मित्रम्'-इत्यनवग्रहीतं श्रूयते ; छन्दःपदसंहितायान्तु तत्रैव मन्त्रेऽवग्रहीत मेव 'मि । त्रम्'-इति (सा० छ० प० १. १. १. ५) । पुत्रशब्दोऽप्येव मेव द्राभ्यां मेकतश्च निरुक्तः— "पुत्रः , पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा"-इति (२. ३. २.) । अतएव बह्वृचाम् "इन्द्र क्रतुं न आभर (ऋ० सं० ५. १. २१. ६.)"-इत्यस्य पदपाठे 'पुत्रेभ्यः'-इत्यनवग्रहीतं श्रूयते ; छन्दःपदसंहितायां तु तत्रैव मन्त्रेऽवग्रहीत मेव 'पु । त्रेभ्यः'-इति (सा० छ० प० १. २. २. ७.) । सखिशब्दस्तु यास्केन द्विर्निरुक्तः , परिशिष्टेऽप्येवात्र (७. ७. ८ ; ११. १. १३ ; २. ११.) परं समाननामोपपदात् ख्यातेरित्येकविध एव सर्वत्र ; तथा च तत्पदपाठे खल्ववग्रहेणैव भवितव्यम् ; न च तथा दृश्यते बह्वृग्ग्रन्थेषु । तथाहि— "इमं स्तोम मर्हते (ऋ० सं० १. ६. १०. १.)"-इत्यस्य पदपाठे 'सख्ये'-इत्यनवग्रहीत मेव श्रूयते ;—छन्दःपदसंहितायान्तु तत्रैव मन्त्रेऽवग्रहीतं 'स । ख्ये'-इति (सा० छ० प० १. १. २. २. ४.) । वस्तुतः सर्वत्र पदकारानभिप्रायबोधोऽयमेव दुरूह एव ; क्रमकारास्तु तदनुगताः, जटादिपाठाश्च तन्मूलका एव । बह्वृच तु सामपदसंहिताया मनवग्रहीत मपि बह्वृचां पदपाठेऽवग्रहीत मेवाश्रीयते । तथाहि—

"अग्ने बृहद् महाए असि (ऋ० सं० ३. ५. ९. १.)"-इत्यस्य बह्वृक्पदपाठे 'देव ऽयुम्'-इत्यवग्रहीतम् ; छन्दःपदपाठे तु 'देव-युम्'-इत्यनवग्रहीत मेव (सा० छ० प० १. १. ३. ४.)। एवम् "इन्द्र मिहेवतातये (ऋ० सं० ५. ७. २५. ५.)"-इत्यस्य बह्वृक्-पदपाठे 'देव ऽतातये'-इत्यवग्रहीतम् ; छन्दःपदपाठे तु 'देवता-तये'-इत्यनवग्रहीत मेव (सा०छ०प० ३.२.१.७.) स्थित मिति।

(१४) यदि क्वचिद् वेदव्याख्याने प्रामाणिकानां व्याख्यातृणां मतान्तरता लक्ष्येत, तत्र विनिगमनाविरहात् सर्वेषा मेव मतानां मादरोऽस्माकं कर्त्तव्य एवेत्यपि निदर्शितम्। तथथा— ऋक्-संहिताया: पदकार: शाकल्यो नाम ऋषि: ; सामवेदीयाया-श्छन्दोनामसंहिताया: पदकार ऋषिर्गार्ग्यो नाम च ; तदेतावु-भावेव प्रामाणिकौ वेदव्याख्यातारौ ;— एतयोरनुगता: क्रमादि-कारास्तातुर्न्नादिग्रन्थकारास्तावश्यं प्रामाणिका एवेत्त्र च नैवास्ति संशय:। अस्ति चैको मन्त्रो "यदिन्द्र चित्र मेहनास्ति" -इति ऋक्संहितायाम्, छन्दःसंहितायाञ्च। तत्र ऋक्पद-ग्रन्थे, तदनुसृतेषु क्रमग्रन्थादिषु च यदवगम्यते 'मेहनास्ति'-इति पदद्वयम् ; तदेव छन्दःपदग्रन्थे, तदनुसृतेषु सामग्रन्था-दिषु क्रमग्रन्थादिषु चाख्यायते पदचतुष्टयत्वेन ; तदेष द्विविध एव पदच्छेदोऽभ्युपेयोऽस्माभिर्विनिगमनाविरहादिति बोधयितु मुक्तम्, —"मेहनास्ति ०—० मंहनीयं धनम् अस्ति यत्, म इह नास्तिति वा त्रीणि मध्यमानि पदानि"-इति (४. १. ४.)। अत्रेतदपि परि-ज्ञातम्— संहितामेदजात: पाठभेदोऽभ्यवश्य मभ्युपेय इति। यथा — "यदिन्द्र चित्र मेहनास्ति"-इति ऋक्पाठ: (४. १. १०. १.) ; "यदिन्द्र चित्र म इह नास्ति"-इति तु सामपाठ: (४.२.१.४.)।

(१५) मन्त्रद्रष्टृणा ऋषीणां रचनाविधिष्वपि लक्ष्यः सर्वथा स्थापनीयो वेदार्थबुभुत्सुभिरित्यपि ध्वनितम् । तद्यथा— "अभ्यासे भूयांस मर्थं मन्यन्ते,— यथाहोदर्शनीयाहोदर्शनीयेति ; तत् परुच्छेपस्य शीलम् ; परुच्छेप ऋषिः (१०. ४. ५.)"–इत्यादि ।

(१६) मन्त्रार्थं निर्ब्रुवता प्रकरण मप्युपेक्षितव्य मिति च ध्वनितम्— "उप प्रागात् सुमन्मे धायि मन्म ०—० इत्याख्यमेधिको मन्त्रः (६. ४. ७.)"–इत्येवमादिभिः ।

(१७) मन्त्राणां व्याख्यावैविध्यस्वामानि तेन बहुत्र । तद्यथा— "इत्यधिदैवतम् , अथाध्यात्मम्"–इति ३. २. ६, "इत्यधियज्ञम् , अथाधिदैवतम्"–इत्यादि ११. १. ४ । तदेवं क्वचित् क्वचिदेकस्यैव शब्दस्य त्रिविधं व्याख्यान मपि कृतं यथा— सोमशब्दस्यैकत्र ओषधिः , चन्द्रमास्येत्येतावर्थौ कृतौ (११. १. ४.), अन्यत्र (१३. २. १२.) तस्यैव सोमशब्दस्य सूर्यः आत्मा चेत्यर्थौ स्वीकृताविति । तथाचात्र ओषध्यर्थस्त्वधियज्ञः , चन्द्रसूर्यार्थावधिदैवतौ, आत्मरूपार्थस्त्वध्यात्म इति विवेकः । एषु त्रिविधव्याख्यानेषु अधिदैवतस्यैव प्राधान्यं ध्वनित मेतत्प्रथमपरिशिष्टे— "यां यां देवतां निराह तस्यास्तस्यास्तादात्म्याय मनुभवत्यनुभवति"–इति (१३. १. १३.) । एवञ्च पदार्थविज्ञान मेव निरुक्तास्य प्रधानं फल मिति च ज्ञापितम् । अन्यत्रान्यथापिसस्य विज्ञानप्रियता ज्ञापिता । तथाहि— "नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया"–इति २. १. ६ ।

(१८) कालभेदतो देशभेदतश्च नामभेदादीन्यपि सभाव्यानीति चेह ज्ञापितानि । तद्यथा – "आर्जीकीयां विपाडित्याहुः । ०—० । पूर्वं मासीदुरच्छिरा"–इति (८. ३. ५.) । "विजामातेति ब्रह्मदत्तिपाजाः क्रौतापति माचक्षतेऽसुसमान

इव वरोऽभिप्रेतः"–इति च (६. २. ६.)। "गर्त्तारोहिणीव धनलाभाय दाक्षिणाजी (२. १. ५.)"–इत्येवमादीनि च।

(१९) मन्त्राणामुत्पत्तिबीजान्यपि बोधितान्येतेन। तथाहि—

"अथापि स्तुतिरेव भवति नाशीर्वादः,— 'इन्द्रस्य नु वीर्याणि प्र वोचम्'–इति, यद्येतस्मिन् सूक्ते (ऋ० सं० १. ३२.)। 'अथाप्याशीरेव न स्तुतिः,–'सुवर्चा अहमग्नीभ्यां भूयासं सुवर्चा सुखेन सुवृत्कर्णाभ्यां भूयासम्'–इति,तदेतद्बहुलमाध्वर्यवे याज्ञेषु च मन्त्रेषु।

"अथापि शपथाभिशापौ ,— 'अथा सुरीय यदि यातुधानो अस्मि ०–० अधा स वीरैर्दशभिर्वि यूया:'–इति (७. १०४. १५.)।

"अथापि कस्यचिद् भावस्याचिख्यासा,— 'न मृत्युरासीदमृतं न तर्हि', 'तम आसीत्तमसा गूळ्हमग्रे"–इति (१०.१२९.२,३.)। "अथापि परिदेवना कस्याचिद् भावात् ,— 'सुदेवो अद्य प्रपतेदनावृत्', 'न वि जानामि यदि वेदमस्मि'–इति (१०.८५; १.१६५.)।

अथापि निन्दाप्रशंसे — 'केवलाघो भवति केवलादी', 'भोजस्येदं पुष्करिणीव वेश्म'–इति (१०. ११७. ६ ; १०७. १०.)।

एवं मन्त्रसूक्ते (१०. ३४. १३.) द्यूतनिन्दा च ऋषिप्रशंसा च। एवं सुखावबोधाभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति॥"–इति (७.१.३.)

(२०) अपि मनुष्याणां मेधाध्ययनादितपःप्रभावाद्दर्शित्वं साध्यमिति चाख्यातम्। "तद् यदेनांस्तप्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्, तद्दर्शनाय ऋषीत्वम्"–इत्येवमादिभिः (२. ३. २.)। परिशिष्टेऽपि तथा "मनुष्या वा०–० यद्वै किञ्चानूचानोऽभूदित्यार्षं तद् भवति"–इति (१३. १. १३.)।

(२१) मन्त्राणां मुत्पत्तौ हि बहुत्र सांसारिकघटनादीनामपि हेतुत्वं निरूपितम्। तथथा— "त्रितं कूपेऽवहितं देवासो अप्तं सूक्तं

प्रतिबभौ (४. १. ६.)"–इति, "इदञ्च मेऽदादिदञ्च मेऽदादित्यृषिः प्रसञ्जायाह (४. २. ७.)"–इति, "ऋषिपुत्रा विलपितं वेदयन्ते (५. १. २.)"–इति च। तथाच यद्यपि सायणादिमते सर्व एव मन्त्रा यज्ञसम्पादनायैव दृष्टाः, परं यास्कमते तु नैव सर्वेषां यज्ञसम्पादनायैवोत्पत्तिरित्यपि सुव्यक्तम्।

(२२) वेदार्थबोधस्यातिदुरूहत्व मपि वर्णितम्। तथथा— "अप्येकः पश्यन्न पश्यति"–इत्यादि (१. ६. ३.); एवमन्यत्रान्यत्रापि। परिशिष्टेऽपि "यस्तन्न वेद कि मृचा करिष्यति (१३. १. १०.)"–इति, "अयं मन्त्रार्थचिन्ताभ्यूहः"–इत्यादि, "तस्मात्तपसा पारमीप्सितव्यम्"–इत्यादि च (१३. १. १२, १३.)।

(२३) अयोग्यपात्रायोपदेश्यदान मपि निषिद्धं यास्केन। तथाहि— "नैकपदानि निर्ब्रूयान्नावैयाकरणाय नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातृविज्ञानेऽसूयोपसन्नाय तु निर्ब्रूयाद् यो बालं विज्ञातुं स्वाध्यायिने तपस्विने वा"–इति (२.१.६.)।

(२४) मन्त्राणां दैवतनिर्णयस्य दुरूहत्वं वेदार्थबोधगर्वस्याकर्तव्यत्वमेतेनैतदपि दृष्टान्तप्रदर्शनेन दृढ़ीकृतम्। तथथा— "शाकपूणिः समस्तयाज्ञके सर्वा देवता जानामीति। तस्मै देवतोभयलिङ्गा प्रादुर्बभूव। तां न जज्ञे। तां पप्रच्छ विविदिषाणि त्वेति। सास्मा एतामृचं मादिदेशैषा मदेवतेति"–इति (२.२.४.)।

इह हि निरुक्तवचने यदस्ति 'देवतोभयलिङ्गा'–इति, तस्य उभयविधलिङ्गयुक्तत्वं यस्या मन्त्रदेवतायाः, तादृशी उभयलिङ्गा मन्त्रदेवता 'प्रादुर्बभूव' तत्प्रत्यक्षतामापदित्यर्थः। यस्य मन्त्रस्य देवतानिर्णये लिङ्गद्वयहेतुकः संशयो भवेदेव, तादृशं मन्त्रैकं स समाश्रित्यैवेत्यभिप्रायः। श्रूयते च तथा तत्र तदुदाहृते,

पूर्वार्द्धारम्भे 'सः' इति कर्तृपदम्, उत्तरार्द्धारम्भे 'सा'–इति कर्तृपदश्चेतीत्थं तन्मन्त्रदेवता पुंस्त्वस्त्रीत्वोभयविधलिङ्गयुक्तेत्यतः तस्य मन्त्रस्य का देवता ? इत्येवं संशयः सम्भवेदेव। एतादृशसंशयस्यापाकरणन्तु तत्तन्मन्त्रार्थालोचनयैव भवितव्य मित्यभिप्रायेणोक्तं 'तां पप्रच्छ'–इत्यादि। सम्यगालोचिता सती तादृशी ऋगेव स्वयं स्वदेवता मभिव्यनक्तीति तात्पर्यम्। तदुदाहृता ऋगेषा ऋ० सं० १. १६४. २८ (निरु० २. २. ५.)। अपि वा 'देवतोभयलिङ्गा' इत्येकं पदम्, ऋगेव तस्य वाच्योऽर्थः; तादृशी ऋक् तत्स्मृतिपथ मारूढेति भावः। 'सा' ऋक् 'एता मृच मादिदेश' स्वात्मानं प्रकाशितवती; पुनः पुनः चिन्तान्दोलनेन तादृगर्थस्तन्मनसि स्फुटं प्रतिबभावितिं भावः। सत्येवं सैव ऋक् कथितवतीव 'एषा' स्त्रीपुंस्वरूपा उभयात्मिका वस्तुतः एकैव 'मद्देवता' मम देवतेति यावत्।

(२५) वेदार्थविषये बहुत्र संशयस्यावश्यम्भाविता च दर्शिता तेन। तद्यथा— "पूषा त्वेतश्यावतु (ऋ० सं० ७. ६. २३. ३.)"–इत्येतस्या ऋचो व्याख्यानावसरे स्वकण्ठरवेणैवोक्तम्— "स त्वेतेभ्यः परि ददत् पितृभ्य इति सांशयिकस्तृतीयः पादः। पूषा पुरस्तात् तस्यान्वादेश इत्येकम्, अग्निरुपरिष्टात् तस्य प्रकीर्त्तनेत्यपरम्"–इति (७. ३. २.)।

(२६) वैदिकोपाख्यानाना मुपमादिमूलकत्ववर्णनेनावास्तविकत्व मपीह प्रतिपादितं बहुत्र। तद्यथा— "तत् को वृत्रः ? मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः; अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"–इति (२. ५. २.)। तदेवमादीतिहासस्यातात्त्विकत्वं स्फुटम्।

(२७) मन्त्रेषु श्रुता: खस्रादिसम्बन्धिशब्दा अपि साहचर्यादिमूलका गौणार्था एव, न तु मुख्यार्था इति चेह बहुत्रावेदितं तेन । तथथा— "उषस मस्य (आदित्यस्य) खसार माह,— साहचर्याद्रसहरणाद्वा (१. ३. ४.)"–इति, "पिता दुहितुर्गर्भ माधात् (ऋ० सं० १. २६४. ३३.) ०—० पिता = पालयिता ०—० पर्जन्य: पृथिव्या:"–इत्यादि च (४. ३. ५.) ।

(२८) मीमांसायन्थेषु यथा ब्राह्मणग्रन्थप्रोक्ताना मपि प्रावाहणिरित्येवमादीनां सर्वेषा मेव सञ्ज्ञापदानां यौगिकत्वं तथा कल्पितव्यक्तिवाचकत्वञ्च सिद्धान्तितम् , नात्र तथा ; इह तु प्रकृतव्यक्तिनामानि वस्तुनामान्यपि श्रूयन्ते मन्त्रेष्वपीति सूचितम् , तत् किं मन्त्रभाष्यरूपेषु ब्राह्मणवाक्येष्विति स्फुटम् । तथथा— "स्थूरं राध: शतास्रं कुरुङ्गस्य दिविष्टिषु"–इति मन्त्रस्य (ऋ०सं० ५. ७. ३३. ४.) व्याख्यानायोक्तम्— "कुरुङ्गो राजा बभूव ; कुरुगमनाद् वा कुलगमनाद्वा"–इति (६. ४. ८.), एवं "बतो बतासि यम"–इति मन्त्रस्य (ऋ० सं० ६. ७. ८. ३.) व्याख्याने श्रुतम्— "लिबुजा ब्रततिर्भवति (६. ५. ५.)"–इत्यादि ।

(२९) वस्तुतत्त्वनिर्णयाय ब्राह्मणवचनान्यपीह बहून्युद्धृतानि ; तथथा— "षष्टिञ्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन", "सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन (४. ४. ६.)" –इत्येवमादीनि ।

(३०) प्रसङ्गसङ्गत्या बहूनां ब्राह्मणवचनाना मेकदेशस्खलितया अप्रामाण्यञ्चेह दर्शितम् । तथथा— "बहुभक्षिवादीनि हि ब्राह्मणानि भवन्ति"–इत्यादि (७. ७. १.) द्रष्टव्यम् ।

(३१) वेदानां प्रामाण्यं तु हृदयेनैवाङ्गीकृतमासीत्तस्य खलु भगवतो यास्कस्य। अतएवोक्तम्— "आम्नायवचनाद्हिंसा प्रतीयेत"–इति (१. ५. २.), "आम्नायवचनादेतद् भवति (७. ७. १.)"–इत्यादि च।

(३२) एवं वैदिकवचनेषु तस्य अतिशयश्च गम्यते। तदुक्तम्— "यथो एतदविस्पष्टार्था भवन्तीति, नेष स्थाणोरपराधो यदेन मन्धो न पश्यति, पुरुषापराधः स भवति"–इति (१. ५. २.)।

(३३) परलोकास्वीकारकारिणां निन्दाप्यत्र वर्णिता। तथया— "किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम्। आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन् रन्धया नः। (३. ३. २१. ४.)"–इत्येतन्मन्त्रव्याख्याने श्रुतम्— 'किं ते कुर्वन्ति कीकटेषु गावः, कीकटा नाम देशोऽनार्यनिवासः; कीकटाः किं कृताः किं क्रियाभिरिति प्रेक्षा वा। नैव चाशिरं दुग्धे न तपन्ति घर्मं हिंस्यं माहर नः प्रमगन्दस्य धनानि। मगन्दः कुसीदी याज्ञदो मा मागमित्यतीति च ददाति तदपत्यं प्रमगन्दोऽत्यन्तकुसीदिकुलीनः, प्रमदको वा, योऽय मेवास्ति लोको न पर इति प्रेक्षुः, पण्डको वा, पण्डकः पण्डगः प्राईको वा प्राईयत्याण्डावाण्डावाणी इव क्रीडयति तस्मभे; नैचाशाखं नीचाशाखो नीचैःशाखः; शाखाः शक्नोतेराशिरराद्वात् तस्मो मघवन् रन्धयेति रध्यतिर्वधगमने'–इति (६. ६. ४)।

(३४) मन्त्रकाल-प्रचलिताः सामाजिकव्यवहारकथाख्याता इह प्रतीयन्ते क्वचित् क्वचित् प्रसङ्गतः। तथया— "स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः; पुंसोऽपीत्येके"–इति। एव मौरसभिन्नानां पुत्राणां समाश्रयश्च चाह— "अन्योदर्यो मनस्यपि

न मस्त्यो ममाय मिति"–इति (३. १. ३.) । "रामा रमणायो-पेयते न धर्माय ; क्षणजातोया"–इति च (१२. २. २.) ।

अत्र यदुदाहृतं पूर्वसंस्करणे—"देवरः कस्मात् ? हितीयो वर उच्यते"–इति , तद् भ्रान्त्यैव ; प्राचीनतमपुस्तके तथापाठानु-पलम्भेः, विधवेतिपूर्वपदनिर्वचन मङ्गत्वेव देवरपदनिर्वचनस्यायुक्तत्व-प्रतीतेः, किञ्च तत्रैव ततः किञ्चिदुत्तरम् "देवरो दीव्यतिकर्म्मा"–इति देवरनिर्वचनश्रुतेः, 'कुहस्विद् दोषा'–इत्येतन्निगमस्य चान्य-विधार्थावभासाच्च । तथाहि "कनीयसा ज्यायांस मुपमिमीते'–इति स्वोक्तस्योदाहरणभूतैषा ऋगुद्धृता यास्केन (३. ३. ३.)—

"कुहस्विद् दोषा ? कुह वस्तोरश्विना ?
कुहाभिपित्वं करतः ? कुहोषतुः ? ।
को वां शयुत्रा विधवेव देवरम् ?
मर्यं न योषा कृणुते सधस्थ आ ? ॥"(१०. ४१. २.)

अस्या यास्कसम्मतोऽर्थ एवः ;— हे 'अश्विना' अश्विनौ सूर्या-चन्द्रमसौ ! उपलक्षणञ्चैतत् पान्थयोः , हे पान्थौ ! दीर्घाध्वभ्रमण-कारिणौर्युवयोः , 'दोषा' रात्रिः 'कुहस्विद्' क्वातीता ? अपि वा 'दोषा' रात्रौ क्व भवथः ? एवं 'वस्तोः' दिवा 'कुहस्विद्' ? 'कुहाभिपित्वं करतः' क्व अभिप्राप्तिं भोजनस्य कुरुथः ? 'कुहोषतुः' क्व वसथः विश्रामाय ? किञ्च 'वां' युवयोः 'शयत्रा' शयने 'देवरं' बालकं पतिभ्रातरं प्रति 'विधवा' पतिहीना भ्रातृजाया इव 'कः' पुरुषः सङ्केतं शयूषेत ? अपि 'योषा' स्त्री 'मर्यं' युवानं स्वपतिम् 'न' इव 'सधस्थे' सहस्थाने 'आ कृणुते' आकुरुते, को जन इति शेषः । तदेव अत्र, किञ्चिदुद्दिश्यं साधयितुं बहुदूर-गामिनः पान्थस्य अहर्निशयोर्गमनागमने प्रति दृष्टिर्न युज्यते ,

नापि भोजनविश्रामयोः, न च स्वापशूषणयोरित्युपदेशो व्यक्तः। कुमारं देवरं प्रति भ्रातृजायायाः स्नेहातिशय्यप्रयुक्तः पालनभावः, पतिं प्रति स्त्रियाश्च प्रेमप्रणोदितालभावश्चेत्येतावपि नैसर्गिकाविति चेह द्योतितम्। न हि विवाहितपतिभ्रातृका विधवेत्युच्येत, नापि विवाहितभ्रातृजायोऽपि स्याद् देवरः। मिथोऽविवाहितयोरेव विधवादेवरयोरेवात्र मन्त्रे शयनस्थितिर्वर्णितेति चेत्, तत् किं प्रेम्णा, वात्सल्येन वा ? आद्ये वेदस्य व्यभिचारवर्णनदोषः स्यादनिवार्यः, अन्त्ये तु स्वीक्रियते "देवरः कस्मात् ? द्वितीयो वर उच्यते"-इत्येतन्निर्वचनस्यानोल्लेखः कुतो न प्रमत्तगीतता मयादिति पक्षपातशून्यैः सुधीभिरेवार्य्यैराकलयता मिति।

(३५) पापपुण्ययोश्चात्र निदर्शनान्युपदिष्टानि दिक्प्रदर्शनेन। तद्यथा— "न पापा मन्यामहे ;— नाधनाः, न ज्वलनेन हीनाः; अस्त्यस्मासु ब्रह्मचर्यं मध्ययनं तपो दानकर्म इत्यृषिरवोचत्"-इति (६. ५. २.), "सप्त मर्यादाः कवयश्चक्रुः। तासा मेका मप्यधिगच्छंस्त्रंहस्वान् भवति ;— स्तेयम्, तल्पारोहणम्, ब्रह्महत्याम्, भ्रूणहत्याम्, सुरापानम्, दुष्कृतस्य कर्मणः पुनः पुनः सेवाम्, पातके नृतोद्य मिति"-इति (६. ५. ४.), "ब्राह्मणाय बुभुक्षितायौदनं देहि, स्नातायानुलेपनम्, पिपासते पानीयम् (७. ३. १०.)"-इत्येवमादि च।

(३६) आब्रह्मस्तम्बपर्यन्तानां सर्वेषा मेव पदार्थाना मिह देवत्वेश्वरत्वीकृतम्। तथाहि— "यत्काम ऋषिर्यस्यां देवतायां मार्थपत्य मिच्छन् स्तुतिं प्रयुङ्क्ते, तद्देवतः स मन्त्रो भवति"-इति (निरु० ७. १. १.), "यो देवः सा देवता"-इति च (७. ४. २.)। "देवो दानाद्वा, दीपनाद्वा, द्योतनाद्वा, द्युस्थानो

भवतीति वा"–इति देवशब्दनिर्वचनञ्च तत्रैव । द्युशब्दश्चात्र नभोमण्डलमात्रस्योपलक्षकः ; एवं हि अन्तरिक्षस्थानां, सौरजगद्दर्शिभूतानां ध्रुवादीनाञ्च ग्रहण मिह सिध्यति । तदेव मिन्द्रवाय्वादीनामचेतनानां वृष्ट्यादिदानहेतुकम्, याजावरराजादीनां चेतनानां चार्थादिदानहेतुकं देवत्वम् ; अग्न्वादिजीवानां मजीवानाञ्च द्यावादीनां दीप्तिहेतुकं देवत्वम् ; अग्निचन्द्रपर्जन्यादीनां ब्रह्मवर्चस्विनां विदुषाञ्च द्योतनहेतुकं देवत्वम् ; सूर्यसूर्यकरादीनां तदुपरिस्थानां तारकादीनाञ्च द्युस्थत्वनिबन्धनं देवत्वम् ; यत्र खीश्वरे सर्व एवैते गुणा उपपद्यन्ते ; तस्य देवत्वस्य तु कैव कथा । तदेव मात्रह्मस्तम्बपर्यन्तानां सर्वेषा मेव पदार्थानां देवत्व मुपगम्यते । द्युस्थत्वे सति दानादिगुणवत्त्व मिद मेक मेव देवलक्षणं स्वीकार्य मिति मते तु सूर्येन्द्राग्न्यनिलेन्दुप्रभृतीनां मूलतो भमण्डलस्थाना मेव पदार्थानां मुख्यं देवत्वम्, तत्तत्स्थानभक्तिसाहचर्यतस्त्वन्येषां भूरादिलोकानां तत्स्थाना मग्न्यसोमौषध्यादीना मपीत्येव विशेषः ।

तथाचोक्तं यास्केन—"तिस्र एव देवता इति नैरुक्ताः । अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः"–इति (७. २. १.), "तासां [तिसृणां देवतानां] भक्तिसाचर्यं व्याख्यास्यामः । अथैतान्यग्निभक्तीनि—अयं लोकः ०—० ये च देवगणाः समाम्नाताः प्रथमे स्थाने"–इत्यादि (७. ३. १.) च । तानि च प्रथमे स्थाने समाम्नातानां देवानां नामानि निघण्टावाम्नातानि—"अग्निः अक्रुनिः मरुत्वान्"–इत्यादीनि (५. ३. १–३६.) षट्त्रिंशत् द्रष्टव्यानि । व्याख्याताश्च ता देवता निरुक्ते समन्त्रोदाहरणम्—"अथ यानि पृथिव्यायतनानि स्तुतिं लभन्ते, तान्यतोऽनुक्रमिष्यामः। तेषा मग्निः प्रथमागामी भवति"–इत्यादिना (८. १–४३.) । एवम्

"अथैतानीन्द्रभक्तीनि अन्तरिक्षलोकः ०—० ये च देवगणाः समाम्नाता मध्यमे स्थाने"–इत्यादि चोक्तं तत्र तदुत्तरम् (७. ३. ३.)। मध्यमे स्थाने समाम्नातानां देवानां नामानि च तत्रैव निघण्टौ— "श्येनः सोमः चन्द्रमाः"–इत्यादीनि षट्त्रिंशत् (५. ५. १—३६.)। व्याख्याताश्च ता अपि देवता निरुक्ते समन्त्रोदाहरणम्— "श्येनो व्याख्यातस्तस्यैषा भवति"–इत्यादिना (११. १—५०.)। एवम् "अथैतान्यादित्यभक्तीनि असौ लोकः ०—० ये च देवगणाः समाम्नाता उत्तमे स्थाने"–इत्यादि चोक्तं तत उत्तरम् (७. ३. ४.)। उत्तमे स्थाने समाम्नातानां देवानां नामान्यपि तत्रैव निघण्टौ — "अश्विनौ उषाः सूर्या"–इत्यादीनि एकत्रिंशदाम्नातानि (५. ६. १—३१.)। व्याख्याताश्च ता अपि देवता निरुक्ते समन्त्रोदाहरण मेव— "अथातो द्युस्थाना देवतास्तासां मध्यिनौ प्रथमागामिनौ भवतः"–इत्यादिना (१२. १—४६.)। तदेवं प्रधानतो देवतात्रित्वेऽपि स्थानभक्त्यादितो तद्बहुत्वं च न विरुद्धम्। तत एवेदं मुक्तं तत्र तेनैव— "तासां (तिसृणां देवतानां) माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि"–इति (७. २. १.)। भागो विभागो भक्तिश्चैकार्थाः। महाभागस्य भावो माहाभाग्यम्। तच्च माहाभाग्यम् एकस्थानभाक्तेन, एकस्मिन् मन्त्रे साहचर्यतयाम्नातत्वेन, एककर्मभाक्तेन, एकवाच्यभाक्तेन च भवति। तस्मान्माहाभाग्यादेव देवबहुत्वं स्वीकार्यमिति तदर्थः। तस्मात् वैदिकमन्त्रेषु स्तुता एव पदार्थाः तन्मन्त्रतः स्तुतिकाले एव च देवत्वेन स्तुत्या भवन्ति; नान्ये नाप्यन्यत्रेत्येव वैदिकसिद्धान्तः। अत एव ते मन्त्रमयी देवतेत्येव स्वीकुर्वन्तीति च प्रवदन्ति याज्ञिकाः।

तदेवं देवाना मसङ्ख्येयत्वेऽपि दाशतय्यां प्रधानतया अग्नि-वायविन्द्रसूर्याणां स्तुत्यादिदर्शनात् त एव चत्वारो देवा मुख्या गण्यन्ते ; तत्रापीन्द्रस्य वायुादिविशेषत्वेनैवाभ्युपगमात् देवतात्रित्व मेव सम्पद्यते । तदेव मत्र पृथिव्या मग्निरेव मुख्यो देवः , जलादयस्तदेकस्थानास्त्वप्रधानाः , मण्डूकादयश्चेतना दृषदादयोऽचेतनाश्च पारिभाषिकाः । अन्तरिक्षे वायुर्वेन्द्रो वा मुख्यो देवः , पर्जन्यादयस्तदेकस्थानास्त्वप्रधानाः , श्येनादयोऽन्तरिक्षचराश्चेतना वाणादयोऽचेतनाश्च पारिभाषिकाः । द्युलोकेऽप्येवं सूर्यो मुख्यः , अश्विप्रभृतयस्तदेकस्थानास्त्वप्रधानाः , पारिभाषिकदेवास्तु तत्र नैव सन्तीति गम्यते ; ब्राह्मणग्रन्थेषु तत्रत्यानां तथाविधाना मनुल्लेखादिति ॥

(३७) देवतानां पुरुषाकारादिचिन्तनस्यातात्त्विकत्वेहोपन्यस्तम् "अथाकारचिन्तनं देवतानाम्"–इत्येवमादिभिः (७. २. २, ३.) । —तदत्र पारिभाषिकदेवत्व मापन्नाना मण्डूकशकुन्यादीनाश्चेतनानाम् , अणीध्रवाणादीना मचेतनानाञ्च देवशरीरवत्त्वं कलत्रापत्यादिमत्त्वं रागद्वेषादियुक्तत्वञ्च नास्तीति तु लाङ्गलस्कन्ध-पांशुलपादुकेर्ष्यालिकैरप्यभिगन्तुं शक्यते , मुख्यदेवाना मग्न्यादीनां तु तत्तदस्ति नास्ति वेति संशय: स्यादवेदविदुषां बालानाम् ; पौराणिका एव ह्येतत्संशयस्योत्थापकाः । वस्तुतो यथा पारिभाषिकदेवानां प्रत्यक्षदृश्यानां सर्वत्र सर्वैर्व्यवहार्याणा मिन्द्रादीनां देवशरीराद्यभाववत्त्वेऽपि देवत्वं भवत्येवोररीकार्यम् , मुख्याना मग्न्यादीना मपि देवानां नूनं तथैव ; यास्कोक्ततत्तन्नामनिर्वचनस्थाननिर्देश-कर्मनिरूपणोत्पत्तिवर्णनेभ्यस्तथैव प्रतीतेः , ब्राह्मणविहिताग्निप्रणयनादीना मत्रैवोपपत्तेः , तत्तन्मन्त्रेष्वपि तादृशार्थ-

प्रतिपादकवर्णनश्रुतेः, सोदाहरणदेवलक्षणान्यतमस्मृतितोऽपि तथैवावगतेः, दृष्टैरेवैतैरुपपन्ने यज्ञादौ यज्ञादिफले चैषा मदृष्टविग्रहादिमत्त्वकल्पनानौचित्याच्चेति। तदेतत्पक्षहेतुवर्णन मस्मत्कृतादैतरेयालोचनादवगन्तव्यम् (ऐ० आलो० २ सं० १६२—१७८पृ०) ॥

(३८) पितृणाञ्च त्रैविध्य मेवेष्टं यास्कस्येति गम्यते। तथाहि —"पितरो व्याख्यानास्तेषा मेषा भवति"–इत्युक्त्वैव,

"उदीरता मवर उत् परास
उन्मध्यमाः पितरः सोम्यासः।
असुं य ईयुरवृका ऋतज्ञास्
ते नोऽवन्तु पितरो हवेषु"–इति (१०. १५. १.),

एषा ऋगिह उदाहृता तेन, व्याख्याता च सा एवम्—"उदीरता मवर उदीरतां पर उदीरतां मध्यमाः पितरः सोम्याः सोमसम्पादिनस्तेऽसुं ये प्राण मन्वीयुरवृका अनभित्राः सत्यज्ञा वा यज्ञज्ञा वा ते न आगच्छन्तु पितरो ह्वानेषु"–इति (११. २. ६.)।

तथाच तस्या ऋच एषोऽर्थः सम्पद्यते— "हवेषु" 'ह्वानेषु' अस्मदाह्वानेषु सत्सु "ते" 'पितरः" पितृगणाः "नः" अस्मान् "अवन्तु" 'आगच्छन्तु'। ते कीदृशाः ? इत्याह— "ये" "असुं" 'प्राणम्' "ईयुः" 'अन्वीयुः' प्राप्तवन्तः, पूर्वं प्राणान्विता आसन्निति यावत्। तत्र जीवितकाले "अवृकाः" 'अनभित्राः' सर्वत्र सर्वदैव साधुव्यवहारतः अभित्रशून्याः, "ऋतज्ञाः" 'सत्यज्ञा वा यज्ञज्ञा वा' कर्त्तृतया कारयितृतया वा यज्ञानुष्ठानविदः, "सोम्यासः" 'सोम्याः = सोमसम्पादिनः' च आसन्निति। ते च कतिविधाः ? इत्याह—"अवरे", "परासः" 'परे, "मध्यमाः" चेति त्रिविधाः। तत्र, 'परे' द्युस्थानरिक्षचारिणः, "ये चेमेऽरण्ये श्रद्धा तप इत्युपा

सते"-इत्यादिना छान्दोग्ये (५. १०. १, २.) वर्णिताः देवयानमार्गेण सूर्यलोकं गताः ; 'मध्यमाः' द्यावापृथिव्यावन्तरेण स्थायिनः, "य इमे ग्राम इष्टापूर्ते दत्त मित्युपासते"-इत्यादिना छान्दोग्ये (५. १०. ३-६.) वर्णिताः पितृयानमार्गेण चन्द्रलोकं गताः ; 'अवरे' भूपृष्ठखान्तरिक्षचारिणः, "अथैतयोः पथोर्न कतरेण च"-इत्यादिना छान्दोग्ये (५. १०. ८.) वर्णिताः पृथिव्या मेव निरन्तरावर्त्तिनः। तदेषां त्रिविधानां पितृणां मध्ये येऽवरास्तेषा मप्राप्तमार्गाणा मसकृदावर्त्तित्वेन क्वचिदपि दीर्घकालस्थितिसम्भावनाभावात् न पितृलोकस्थत्वम् ; ये परास्तेषा मप्यनावर्त्तित्वश्रुतेस्तथात्व मेव ; ये तु मध्यमाश्चन्द्रलोकं पितृलोकं वा गताः, तेषा मेव स्वस्थानस्थत्वेन प्राधान्य मिष्टम्। अतएव अन्तरिक्षस्थानेष्वेव पठितं पितर इति पदम्। यास्केनाप्युक्तम्— "माध्यमिको यम इत्याहुस्तस्मान्माध्यमिकान् पितॄन् मन्यन्ते"-इति (११. २. ५, ६.)। 'स हि तेषां राजेति'-इति च तत्र दीर्गा हुक्तिः। "परेयिवांसं प्रवतो महीरनु"-इत्यादिसूक्तद्वये (ऋ०मं०१०.१४, १५.) यमस्य पितृराट्त्वं पितॄणां स्वरूपञ्च सुव्यक्त मिति दिक्। किञ्चिद्विशेषतोऽप्युक्त मैतरेयालोचने ८८पृ० १८पङ्क्तेः ९१पृष्ठं यावत्।

(३९) ईश्वरशब्दार्थस्त्विहैकत्रैव मन्त्रे द्विविध उपन्यस्तः। तद्यथा— "ईश्वरः सर्वेषां भूतानां गोपायिताऽऽदित्यः"-इत्यादिः, "ईश्वरः सर्वेषा मिन्द्रियाणां गोपायिताऽऽत्मा"-इत्यादिश्च (१. २. ६.)। तत्र यद्यपि जड़ात्मकस्य आदित्यस्य, चैतन्यात्मकस्य जीवात्मनश्चेश्वरत्व मुपपन्नम्, तथापि तयोर्जडाजड़योराश्रयतया जीवकतया शक्तिप्रदत्वेन चेतद्विलक्षणोऽप्यस्ति कश्चिदिति चाकथित मपि गम्यत एव। स एव परमेश्वर इति, परमात्मा इति, पर-

ब्रह्मेति च सर्वैर्गीयते। एवञ्चेह जगति जडः, आत्मा, परमात्मा चेति त्रय एव मूलपदार्था इत्येव निश्चयम्। वस्तुतोऽस्य हि परमात्मनो विशेषनामरूपाभावात् सर्वाश्रयत्वात् सर्वव्यापकत्वात् सर्वान्तर्यामित्वकत्वाच्च सर्वरूपैः सर्वनामभिश्चोपास्यत्व मेवार्य-सम्मतम्। अत एव यथाप्रयोजनं जडस्याजडस्य च स्तुतिरुपपद्यते। अत एवैवं श्रूयते (ऋ० सं० १. १६४. ४६.)—

"इन्द्रं मित्रं वरुण मग्नि माहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वान माहुः"—इति। तदुव्याख्याने चाहायमपि— "एक मात्मानं बहुधा मेधाविनो वद-न्तीन्द्रं मित्रं वरुण मग्निं दिव्यं च गरुत्मन्तम्"—इति (७. ४. ५.)। पुनरप्युक्त सूर्यमार्गगतिप्रकरणे— "अथैतं महान्त मात्मान मेष-र्ग॰ प्रवदन्तीन्द्रं मित्रं वरुणमग्नि माहुरिति"—इति (१४.२.१.)।

(४०) पुरुषशब्दनिर्वचनावसरे श्रौपनिषदं ब्रह्मज्ञान मपि प्रदर्शितं किञ्चित्। तथाहि (२. १. ५.)— "पुरुषः = पुरिषादः, पुरिशयः ; पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुष मभिप्रेत्य,

"यस्मात् परं नापर मस्ति किञ्चिद्,
यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चिद्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकम्,
तेनेदं पूर्णं पुरुषेण सर्वम्"—इत्यपि निगमो भवति"—इति। एष मन्त्रः श्वेताश्वतरोपनिषदि (३. ९.) दृश्यते, वस्तुतः श्वेता-श्वतरसंहितातस्तत्र समुद्धृत एवाय मित्येव यास्केन निगम इतीह प्रदर्शितः ; न हि मन्त्रातिरिक्तस्य निगमत्वेनाख्यानं तस्य भगवतः क्वचिदपीत्युक्तं पुरस्तादिति।

(४१) विज्ञानान्यपीह प्रसङ्गतो बहूनि प्रदर्शितानि। तानि यथा—

(घ) "षड् भावविकारा भवन्तीति वार्ष्यायणिः ;--जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति । जायत इति पूर्वभावस्यादि माचष्टे, नापरभाव माचष्टे, न प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम् । विपरिणमतइत्यप्रच्यवमानस्य तत्त्वादिकारम् । वर्धत इति स्वाङ्गाभ्युच्चयं सांयोगिकानां वार्थानां वर्धते विजयेनेति वा वर्धते शरीरेणेति वा । अपक्षीयतइत्येतेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीत्यपरभावस्यादिमाचष्टे, न पूर्वभावमाचष्टे न प्रतिषेधति । अतोऽन्ये भावविकारा एतेषा मेव विकारा भवन्तीति ह स्माह ; ते यथावचन मभ्यूहितव्याः"-इति भावविज्ञानम् १. १. ३, ४ ।

(ङ) "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृती भाष्यन्ते दमूनाः क्षेत्रसाधा इति; अथापि नैगमेभ्यो भाषिका उष्णं घृत मिति ; अथापि प्रकृत एवैकेषु भाष्यन्ते विकृतय एकेषु , शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते ०—०, विकार मध्यार्येषु शव इति ; दातिर्लवणार्थे प्राच्येषु दात्र मुदीच्येषु"-इति भाषाविज्ञानम् २. १. ३, ४ ।

(च) "साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्समाम्नासिषुर्वेदञ्च वेदाङ्गानि च"-इति वेदवेदाङ्गाद्युत्पत्तिविज्ञानम् १. ६. ५ ।

(छ) "पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे"-इति प्रसङ्गतः समासतो वेदफलविज्ञानम् १. १. २ ।

(ज) "नाकः= क मिति सुखनाम , तत्प्रतिषिद्धं प्रतिषिध्यते । 'न वा अमुं लोकं जग्मुषे किञ्च नाकम्' (तुप्तशाखीयमन्त्रः) । न वा अमुं लोकं जग्मुषे किञ्च नासुखम् ; पुण्यकृतो ह्येव तत्र गच्छन्ति"-इति स्वर्गविज्ञानम् २. ४. २ ।

(ऐ) "नरकं = न्यरकं, नीचैर्गमनं, नास्मिन् रमणं स्थान मस्य मय्यस्तीति वा"–इति नरकविज्ञानम् १. ३. ६ ।

(ओ) "एकः इता सङ्ख्या, द्वौ द्वुततरा सङ्ख्या, त्रयस्तीर्णतमा सङ्ख्या, चत्वारश्चलिततमा सङ्ख्या, अष्टावश्नोतेः, नव न वननीया नावाप्ता वा, दश दस्ता दृष्टार्था वा, विंशतिर्द्विदशतः, शतं दश-दशतः, सहस्रं सहस्रदृ, अयुतं नियुतं प्रयुतं तत्तदभ्यस्तम्, अर्बुदो मेघो भवत्यरण मम्बु तद्दोऽम्बुमङ्गातीति वाम्बुमङ्गवतीति वा, स यथा महान् बहुभवति वर्षंस्तदिवार्बुदम्"–इति (३. ३. ४), "पञ्च पृक्ता सङ्ख्या"–इति (३. २. २), "सप्त सृप्ता सङ्ख्या"–इति (४. ४. ५.) च सङ्ख्याविज्ञानम् ।

(औ) द्वादशादित्यवर्ष्मनतोऽहोरात्रकालांशविज्ञानं यथा—"सविता ०---० तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मि-र्भवति"–इत्याद्युक्तः प्रथम आदित्यः (१२. २. १.) ।

"भगः, तस्य कालः प्रागुत्सर्पणात्"–इत्याद्युक्तो द्वितीयः ।

"सूर्यः, सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा"–इत्याद्युक्तस्तृतीयः ।

'स पुनरयं भगकालात् सृतः सूर्यो भवति'–इति तत्र दीर्घा वृत्तिः ।

"अथ यद्रश्मिषोषं पुष्यति, तत् पूषा भवति"–इत्याद्युक्तश्चतुर्थः ।

"अथ यद् विषितो भवति, तद् विष्णुर्भवति"–इत्याद्युक्तः पञ्चमः ।

"विश्वानरः [प्रत्यृतः सर्वाणि भूतानि ७. ६. १.]"–इत्याद्युक्तः षष्ठः ।

"वरुणः [वृणोतीति सतः १०. १. ३.]"–इत्याद्युक्तः सप्तमः ।

"केशी, केशा रश्मयस्तद्वान्"–इत्याद्युक्तोऽष्टमः ।

"अथ यद्रश्मिभिरभिकम्पयतेति"–इत्याद्युक्तो वृषाकपिर्नवमः ।

'वर्षिता चावश्यायानां कम्पनश्च भूतानाम्'–इति तद्वृत्तिः ।

"यमः [यच्छतीति सतः १०. २. ६.]"–इत्याद्युक्तो दशमः ।

"अजएकपाद्, अजनः एकः पादः ; एकेन पादेन पातीति वैकेन पादेन पिबतीति वैकोऽस्य पाद इति वा"–इत्याद्युक्त एकादशः । 'समुद्रः [समुदन्त्येऽस्मिन् भूतानि २.३.१.]"–इत्याद्युक्तो द्वादशः । तदेव मेकस्यैव सूर्यस्य अहोरात्रकालविभाजकत्वेन सवित्रादीनि द्वादश नामानीत्युक्तं कालविज्ञानम् ।

(क) "शिर आदित्यो भवति , यदनुशेते सर्वाणि भूतानि मध्ये चैषां तिष्ठति । इद मपीतरच्छिर एतस्मादेव ; समाश्रिता-न्येतदिन्द्रियाणि भवन्ति"–इति आदित्यस्थितिविज्ञानम् ४. २. ५ ।

(ख, ग) "तत् सूर्यस्य देवत्वं तन्महित्वम् , मध्ये यत् कर्मणां क्रियमाणानां वितनं संक्षियते । यदासावयुक्त हरणानादित्यरश्मीन् हरितो ऽवानिति वा । अथ रात्री वासस्तनुते सिमस्मै, वेसर महरवयुवती सर्वस्मादपि वोपमार्थे स्याद्वाचीव वासस्तनुत इति"–इति सौराकर्षणविज्ञानम् ,रात्रिविज्ञानञ्च ४. २. ३ ।

(घ) "यद् वर्षन् पातयत्युदकं रश्मिभिस्तत् प्रत्यादत्ते"–इति, "रश्मिर्यमनात्"–इति च रश्मिविज्ञानम् ५. ३. ७; २. ५. १ ।

(ङ) "अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते । तदेतेनो-पेक्षितव्यम् । आदित्यतोऽस्य दीप्तिर्भवतीति । 'सुषुम्णः सूर्य-रश्मिश्चन्द्रमा गन्धर्वः'–इत्यपि निगमो भवति (वा० सं० १८. ४०) ; सोऽपि गौरुच्यते , 'अत्राह गोरमन्वत'–इति (ऋ० सं० १८४. १५) । अत्र ह गोः समभंसतादित्यरश्मयः स्वं नामा-पीत्य मपचित मपगत मपिहित मन्तर्हितं वामुत्र चन्द्रमसो गच्छे"–इति (२. २. २ ; ४. ४. ४.) ज्योत्स्नाविज्ञानम् ।

(च) "नाक आदित्यो भवति ; नेता भासां , ज्योतिषां प्रणयः"–इति अहन्यन्यज्योतिरदर्शनहेतुविज्ञानम् २. ४. २ ।

(छ) "सप्त युञ्जन्ति रथ मेकचक्रम्
एको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्र मजर मनर्वं
यत्रेमा विश्वा भुवनानि तस्थुः"

–इति ऋ० सं० १. १६४. २ । अत्राहैवं यास्कः— "सप्त युञ्जन्ति रथम् 'एकचक्रम्' एकचारिणम् ०—० ; 'एको अश्वो वहति सप्तनामा' आदित्यः ; सप्ताऽस्मै रश्मयो रसानभिसन्नामयन्ति , ०—० । संवत्सरप्रधान उत्तरोऽर्द्धः । 'त्रिनाभि चक्रं' वृतुः संवत्सरो यौष्मो वर्षा हैमन्त इति ०—० । 'अजरम्' अजरणधर्माणम् , 'अनर्वम्' अप्रत्यृत मन्यस्मिन् । यत्रेमानि सर्वाणि भूतान्यभि सन्तिष्ठन्ते"–इत्यादि सौरजगद्विज्ञानम् ४. ४. ६ ।

(ज) "अन्तरिक्षं कस्मात् ? अन्तरा खान्तं भवति, अन्तरेमे इति वा, शरीरेष्वन्तरक्षय मिति वा"–इति (२. ३. १.), "पुष्कर मन्तरिक्षं पोषति भूतानि"–इति चान्तरिक्षविज्ञानम् ५. ३. ७ ।

(झ) "ऋबीस मपगतभास मपहृतभास मन्तर्हितभासं गतभासं वा"–इति (६. ६. ७) , "प्रथनात् पृथिवीत्याहुः क एना मप्रथयित्यत् किमाधारश्चेति , अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः"–इति च (१. ४. ३.) पृथिवीविज्ञानम् ।

(ञ) "आपः आप्नोतेः (८. ३. ५.)"–इति , "आपोऽपि काष्ठा उच्यन्ते काक्ष्वा स्थिता भवन्तीति स्थावराणाम् ; अस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः"–इति चाप्विज्ञानम् २. ५. १, २ ।

(ट) "तत्र समुद्र इत्येतत् पार्थिवेन समुद्रेण सन्दिह्यते । समुद्रः कस्मात् ? समुद्रवत्यस्मादापः , समभिद्रवन्त्येन मापः ,

सम्मोदन्तेऽस्मिन् भूतानि, समुदको भवति, समुनत्तीति वा तयोर्विभागः। तत्रेतिहास माचक्षते,— देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः"-इत्याद्युदधिविज्ञानम् २. ३. १।

(ठ) "उर्वश्यप्सरा। उर्वमश्नुते ०—० अप्सरा अप्सारिणी, अपि वाऽप इति रूपनाम। 'दृष्टं खलु ब्राह्मणा दैव्येन विघ्नेदेवाः युष्करे खाददन्त (ऋ०सं०७.३३.१.)"-इत्यादि विद्युद्विज्ञानम्।

(ड) "विद्युत्र या पतन्ती ०—० प्रोर्वशी तिरते दीर्घमायुः"-इति ऋ० सं० १०. ९६. १०। अस्या ऋचो व्याख्याने उक्तम्— "अथोर्वशी प्रवर्द्धते दीर्घमायुः"-इति ११. ४. २। 'उर्वशी' मेघोत्था 'विद्युत्' विद्युदिव, शारीर-वैद्युतिकाग्निः- (जीवनी अग्निः) 'प्रतिरते' प्रवर्द्धयते 'दीर्घमायुः' इति तदर्थः। तदिदं शारीरविद्युद्विज्ञानम्।

(ढ) "विकर्त्तनेन मेघाना मुदकं जायते०—० हाहुबूकं वहतः पुरीषम् वायुरादित्या उदकम्"-इति वृष्टिविज्ञानम् २. ६. ५।

(ण) "क्व खिदस्याः (माध्यमिकाया वाचः) परमं जगाम? (ऋ० सं० ८. १००. १०.) इति। यत् पृथिवीं गच्छतीति वा यदादित्यरश्मयो हरन्तीति वा"-इति ११. ३. ७। एतदेवेहोदकमानसाध्यहेतुविज्ञानम्।

(त) "अय स्रपन्ति पृथिवी मनूपाः (ऋ० सं० १०. २७. २३.)। पर्जन्यो वायुरादित्यः, शीतोष्णवर्षैरोषधीः पाचयन्ति। 'मनूपाः' अनुस्रपन्ति लोकान्स्वेन स्वेन कर्मणा"-इत्यन्नोत्पत्तिविज्ञानम् २. ६. ५।

(थ) "अय मग्निरोजसा बलेन मथ्यमानो जायते; तस्मादेन माहु सहसस्पुत्रं सहसो यजुम्"-इति पार्थिवाग्निविज्ञानम् ८.१.३।

(द) "ससं न पक्वं मविदच्छुचन्तम् (ऋ० सं० १०. ३९. १.) । स्वपन मेतन्माध्यमिकं ज्योतिरनित्यदर्शनं तद्विवाविदज्ञाज्ञाय-मानम् । 'हिता च सत्ता स्वधया च गम्भुः' (ऋ० सं० ३. १७. ५.) । हिधं सत्ता मध्यमे च स्थाने उत्तमे च । 'गम्भुः' सुखभूः" --इति माध्यमिकाग्निविज्ञानम् ५. १. ३ ।

(ध) "हिमेनाग्निं घ्रंस मवारयेथाम् ,
पितुमतीं मूर्ज्जं मस्मा अधत्तम् ।
ऋवीसे अत्रि मश्विनावनीतम् ,
उन्नित्यथुः सर्वगणं स्वस्ति"
–इति ऋ० सं० १. ११६. ८ ।

हे 'अश्विनौ !' युवां ग्रीष्मान्ते 'हिमेन' वर्षशैत्येन, 'घ्रंसम्' अहो-नुभूतम् 'अग्निं' तापम् 'अवारयेथाम्', 'पितुमतीम् 'अन्नवतीं च 'ऊर्ज्जम्' 'अस्मै' अग्नये 'अधत्तम्', योऽयम् 'ऋवीसे' पृथिव्याम् अग्निः अन्तरौषधिवनस्पतिषु तम् 'सर्वगणं' सर्वनामानं 'अत्रिम्' अग्निम् 'उन्नित्यथुः' । 'स्वस्ति' स्वस्त्ययनायास्य जगतः । "यद् दृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्याम् , तदश्विनो रूपम् ; तेनैतौ स्तौति"–इत्यश्विनामाहोरात्रहेतुसौराग्निविज्ञानम् ६. ६. ८ ।

(न) "अय मेवाग्निर्वैश्वानर इति शाकपूणिः । विश्वानरा-वित्यप्येते उत्तरे ज्योतिषी । वैश्वानरो ऽयं यत्ताभ्यां जायते । कथं त्वय मेताभ्यां जायते ? इति । यत्र वैद्युतः शरण मभि हन्ति, यावदनुपात्तो भवति मध्यमधर्मेव तावन्नवति, उदकेन्धनः शरीरोप-शमनः ; उपादीयमान एवायं सम्पद्यते । उदकोपशमनः शरीर-दीप्तिः । अथादित्यात् । उदीचि प्रथमसमाहृत्त आदित्ये कंसं वा मणिं वा परिस्मृज्य प्रतिसरे यत्र शुष्कगोमय मसंस्पर्शयन् धारयति,

तत्प्रदीप्यते, सोऽयमेव सम्भ्रियते। अप्येते उत्तरे ज्योतिषी अग्नी उच्येते ७. ४. ३)"–इति वैश्वानराग्निविज्ञानम् ७. ६. ६, ७।

(घ) "योऽनिध्मो दीप्यतेऽभ्यन्तर मप्सु"–इति अपात्रपात्राम-अन्तर्वर्त्तिवाष्पीभूताग्निविज्ञानम् १०. २. ७।

(ङ) "अथास्य कर्म,—वहनञ्च हविषा मावाहनञ्च देवतानां यच्च किञ्चिद् दार्ष्टिविषयक मग्निकर्मैव तत्"–इति पार्थिवाग्नि-कर्मविज्ञानम् ७. ३. १।

(च) "अथास्य कर्म,—रसानुप्रदानं ह्रदबधो या च का च बलकृतिरिन्द्रकर्मैव तत्"–इतीन्द्र-(वायु)-कर्मविज्ञानम् ७. ३. ३।

(छ) "अथास्य कर्म,— रसादानं रश्मिभिश्च रसधारणं यच्च किञ्चित् प्रवच्छिन्न मादित्यकर्मैव तत्"–इत्यादित्यकर्मविज्ञा-नम् ७. ३. ४।

(ज) "अदिति रदीना, देवमाता"–इति ४. ४. १। ततः—

"दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवासति।
अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु"–इति अदितिशब्दस्य निगमं (ऋ०सं०१०.६५.५.) प्रदर्श्य तदुव्याख्यायाम् आह–"अथो 'अर्यमा' आदित्योऽरीन् नियच्छति, 'सप्तहोता' सप्तास्मै रश्मयो रसानभिसन्नामयन्ति सप्तेन मृषयः सुवन्तीति वा, 'विषुरू-पेषु' विषमरूपेषु, 'जन्मसु' कर्मसु उदयेषु। आदित्यो दक्ष इत्याहुः, आदित्यमध्ये च स्तुतोऽदितिर्दाक्षायणी"–इति, पुनः "अदितेर्दक्षो-ऽजायत दक्षाददितिः परि (ऋ० सं० १० ७२. ४.)–इति च। तत् कथ मुपपद्यते? समानजन्मानौ स्यातां मिति, अपिवा देव-धर्मेणेतरेतरजन्मानौ स्याताम्, इतरेतरप्रकृती"–इति ११.१.२। तदिद मेव बीजाङ्कुरन्यायतः सृष्टिविज्ञानम्।

(य) "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यां मुतेमां (ऋ०सं० १०. १२१. १.)। हिरण्यगर्भो हिरण्मयो गर्भोऽस्येति वा ["हिरण्यं कस्मात् ? ह्रियत आयम्यमान मिति वा, ह्रियते जनाज्जन मिति वा, हित-रमणं भवतीति वा, हर्यतेर्वा स्यात् प्रेप्साकर्मणः"-इति २. ३. १.] ०—० समभवदग्रे भूतस्य जातः पतिरेको बभूव। स धारयति पृथिवीं च दिवं च"-इति सौराकर्षणविज्ञानम् १०. २. १०।

(र) "सविता यन्त्रैः पृथिवी मरम्णा दस्कम्भने सविता द्यां मदंहत्।
अस्त्र मिवाधुनदुनि मन्तरिक्ष मतूर्तं बर्हः सविता समुद्रम्" (ऋ०सं० १०.१४९.१.)। सविता यन्त्रैः पृथिवी मरमय दनारम्भणे अन्तरिक्षे सविता द्यां मदंहदस्त्र मिवाधुनदुनि मन्तरिक्षे मेघं बर्ह मतूर्तं बर्ह मतूर्णं इति वाल्वरमाण इति वा सविता समुदितार मिति क मन्त्रं मध्यमादेव मवक्ष्यत्। आदित्योऽपि सवितोच्यते"-इति पृथिव्यादिभ्रमणविज्ञानम् १०. ३. ८।

(ल) "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा, यो देवः सा देवता"-इति (७. ४. २.), "देवा न आयुः प्रवर्द्धयन्तु चिरञ्जीवनाय (ऋ० सं १. ८९. २.)। "विश्वेदेवाः= सर्वे देवाः"-इत्यादि (१२. ४. ५.), "रश्मयोऽत्र देवा उच्यन्ते य एतस्मिन्नधिनिषण्णा इत्यधिदैवतम्, अथाध्यात्मम्०—० इन्द्रि-याण्यत्र देवा उच्यन्ते"-इति च (१३. १. ११.) देवविज्ञानम्।

(व) "अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः (वा० सं १९. ५०.)। ०—० माध्यमिको देवगण इति नैरुक्ताः, पितर इत्याख्यानम्"-इति पितृविज्ञानम् ११. २. ७।

(ग) सप्त ऋषयः प्रतिहिताः शरीरे
सप्त रक्षन्ति सदं मप्रमादम् ।
सप्तापः स्वपतो लोक मीयुस्तत्र जाग्रतो
अस्वप्नजौ सत्रसदौ च देवौ"–इति वा०सं० ३४.५५ ।

अत्र "सप्त ऋषयः प्रतिहिताः शरीरे, रश्मय आदित्ये; सप्त रक्षन्ति सदं मप्रमादं, संवत्सरं मप्रमाद्यन्तः; सप्तापनास्त एव स्वपतो लोक मस्तमितं मादित्यं यन्ति ; तत्र जाग्रतोऽस्वप्नजौ सत्रसदौ च देवौ, वाय्वादित्यावित्यधिदैवतम्"–इति व्याख्याय, पुनरन्यविधं व्याख्यातम्—"अथाध्यात्मम्। सप्त ऋषयः प्रतिहिताः शरीरे, षडिन्द्रियाणि विद्या सप्तम्यात्मनि ; सप्त रक्षन्ति सदं मप्रमादं, शरीरं मप्रमाद्यन्ति ; सप्तापनानीमान्येव स्वपतो लोकं मस्तमितं मात्मानं यन्ति , तत्र जाग्रतोऽस्वप्नजौ सत्रसदौ च देवौ, प्राज्ञश्चात्मा तैजसश्च इत्यात्मगतिं माचष्टे"–इति १२. ४. ३ । वाय्वादित्यशक्तिविज्ञानं द्विविधात्मविज्ञानञ्च ।

(घ) "तेषां मेवापरा भवति (अथ० सं० १०. ४. ८.)—'तिर्यग्बिलश्चमस ऊर्ध्वबुध्नो यस्मिन्यशो निहितं विश्वरूपम् । अत्रासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः"–इति । अत्रापि "तिर्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा यस्मिन् यशो निहितं सर्वरूप मत्रासत ऋषयः सप्त सहादित्यरश्मयः, ये अस्य गोपा महतो बभूवुरित्यधिदैवतम्"–इत्युक्त्वा , ततोऽन्यथाऽप्याह—"अथाध्यात्मम्। तिर्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा यस्मिन् यशो निहितं सर्वरूप मत्रासत ऋषयः सप्त सहेन्द्रियाणि, यान्यस्य गोमृषि महतो बभूवुरित्यात्मगतिं माचष्टे"–इति । सप्तग्रहसम्बन्धाद्ग्रहीणां सप्तत्वम्., चन्द्रार्का सुपग्रहत्वाद् ग्रहग्रहणेनैव

ग्रहणं च सिध्यति। तदिदं सूर्यस्य समग्रहणवन्मनत्वविज्ञानं मात्मनस्य समेन्द्रियवन्मनत्वविज्ञानम्।

(स) "द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति"
–इति ऋ०सं०१. १६४. २०। अत्रैतन्निरुक्तम्—"द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ, दुष्कृतं पापं परिसारक मित्याचक्षते; सुपर्णा सयुजा सखायेत्यात्मानं दुरात्मानं प्रत्युत्तिष्ठति शरीर एव तज्जायते वृक्षं रक्षशरीरं वृक्षं पक्षौ प्रतिष्ठापयति; तयोरन्यद् भुक्तान्न मन श्नन्नन्यात् सरूपतां सलोकता मश्नुते य एवं विद्वान्मनश्नन्नन्यो-ऽभिचाकशीतीत्यात्मगति माचष्टे"–इत्यात्महृदयविज्ञानम् १३.४.२.।

(ह) "हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः।
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे"–
इति ऋ० सं० १० ७१. ८। अत्रैतन्निरुक्तम्— "हृदा तष्टेषु मनसां प्रजवेषु यद् ब्राह्मणाः संयजन्ते समानाख्याना ऋत्विजोऽत्राह त्वं विजहुर्वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिरोहब्रह्माण जहब्रह्माण जह एषां ब्रह्मेति वा"–इति ब्रह्मविज्ञानम् १३. १. १३.।

वस्तुतो निरुक्तप्रणयनकालेऽपि तदानीन्तनविपश्चितां हृदयेष्वेवं वैज्ञानिकभावा देदीप्यमाना आसन्, यत्—

"समान मेतदुदक मुच्चैत्यव चाहभिः।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः"–इति,
ऋगेषा(१. १६४. ५१.) न व्याख्याता यास्केन, उक्तास्तु 'निगद-व्याख्याता'–इति (७. ६. ८.)। निगदेनोच्चारणकालेनैव व्याख्याता अधिगतेति किं मदीयविशेषव्याख्यानेनेति तत्त्वः॥

(४२) 'यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्'-इति च प्रज्ञापितं तेन भगवता यास्केन निगमैकप्रदर्शनेन । तद्यथा—

"ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते"
-इति ऋ० सं० १. १६४. ३९ । "ऋचो अक्षरे परमे व्यवने यस्मिन् देवा अधिनिषण्णाः सर्वे, यस्तन्न वेद किं स ऋचा करिष्यति, यइत्तद्विदुस्त इमे समासत इति विदुष उपदिशति । कतमत्तदेतदक्षरम् ? ओ मित्येषा वागिति शाकपूणिर्ऋचश्च अक्षरे परमे व्यवने धीयन्ते नानादेवतेषु च मन्त्रेषु । एतद्ध वा एतदक्षरं यत्सर्वा त्रयी विद्या प्रतिप्रतीति च ब्राह्मणम्"-इति १३. १. १० ।

(४३) मन्त्रेषु श्रुतानां रूपकाख्यानानां प्रकृतार्थग्रहणनिदर्शनानि चेह बहून्याख्यातानि । तद्यथा (ऋ०सं० १०. १७.२,१)—

"अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णा ददुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहाद्द्वा मिथुना सरण्यूः ॥

अप्यगूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णा ददुर्विवस्वतेऽप्यश्विनावभरद्यदासीदजहाद् द्वौ मिथुनौ सरण्यूः । मध्यमं च माध्यमिकां च वाच मिति नैरुक्ताः, यमं च यमीं चेत्येतिहासिकाः । तत्रेतिहास माचक्षते,— त्वाष्ट्री सरण्यूर्विवस्वत आदित्यायमौ मिथुनौ जनयाञ्चकार, सा सवर्णा मन्यां प्रतिनिधायाश्वं रूपं कृत्वा प्रदुद्राव, स विवस्वानादित्य आश्व मेव रूपं कृत्वा तां मनुरेव सम्बभूव, ततोऽश्विनौ जज्ञाते, सवर्णायां मनुः । तदभिवादिन्येषमर्थमुदाहरति (ऋ० सं० १०. १७. १.)—

"त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश"-इति ।

मन्त्रद्वयसंयुतस्यास्य कल्पितोपाख्यानस्य बीजत्वादेतत् — "रात्रिरादित्यस्य ; आदित्योदयेऽस्तमेतीयते"–इति १२. १. १०, ११।

(४४) सामाजिककर्त्तव्योपदेशायात्रातस्य कल्पितोपाख्यानस्य तत्त्वनिर्णयाय तत्तन्निगूढव्याख्याप्रकाशे यत्नो यद्यपि न दृश्यते यास्कस्य, परं तत्कृतात् तत्तत्कल्पनाबीजनिर्देशादेव प्रतीयते तत्तन्निगूढार्थोऽपि स्फुटम्। तादृशकल्पितोपाख्यानस्य कल्पितत्वबोधने यत्नो धीमद्भिः अप्रयोजनीय इत्येव तत्र तदुपेक्षाबीजम्। एवञ्च यास्ककालं यावदपि नैतादृग् बुद्धिमान्द्यं सञ्जातं आर्याणां यत् तत्तत्कल्पितोपाख्यानानां कल्पितत्वबोधनेऽपि यत्नः कर्त्तव्यः स्यात् कस्यापीति तत्तद्बीजमात्राख्यानेनैवाभवत् कृतकृत्यमन्यो भगवान् यास्कः। तद्यथा, अस्त्येकं सूक्तं चतुर्दशर्गात्मकं दाशतय्या दशमे मण्डले दशमम्; तत् सर्वं मेव सायणाचार्येण यमयमीसंवादपरं व्याख्यातम्, अत एव तन्मतः प्रसिद्धश्च तत् सम्प्रति। अन्यन्मते तु तत्सूक्तीयाः कतिचिदेवर्चो यमयमीसंवादपराः, नैव सर्वाः। तस्यैतस्य सूक्तस्य तिस्र ऋच उद्धृता इह निरुक्ते त्रिषु (४. ३. ४ ; ६. ५. ५ ; ११. ३. १३.)। ता इमाः—

"आ घा ता गच्छानुत्तरा युगानि, यत्र जामयः कृणवन्नजामि।
उप बर्बृहि वृषभाय बाहुम्, अन्यमिच्छस्व सुभगे पतिं मत्॥
यतो यतासि यम नैव ते मनो हृदयञ्चाविदाम।
अन्या किल त्वां कक्ष्येव युक्तं परिष्वजाते लिबुजेव वृक्षम्॥
अन्यं मू षु त्वं यम्यन्य उ त्वां परिष्वजाते लिबुजेव वृक्षम्।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम्"

अत्रोपसंहारवचन मेव माह यास्कः— "यमी यमं चकमे तां प्रत्याचचक्षेत्याख्यानम्"–इति (११. ३. १३)। यमपदार्थनिर्णये

तूक्तम्— "यमो यच्छतीति सतः ०—० अग्निरपि यम उच्यते" –इति (१०. २. ६, ७.)। "अग्निर्वाव यमः इयं (पृथिवी) यमी"–इति तै० सं० ३. ३. ८. ३। शतपथे चैव मेव ६. २. १. १०। एवञ्चेह पृथिव्या मन्त्रे: सर्वदा सर्वत्र विद्यमानत्वेन भ्रातृभगिनीभावस्त्वनयोर्मन्तव्यो न तु दाम्पत्यभावः; सति हि दाम्पत्यभावे अग्नेरालिङ्गनेन सर्वा पृथिवी विदग्धैव। अतोऽग्निना प्रत्याख्याता पृथिवी पर्जन्येन विवाहिता; तदेव श्रूयते— "पिता दुहितुर्गर्भं माधात्"–इति ऋ० सं० १. १६४. ३३। उक्तञ्च तत्र यास्केन 'पर्जन्यः पृथिव्याः'–इति (४.३.५.)। पिता=पालयिता, दुहिता=दूरे हिता, पर्जन्यकर्तृकं वृष्टं रेतः=उदकं, पृथिवीकर्तृकं तस्य धारणं, ततश्चौषध्याद्युत्पत्तिः प्रत्यक्ष मेव। यच्च श्रूयते ऽत्र 'उत्तरा युगानि'–इति, तत् प्रलीनकालीनानि बोध्यानि। प्रलीनकालस्य चैतत्कालसाम्यं मन्तव्यम्; अहोरात्रयोः कालसाम्यादिदर्शनात्। तत एवाह मनुः (१. ७३.)— 'तद्वै युगसहस्रान्तं ब्राह्मं पुण्य महर्विदुः। रात्रिञ्च तावतीं मेव तेऽहोरात्रविदो जनाः'–इति।

(४५) एतद्वितीयपरिशिष्टे बहवो दार्शनिकभावाश्च विद्यन्ते। तद्यथा— "आकाशगुणः शब्दः"–इत्येवमादयः (१२. २. ४.)।

(४६) तत्रापि साङ्ख्याना मादरातिशयो गम्यते। "अथैष महानात्मा त्रिविधो भवति— सत्त्वं रजस्तम इति (१३. १. ३.)" –इत्येवमादयो द्रष्टव्याः।

(४७) पुनर्जन्मविवेकश्चाख्यातः, तत्र च साङ्ख्ययोग मिति स्पष्ट मभिहितम्। "मृतस्याहं पुनर्जातः"–इत्यादि, "शुभाशुभं कर्मैतच्छरीरस्य प्रमाणम्"–इत्यत्रत्च द्रष्टव्यम् (१३. २. ६.)।

(४८) तत्रैव शारीरिकतत्त्वानि च कानिचिदभ्युक्तानि। "अष्टोत्तरं सन्धिशत मष्टाकपालं शिरः सम्पद्यते षोडश कपालानि नव स्नायुशतानि (१३. २. ७)"-इत्येवमादीनि।

(४९) "ब्रह्मा देवानां, पदवीः कवीनाम्, ऋषिर्विप्राणां, महिषो मृगाणाम्। श्येनो गृध्राणां, स्वधितिर्वनानां, सोमः पवित्र मत्येति रेभन्"-इति ऋ० सं० ९. ९६. ७।

अस्य मन्त्रस्य द्विविधं व्याख्यान मकारि परिशिष्टकृता यथा— "एष हि 'ब्रह्मा' भवति 'देवानां' देवनकर्मणा मादित्यरश्मीनाम् ०—० इत्यधिदैवतम्। अथाध्यात्मम्,— अय मपि 'ब्रह्मा' भवति 'देवानां' देवनकर्मणा मिन्द्रियाणाम्०—०। आत्मगति माचष्टे"-इति (१३. २. १३)।

(५०) ब्रह्मवर्णनञ्चात्रैकत्र कृतं निगमप्रदर्शनेन यथा(ऋ०१०.८२.७.)

"न तं विदाथ य इमा जजानान्यद्युष्माक मन्तरं बभूव।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति॥

न तं विद्यया विदुषो य मेवं विद्वांसो वदन्त्यन्तरं ब्रह्मणस्ति मन्यद् युष्माक मन्तर मन्यदेषा मन्तरं बभूवेति। नीहारेण प्रावृतास्तमसा जल्प्या चासुतृप उक्थशासः प्राणं सूर्यं यत्यगामिनश्चरन्ति। अविद्वांसः खेचरा मनुष्यवदन्ति। अथाहो विद्वांसः खेचरोऽनुकल्पते। तस्य तपसा सहाप्रमाद मेत्यथाप्त्यो भवति। तेनासन्तत मिच्छेत्तेन सख्य मिच्छेदेष हि सखा श्रेष्ठः सञ्जानाति भूतं भवद्भविष्यदिति। घ्राता कस्माज्जायते: सखा कस्मात्सख्यते: सह भूतेन्द्रियैः शेरते महाभूतानि सेन्द्रियाणि प्रज्ञया कर्म कारयतीति। तस्य यदाप: प्रतिष्ठाशील मुपशम आत्मा ब्रह्मेति स ब्रह्मभूतो भवति साक्षिमात्रो व्यवतिष्ठतेऽवस्थो ज्ञानकृतः"-इति १३. २. १०।

(५१) परिशिष्टश्चेतदुपसंहृतं मोक्षविज्ञानात्मपरमपुरुषार्थाख्यानेनातिमधुरेण। तथथा— "देवानां नु वयं जाना"–इति, "नासदासीन्नो सदासीत् तदानीम्"–इति च (ऋ० सं० १०. ७२. १—९; १२९. १—७.)। "सैषाब्रह्मजिज्ञासा, सैषा सर्वभूतजिज्ञासा, ब्रह्मणः सारिष्टं सरूपतां सलोकतां गमयति य एवं वेद"–इति (१३. ४. ९.)।

अथात्र किञ्चिद् ब्रूमः।— यदुक्तं पुरस्तात् (२५५ पृ०) "सरूपतां सलोकतां मश्नुते य एवं विद्वान्"–इति, तत्तात्पर्यं त्वेवं स्यात्— 'यः' पुरुषः 'एवं विद्वान्' "द्वा सुपर्णा सयुजा (ऋ०सं० १.१६४.२०)"–इत्यस्य मन्त्रस्यार्थविद् भवति, स नूनं जीवात्मपरमात्मनोरुभयोरेव चैतन्यत्वेनैकरूपत्व मवगम्य 'सरूपताम्' आत्मनो ब्रह्मसमानरूपत्वम् 'अश्नुते' लभते, किञ्चोभयोरेवैकवृक्षस्थत्व मवगम्य 'सलोकतां' एकलोकस्थायित्व मपि 'अश्नुते' लभते। लाभोऽत्र बुद्धिभ्रमाद् स्थितपदार्थे पुनर्दृष्टिक्षेपज इव; यथा स्वस्कन्धस्थां गात्रमार्जनी मनवेक्षमाणस्य कालान्तरे भवत्येवेति। अथात्रोपसंहारवचने यदस्ति सारिष्ट मित्यधिकं पदम्, तस्यास्ति सार्ष्टि मिति पाठान्तरत्व। सार्ष्टिपदस्य निर्वाण मिति व्याख्यान मकारि भागवतटीकायां श्रीधरस्वामिना। निर्वाणन्तु न युज्यते नित्यस्यात्मनः कदापि, नापि वेदेषु क्वचिदपि श्रुत मस्ति; बौद्धैरेव प्रथम मुपात्तं जीवस्य निर्वाणम्, तत एव तद् गृहीतं तत्परजैः भागवतप्रभृतिपुराणप्रणेतृभिः। तदेव मिह यद् दृश्यते तदर्थकं सार्ष्टिपदम्, तदेतन्नूनं परतनैः केनचित् निवेशितम्, अथवैतद् द्वितीयपरिशिष्ट मेव स्यादनतिप्राचीन मित्यस्माकम्; 'जातवेदसे सुनवाम'–इति (ऋ०सं०१. ९९. १.) मन्त्रस्य पूर्वोक्ताद्

(७. ५. २.) व्याख्यानात् इहास्य व्याख्यानस्य (१३. ४. ५.) सर्वथा पार्थक्यप्रतीतेः, पौनरुक्त्यदोषापत्तेः, अन्यत्रान्यत्र चेह भाषा-व्याख्यानशैल्यादिभेदावगमादिभ्यश्च।

वस्तुतस्तु "द्वा सुपर्णा सयुजा सखाया"-इति मन्त्रतो यदधिगतं 'दशमस्त्वमसि'-इत्यभियुक्तोक्तिजन्य-भ्रमापनोदनतः समुत्पन्न मिव जीवात्मपरमात्मनोः सायुज्यादिकम्, तदेवान्यथोपबृंहितं पुराणादौ। एवं हि यदस्ति पुराणेषु क्वचित् पञ्चविधस्य क्वचिच्चतुर्विधस्य मोक्षस्य वर्णनम्, तत् सर्वं मेव बालबोधायैव। तद्यथा भागवते—

"सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्व मप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः"-इति।

अस्मिन् श्लोके सार्ष्टीति बौद्धशास्त्रप्रसिद्धं निर्वाणम्। तच्च नित्यस्यात्मनो नैव सम्भाव्य मस्ति, न च सुखाभिलाषिणा मस्माकं प्रार्थनायोग्यम्, नापि वेदबोधित मित्यवधेयम्। एकत्व मपि तथैव। सर्वव्यापिनोऽस्य परमेश्वरस्य सर्वलोके सर्वसमीपे च सर्वदा विद्यमानत्वात् सालोक्य-सामीप्ये त्वप्रार्थिते अपि स्त एव सर्वत्र सर्वेषां मस्माकं मिति किं तयोः प्रार्थनया। सारूप्यवादस्तून्मत्तप्रलापः ब्रह्मणो रूपाभावात्, असङ्ख्येयत्वप्रसङ्गाच्चेति।

तदित्थं सर्वेषां मेव वेदवेदाङ्गानां परमपुरुषार्थोपदेश एव चरम उद्देश्य इति सिद्धम्॥


RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

(१२)

"अथार्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"-इति सायणीयप्रथमलक्षणलक्षितस्य, मूलात्मनिरुक्तस्य, वस्तुतो निघण्टुसमाम्नायस्य टीकाकृतो देवराजयज्वनः, "एकैकस्य पदस्य सम्भविता अवयवार्था यत्र निःशेषेणोच्यन्ते तन्निरुक्तम्" -इति सायणीयद्वितीयलक्षणलक्षितस्य, भाष्यात्मनिरुक्तस्य, वस्तुतो निघण्टुसमाम्नायभाष्यस्य टीकाकृतो दुर्गाचार्यस्य, प्रसङ्गतः सर्ववेदभाष्यकारस्य सायणाचार्यस्य च जीवितकालनिर्णयाय, पाण्डित्यादिवर्णनाय च किञ्चिद् यतामहे ।

तदत्र, निघण्टुटीकाकारस्यास्य देवराजइतिसमाख्यादर्शनादुपलभ्यते रामानुजस्वामिपरभवत्वम्; प्रपन्नामृतादिरामानुजसम्प्रदायीयग्रन्थालोचनतः स्फुटं ह्यवगम्यते प्रथमं रामानुजस्वामिन एवासन्नुपनामानि देवराजो देवमन्नाथो मन्नाथश्चेति त्रीणि; ततः प्रभृत्येव लोके प्रचलिता देवराज इत्यादयः समाख्या इति ।

श्रीवैष्णवसम्प्रदायप्रवर्त्तकस्य तस्य रामानुजस्वामिन आविर्भावसमयस्त्वेवं प्रपन्नामृते (११५ अ० २७ श्लो०)—

"शालिवाहशकाब्दानां तत्राष्टत्रिंशदुत्तरे ।
गते नवशते श्रीमान् यतिराजोऽजनि क्षितौ ॥"-इति ।

रामानुजस्वामिकर्त्तृकं यादवाद्रौ नारायणपुरनिर्म्माणं नारायणप्रतिष्ठापनं च द्वादशाधिकसहस्रशकाब्दातीतेऽभवदिति च ४७अ०—

"शकाब्दे वर्षसाहस्रे गते तद्वादशाधिके ।
ततोऽब्दे बहुधानाख्ये पुष्ये मासि शुभे तदा ॥
शुक्लपक्षे चतुर्थ्यां सुप्रभावपुनर्वसौ ।
आविर्बभूव भगवान् तत्र नारायणो हरिः ॥"-इति ।

तदस्तर्धानप्रकारसमयौ च तत्रैव मुक्तौ [२५, २६ श्लो०]—

"गोविन्दाङ्के निधायाथ शिरः शेते महामनाः।
आम्रपूर्णस्य चोत्सङ्गे सम्प्रसार्याङ्घ्रिपङ्कजे॥
शिष्येषु तेषु सर्वेषु यतीन्द्रस्य जगद्गुरोः।
भृगुवल्लीं ब्रह्मवल्लीं पठत्स्वपि महात्मसु॥
पराङ्कुश-प्रबन्धादीन् प्रबन्ध मखिलं च तम्।
वादकैर्वाद्यमानेषु वाद्येषु निखिलेषु च॥
संस्थाप्य पुरतः पश्यन् महापूर्णस्य पादुके।
ध्यायन् हृदि सदा धीमान् यामुनार्याङ्घ्रिपङ्कजम्॥
शिरःकपालं निर्भिद्य ब्रह्मरन्ध्रेण योगिराट्।
रामानुजो जगामाशु तद्विष्णोः परमं पदम्॥"—इति,

"स विंशत्युत्तरशतं वत्सराणां भुवस्थले।
× × × × ॥
वैकुण्ठ मगमच्छेषो लीलामानुषविग्रहः।
माघशुक्लदशम्यान्तु मध्याह्ने मन्दवासरे॥"—इति च
(६८, ११६अ० २०—२४, ६२—६७ श्लो०)।

यद्यत्रोक्तं रामानुजसम्प्रदायीयदेवराजाख्याप्रचलनात् पर मेव चलितं देवराजनामेत्यनुमानं नानृतं स्यात्, तर्हि सम्भाव्येत नाम — शालिवाहनशकाब्दाना मन्यूनसपाददशशताब्दीगते, विक्रमाब्दानां सार्द्धैकादशशताब्दीगते, खीष्टाब्दानां चैकादशशताब्दीगते च जातोऽयं देवराज इति।

तथेह नैघण्टुकनिर्वचने प्रमाणत्वेनोपन्यस्त सुबटकृतं च वेदभाष्यं दृश्यते बहुत्रैव। उवटेन तु स्वकृतमन्त्रभाष्यावसाने स्फुटं ज्ञापितस्तद्रचनाकालः— "मन्त्रभाष्य मिदं कृतं भोजे पृथ्वीं

प्रशासति"–इति। राजस्थानेतिहासलेखकेन टड्-महोदयेन त्रयो भोजाः परिचायिताः। तत्र प्रथमस्य संवत् ६१४=५५७खी०, द्वितीयस्य संवत् ७२२= ६६५ खी०, अन्तिमस्य तु भोजस्य संवत् १०८२ = १०३५ खी० राज्यारम्भकालो निर्णीतः। तेषां अन्तिम-भोजराज्यकाले एव प्रणीतं तत् मन्त्रभाष्य मिति स्वीकृतेऽपि न हि तद्राज्यारम्भकाले एव प्रणयन मुपगम्यते, नाप्यन्यूनार्द्धशताब्दी मन्तरा तदानीं कस्यचिदपि ग्रन्थस्य सर्वत्र प्रसृतिसम्भवः, प्रामाण्य-तया ग्रहणञ्च भवेदिति तत्रान्यूनाष्टपञ्चाशदङ्का अपि योजनीयाः। तदेवं ११५०-संवत्समातः पर मेव प्रणीत मिदं नैघण्टुकव्याख्यानं देवराजेनेति च प्रतीयते॥

निघण्टुभाष्यरूपस्य यास्कीयस्यास्य निरुक्तस्य ऋज्वर्थाभिधायाः टीकायाः प्रणेता दुर्गाचार्यस्तु नैवात् देवराजयज्वनो नूनं परभवः; देवराजकृतायां नैघण्टुकव्याख्याननामटीकायां क्वापि दुर्गाचार्यस्य तदृग्रन्थस्य वा नामोल्लेखादर्शनात्। अस्ति च नैघण्टुकव्याख्यान-भूमिकायां 'इदञ्च स्वमनीषिकया न क्रियते'-इत्यादिः, 'अतो-ऽस्माभिर्यथामति प्रदर्शितो प्रतिपदनिर्वचननिगमो विद्वांसो बुद्ध्या निरूप्य शुकभाषितवन्मनसि कुर्वन्तु'-इत्यन्तः, प्रमाणपारायण-ग्रन्थसन्दर्भः; यदि नाम दुर्गाचार्यकृता ऋत्सम्मादिता 'ऋज्वर्था' निरुक्तवृत्तिरपि तस्य देवराजयज्वनः परिचिता स्यात्, तर्ह्यवश्यं तत्र तस्यापि स्मरणं गम्येत। ततो ग्रन्थमध्ये ऽपि बहूनां ग्रन्थानां ग्रन्थकर्तॄणां च समुल्लेखो विद्यते, विशेषतः स्कन्दस्वामिकृतस्य निरुक्तभाष्यस्य प्रमाणत्वेनोपन्यासः परिदृश्यते प्रायः प्रतिपदम्; पर मेकत्रापि निन्दासूचेन च नैव स्मृतो लक्ष्यते दुर्गाचार्यस्तदीय एव ग्रन्थो वा। अतो निःसंशय मेवावगम्यते निघण्टुव्याख्याकारो

यज्ञवंशदीपो देवराजो नून ऋज्वर्थारचयितुर्दुर्गाचार्यस्यायजन्मेति। किञ्च निघण्टुटीकायाम्,—'नैगमदेवताकाण्डगतानाञ्च पदानां भाष्यकारेण (यास्केन) निरुक्तानां स्कन्दस्वामिना च तद्व्याख्यातानां प्रक्रिययोन्मीलितव्यम्; बहुश्रुतस्तु नैघण्टुककाण्डनिर्वचनानन्तरं तदुन्मीलयितुन्याय मस्मत्परिश्रमः'-इति लेखात्, 'निगमदेवताकाण्डयोश्च निर्वचनं भाष्यस्कन्दस्वामिभ्यां प्रदर्शितं विशदप्रत्ययाभावात् प्रक्रियां विशदीकृत्य क्रमेण व्याख्यायते। तत्र, निगमव्याख्यानानि यदत्रानुसंहितं तत् तत्रैव द्रष्टव्यम्'-इति नैगमकाण्डीयव्याख्यानोपक्रमवचनाच्च स्फुटं प्रतीयते देवराजीयैतट्टीकाप्रणयनकाले स्कन्दस्वामिकृता निरुक्तटीकैवासीत् सुप्रचलिता; न तु दुर्गाचार्यकृता मत्सम्पादिता ऋज्वर्थेति।

अप्ययं दुर्गाचार्यः स्यात् सर्ववेदभाष्यकृतः सायणतः प्राग्भवः; न हि सायणीयविस्पष्टभाष्यदर्शिनस्तथाविधं जटिलं निरुक्तोदाहृतमन्त्रव्याख्यानं युज्यते। दृश्यते चात्रैकत्र सायणीयरीत्या समुत्कृष्टं तत्कृतं व्याख्यानम्, यथावदुद्धृतञ्च तत् सायणेन स्वकीये बह्वृग्वेदार्थप्रकाशे (ऋ० सं० ७७. २६. १. सा० भा०); उररीकृतञ्च तत् तत्रैव— 'एतत्या व्याख्यानं निरुक्तटीकाया उद्धृतम्'-इति। अतोऽत्र निःसंशय मेव वक्तुं शक्यते, सायणीयाद्वग्संहिताभाष्यात् प्राक् प्रणीतेयं दीर्घा निरुक्तवृत्तिरिति।

सायणाचार्यस्य तस्य परिचयस्तु तदीययज्ञतन्त्रसुधानिधिप्रभृतिग्रन्थभूमिकादिभ्योऽभ्युपेयते एवम्— "वंशे चान्द्रमसे तदन्वयनिधिः श्रीसङ्गमोऽभूत्। तस्मात् प्रादुरभूदभीष्टसुरभिः श्रीबुक्कपृथ्वीपतिः॥ हरिहरनिभो भूमौ कामदोहो जगत्त्राम्, हरिहरनरपालस्तस्य चाभूत् कनिष्ठः। ०—०। तस्याभूदन्वयगुरुः सत्क-

सिद्धान्तदेशतः। सर्वज्ञः सायणाचार्यो मायणार्यतनूद्भवः॥ उपेन्द्रस्येव तस्यासीदिन्द्रः सुमनसां प्रियः। महाक्रतूना माहर्त्ता माधवार्यसहोदरः॥"-इत्यादि। माधवार्यो माधवाचार्य इत्यभिन्नः। तेन स्वकृतव्यवहारमाधवादिग्रन्थभूमिकादौ स्वस्य बुक्कामात्यत्वं स्वकुलवर्णनं चोक्तं विशेषतः। तद्यथा व्यवहारमाधवे— "सत्यैकव्रतपालको द्विगुणधीस्त्रार्थी चतुर्वेदिता, पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्वंसहः। अष्टव्यक्तिकलाधरो नवनिधिः पुण्यद्विशत्प्रत्ययः, स्मार्त्तोच्छायधुरन्धरो विजयते श्रीबुक्कणः क्ष्मापतिः॥ इन्द्रस्याङ्गिरसो नलस्य सुमतिः श्रैव्यस्य मेधातिथिर्धौम्यो धर्मसुतस्य वैष्णनृपतेः सोजा निमेर्योतमिः। प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो वसिष्ठस्य विभोरभूत् कुलगुरुर्मन्त्री तया माधवः॥ ०—०॥ श्रीमती जननी यस्य सुकीर्त्तिर्मायणः पिता। सायणो भोगनाथश्च मनोबुद्धी सहोदरौ॥ यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी। भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः॥"-इति।

तदेव मवमन्यते,— चन्द्रवंशीयस्य श्रीसङ्गमस्य नृपतेः कुलगुरुरासीत् मायणाचार्यः। तस्य राज्ञः सुयोग्यौ पुत्रौ बुक्कहरिहरौ बभूवतुः; मायणस्य च माधव-सायण-भोगनाथास्त्रयः पुत्रा आसन्। तत्र ज्येष्ठस्य बुक्कस्य गुरुरभूत् मायणस्य ज्येष्ठपुत्रो माधवः; कनिष्ठश्च हरिहरस्य गुरुश्चासीत् मायणस्य मध्यमपुत्रो माधवानन्तरजातः सोदरः सायणः। सर्वकनिष्ठस्य भोगनाथस्य तु ताभ्यां मत्सरित्वात्, सर्वकनिष्ठत्वाद्वा बुक्कहरिहरयोर्गुरुत्वालाभादनाश्रयत्वात् नैवाभूत् तथा प्रसिद्धिः, यथा तज्ज्येष्ठयोर्माधवसायणयोः। माधवाचार्यश्च हि बुक्कराजसाहाय्यात् व्यवहारमाधवाधिकरण-

मालादयो ग्रन्थाः प्रणीताः, स्वानुजेन सायणेन च कारितानि वेदभाष्याणि सर्वाणि। सायणाचार्येण तु हरिहरराजसाक्षाद्यात् यज्ञतन्त्रसुधानिध्याद्यः प्रणीताः। यद्यपि शुक्लयजुस्संहिता-भाष्य मथर्वसंहिताभाष्यञ्च हरिहरनरपतेः राज्यकाले एव प्रणीतवान् स सायणः, तथापि स्वायज्ञसोदरस्य आदेशत एव ते अपि प्रणीते इति मन्वानेन तेन न तयोरपि माधवीयत्व मनङ्गीकृतम्।

तदनयोर्माधवसायणयोराश्रयौ यौ बुक्कहरिहरौ राजानौ, तयोस्तु खी० १३४४-समाया मभूच्छासनारम्भ इति निर्णीत मद्यतनीयै-रैतिहासिकैः प्राय ऐकमत्येव। तथाच १४००-संवत्समातः परस्तादेव माधवाज्ञातो सायणेन प्रणीतानि वेदभाष्याणीति च गम्यते स्फुटम्। दुर्गाचार्येण तु सायणीयभाष्यतः प्रागेव निरुक्त-वृत्तिर्निरमायीति च प्रतिपादितं पुरस्तात्। नैघण्टुकनिर्वचन-रचयितायं देवराजस्तु ततोऽपि पूर्वतन इत्यपि निरूपितं प्राक्। तदेव मत्यधिकसार्द्धत्रयोदशसंवच्छताब्दीमध्ये एव समुत्पन्नोऽयं देवराज इत्यपि वक्तुं युज्यते।

तथा शुक्लयजुर्भाष्यप्रणेता महीधरमिश्रः खलु सायणमाध-वयोरग्रज इत्यपि स्याद्युक्तम्; महाराजजयचन्द्रप्रदत्तदानपत्रतो महीधरपौत्रस्य १२३२-संवत्समाया मवस्थित्युपलब्धेः। तथाहि तत्ताम्रशासनत एवेह किञ्चिदुद्धरामः— "यस्योपरिलिखितग्रामौ सजलस्थलौ सलोष्टलवणाकरौ समस्याकरौ सगर्त्तोषरौ सगिरि-गह्वरनिधानौ समधूकाम्रवनवाटिकाविटपद्दण + तिगोचरपर्यन्तौ सोर्द्धाधश्चतुराघाटविशुद्धौ स्वसीमापर्यन्तौ द्वात्रिंशदधिकद्वादश-संवत्सरे भाद्रे मासि शुक्लपक्षे त्रयोदश्यां तिथौ रविदिने अङ्कतो-

ऽपि संवत् १२३२ भाद्रसुदि ११ रवौ अद्येह श्रीमद्विजयवाराणस्यां गङ्गोदकेन स्नात्वा ०—० महापण्डितश्रीमद्दीधरपौत्राय महामिश्र-पण्डितश्रीहालेपुत्राय महापण्डितश्रीकृषिकेशशर्म्मणे ब्राह्मणाय ०—० प्रदत्तो मया"-इत्यादि। मुद्रितश्चैतत्पत्रं ताम्रफलकतः काशीविद्यासुधानिधौ (September, 1869.)। नन्वेवं माहीधर-भाष्यस्य पूर्वपीठिकावाक्यत एव यदवगम्यते माधवीयभाष्यस्य च ततः प्राचीनत्वं "भाष्यं विलोक्यौवटमाधवीयम्"-इति ; अस्य का गतिरिति चेत्, अत्र ब्रूमः— देवराजेनापि दृष्टं प्राचीनतर मेव माधवीयभाष्यं तत्र प्रामाणिकत्वेनोपन्यस्तं महीधरेणेति। दृश्यते हि नैघण्टुकनिर्वचने उद्धृतानां माधवीयभाष्यवचनाना मेक मपि नोपलभ्यते सायणमाधवीयेऽस्मद्दृष्टभाष्ये ; अत आसीदेव तदानीं तद्भाष्यान्तरं माधवीयं नामेत्यत्रास्ति को विचार्यः। वाजसनेयिसंहिताभाष्ये यदवोचन्महीधरेण माधवस्त्वित्यादि (१३. ४५.), तदपि न सायणमाधवीयवचन मिति च ध्येयम्।

तदेवं १२३२-संवत्समायां स्थितस्य कृषीकेशस्य पितामहो महीधरः प्रायो द्वादशशताब्दीचतुर्थपादे (सं०११७६—१२००) प्र-थिनाय वेददीपं नाम शुक्लयजुर्भाष्य मित्यनुमानञ्च भवेन्नासङ्गतम्। तदेतस्मात् शुक्लयजुर्भाष्याच्च प्राचीन मिदं नैघण्टुककाण्डनिर्वचन मिति प्रतीयते ; अत्रोल्लिखितभाष्यनामादिषु माहीधरस्यादर्शनात्। तथाच विक्रमाब्दाना मन्यूनसाहैकादशशताब्द्यसीते द्वादशशताब्दी-चतुर्थपादारम्भाच्च पूर्वं (सं०११५१—११७५) प्रणीत मिदं देव-राजेन नैघण्टुककाण्डनिर्वचन मित्यस्माकम्॥

अथैतन्नैघण्टुककाण्डनिर्वचनभूमिकायाश्चतुर्थपञ्चमश्लोकतः प्रतीयतेऽस्य देवराजस्य पितामहोऽप्यासीद् देवराजनामैव, पिता

च यज्ञेश्वरार्य इति । ततोऽनुमीयते,— बभूव य एको यज्ञवंशीयो विद्वान् यज्ञमूर्त्तिः, काले रामानुजशिष्यत्व मुपगतो देवराज इति प्रसिद्ध, स एवास्य स्यात् पितामहः । तद्यथा— "ततो विद्वान् महान् कश्चित् यज्ञमूर्त्तिरिति श्रुतः । ०—० शिष्यविद्यादिसम्पन्नः संयुक्तोऽप्रतिवैभवः । ०—० आसाद्य रङ्ग-नगरं लक्ष्मणाय त मब्रवीत् । रामानुज ! मया सार्द्धं शास्त्रवादं कुरु स्वयम् ॥ ०—० प्रणम्य लक्ष्मणार्यं च बद्धाञ्जलिपुटोऽब्रवीत् । त्वया जितोऽहं योगीन्द्र ! रक्ष मां शरणागतम् ०—० ज्ञानपुत्रस्य मे चास्य यज्ञमूर्त्तेरिदं मुदा । ०—० देवराजमुनिश्चेति नामा-न्तर मथाकरोत् ॥"–इति प्रपन्नामृते पञ्चविंशषड्विंशाध्याययोर्द्रष्ट-व्यम् । किञ्च तत्रैव प्रपन्नग्रन्थे यज्ञेश्वरसंवादोऽप्यस्ति (२६ अ० १० श्लो०), स एव वास्य पितेति । पितामहपौत्रयोर्नामैक्यं यद्यपि भवितु मर्हत्येव विचारणीयम् : पर मेव मन्यत्रापि दृश्यत इति नासङ्गतम् । तद्यथा— अस्त्येको ग्रन्थो गुणरहस्याख्यः, तत्र न्यायमतानुसृतषट्पदार्थाना मन्यतमो गुणो बोधितः सम्यक् । तस्य चैका टीका विश्रूयते गुणसारमञ्जरीति । तत्प्रणेता किल माधवदेव-पौत्रो माधवदेव एव । तथाहि तद्ग्रन्थीय मिदं पुष्पिकावाक्यम्— "इति श्रीगोदावरीतटविराजमानधारापुरनिवासिमाधवदेवात्मज-लक्ष्मीदेवसूनुकाशीनिवासिमाधवदेवेन गुणरहस्यप्रकाश-गुणसार-मञ्जरी विश्वेश्वरप्रीतये कृता"–इति ।

एवं मङ्गलाचरणपञ्चमश्लोके 'रङ्गेशपुरीपर्येतग्रामवास्तव्यः' –इति लेखदर्शनादवगम्यतेऽयं देवराजो दाक्षिणात्यः ; अस्ति हि रङ्गेशपुरी त्रिशिरपल्लीप्रदेशे कावेर्याः शाखाद्वयेन वेष्टिता प्रसिद्धा ; तस्या एवोपकण्ठे स वसति स्मेति । इय मेव रङ्गेशपुरी पुरा

बभूव रामानुजादीनां श्रीवैष्णवानां प्रधानतो रङ्गभूमिः, तद्-
वाविर्भूतो देवराजो यज्ञवंशजातोऽपि कथं न स्यात् विष्णुपदा-
श्रितः ? अत एव स्मृत मिह प्रसङ्गतस्तेन— 'वाचं गौरिकथालाप-
प्रसङ्गे पुनीमहे–इत्युक्तेः (१. ११. १५)'–इति ।

किञ्च निरुक्त मिति प्रसिद्धे यास्कीये निघण्टुभाष्ये, स्कन्द-
स्वामिकृतायां तट्टीकायाञ्च यथा नैगमदैवतकाण्डघठितानि
पदानि प्रत्येक मुपादाय निरुक्तानि दर्शितनिगमानि च, न तथा
नैघण्टुकानि ; अतो देवराजयज्वना नैगमदैवतपदानां व्याख्याने
न तथा श्रमः कृतो यथा नैघण्टुकव्याख्याने ; एतदेव प्रकटयितुं
कृतं स्वग्रन्थनामकरणं 'नैघण्टुककाण्डनिर्वचनम्'–इति । ध्वनि-
तञ्चैतदेतद्भूमिकायां स्फुट मिति ।

इह भूमिकायां 'स्कन्दस्वामि–भवस्वामि–गुहदेव–श्रीनिवास-
माधवदेव–उवटभट्ट–भास्करमिश्र–भरतस्वाम्यादिविरचितानि वेद-
भाष्याणि'–इत्युक्तम् । तत्रादिपदात् हरदत्तमिश्रकृतस्य च वेद-
भाष्यस्य प्रामाण्यतयात्र ग्रहण मनुमीयते ; ग्रन्थमध्येऽष्टसु स्थानेषु
तद्व्याख्यानोद्धृतिदर्शनात् । अय मेव हरदत्तः पाणिनिसूत्रेः काशि-
कायाः टीकाकारोऽपि स्यात् । एतत्कृता वेदव्याख्या त्वस्माभि-
र्नाद्यापि दृष्टा, पर मापस्तम्बसूत्रवृत्तिस्तु दृश्यते तत्कृतैवेति ।

(१) स्कन्दस्वामी । अनेन वेदभाष्यं प्रणीतम्, निरुक्तस्यापि
टीका कृता । तावुभावेव ग्रन्थौ नैघण्टुकनिर्वचनप्रणयनकाले-
ऽपि स्याताम् ; नान्यथा तत्र तयोस्तत्र प्रतिपद मेव संस्मरणं
युज्येत । कृत्स्नार्थग्रथनसमये तु स्कन्दस्वामिकृतं वेदभाष्य मासीत्र
वेति को वदेत्, परं निरुक्तव्याख्यानं दुर्लभ मपि लभ्येतैवेति
सम्भाव्यते ; न हि किं मध्यालम्बन मन्तरैव निरुक्तव्याख्याने कृत-

कार्यता दुर्गाचार्यस्य गम्यते। इदानीन्तु तत्रैवोपलभ्यते। अय माचार्यः खलु रामानुजात् बहुपूर्वज एव स्यात्; रामानुजाभ्युदयात् बहुपूर्व मेवेह भारते स्कन्ददेवनामादिप्रचारश्रुतेः। प्रपन्नामृतेऽपि हि षट्त्रिंशाध्याये जगन्नाथक्षेत्रतः सुदूरे वेङ्कटाद्रौ कूर्मक्षेत्रम्, तत्र च 'स्वामिपुष्करणीतीरे स्कन्दं मत्वा तदाक्रमन्। स्कन्द मित्येव शैवास्ते वैष्णवा वेङ्कटेश्वरम्॥'-इति वर्णितम्। ६२७-शाकीयताम्रशासनतोऽपि गम्यते, भवेत्तच्छताब्दीज एवाय मिति। तदिदं ताम्रफलकहस्तान्तं Bombay Branch R. A. S. प्रकाशिते पत्रे (III.-208—1851) विशेषतो द्रष्टव्यम्।

(२) भवस्वामी। एतत्कृतभाष्यस्य किञ्चिदंशस्यापि दर्शनं नूनं सम्पन्नं देवराजस्येति तु गम्यते तद् भूमिकोल्लिपाठतः, परं ग्रन्थमध्ये न क्वापि भवस्वामिवचन मुद्धृतं दृश्यते; ततस्तदानी मेव तद्ग्रन्थं विरलप्रचारता मुपगत मिति प्रतीयते; इदानीन्तु तद्ग्रन्थलाभस्य का कथा। तत्कृतोऽग्निष्टोमप्रयोगस्त्वद्यापि क्वचित् क्वचिदस्त्येव। भट्टभास्करकृते आपस्तम्बसंहिताभाष्येऽप्यस्य नामस्मरणं लक्ष्यते। Burnell-मष्टोदयेन त्वस्य भवस्वामिनो खिष्टीयाष्टमशताब्दा मिह विद्यमानता अनुमिता (Catalogue pp. 24—30.)।

(३) गुहदेवः। अयं हि रामानुजस्वामितोऽप्यतीवपूर्वतनः, किं मधिकेन वेदान्ताचार्यसम्प्रदायगुरुषु तृतीयः। तथाहि रामानुजशिष्यवरेण श्रीनिवासदासेन यतीन्द्रमतदीपिकारम्भे एव मुक्तम् — 'व्यास-बोधायन-गुहदेव-भारुचि-ब्रह्मानन्दि-द्रविडाचार्य-श्रीपराङ्कुशनाथ-यामुनमुनि-यतीश्वर-प्रभृतीनां मतानुसारेण'-- इत्यादि। यतीश्वर इति रामानुजस्यैव समाख्यान्तरम्; प्रपन्नामृतप्रभृतिषन्यतस्त्वयैवोपलब्धेः। यामुनमुनिस्तु तत्पूर्वतनो वेदान्ता-

चार्यः, पराङ्गुग्रनाथस्तु ततोऽपि पूर्वतन इति च प्रपञ्चसृतादिभ्य एव ज्ञायते । एतदीयवेदभाष्यात्, सम्भवतः खण्डितातीवजीर्णपुस्तकात् एक मेव पदव्याख्यान मुद्धृत मिह देवराजेन— 'मरम् उदकं गिरन्ति गरगिरः'–इति (१. ३. १४) ।

(४) उवटभट्टः । १०८२–संवत्समातः समनन्तर मेतेन मन्त्रभाष्यं प्रणीत मिति निरूपितं पुरस्तात् । टाल्लनामसाम्यात् काव्यालङ्कारकर्तुः रुद्रटस्य समकालिकोऽय मित्येवं सम्भावितोऽपि गम्यते प्रायस्तथैव ; ११२५-संवत् समतीते काव्यालङ्कारटीकाप्रणयनावगमात् । तथाहि तत्समाप्तौ— "एवं रुद्रटकाव्यालङ्कृतिटीप्पनकविवचनात् पुण्यम् । यदवापि मया तस्यात्मनः परोपकृतिरतिभूयात् । ०—० । पञ्चविंशतिसंयुक्तैरेकादशसमाश्रितैः । विक्रमात् समतिक्रान्तैः प्राहषीदं समर्थितम्"–इति । एतत्कृतं बह्वृकप्रातिशाख्यभाष्यम्, कात्यायनप्रातिशाख्यभाष्यं मन्त्रभाष्यं नाम शुक्लयजुःसंहिताव्याख्यानं चेति त्रयो ग्रन्थास्त्वत्समादिभिर्मुद्रिता एवेति ।

(५) श्रीनिवासः । अय मेव श्रीमत्पूज्यपादस्य भगवतः शङ्कराचार्यस्य गुरुरासीदिति श्रुतं सत्यचेत्, तत्समकालिकत्वात् सार्द्धाष्टशतसंवत्समाभ्यन्तरे एव स इमां भुव मलञ्चकारेति युक्तम् । नैघण्टुकनिर्वचने षट्स्वेव स्थानेषु एतन्मत मुद्धृतं दृश्यते, ततस्तावगम्यते देवराजकाले एवैतत्कृतस्य भाष्यस्याभवत् लुप्तकल्पतेति ; तदेतर्हि तत्प्राप्तेः कथं सम्भावनैव ।

(६) माधवदेवः । दृश्यतेऽद्याप्येकं वेदव्याख्यानं विवरणं नाम ; तस्य रचयिता बभूवैको माधवः ; वेदार्थप्रकाशाख्यभाष्याणाञ्च कारयिता सायणाख्येऽप्येक आसीत् माधवः ; तावितरेतु-

भावेव माधवो देवराजोल्लिखितनाम-माधवादप्यादृ विभिन्नावेव ; मेघदूतकाव्यनिर्वचने माधवीयेतिसमुद्धृतानां व्याख्यावचनानां मेकस्यापि तत्र विवरणवेदार्थप्रकाशयोरदर्शनात्। Benfey-महोदयेन च सामाजिकसम्पादनावसरे (खृ० १८८४) सायणीय मिति यदुद्धृतं क्वचित् क्वचित् किञ्चित् किञ्चित् पूर्वाजिकव्याख्यानम्, तदपि नैव सायणमाधवीय वेदार्थप्रकाशाख्य मपि त्वन्य-माधवकृत विवरणग्रन्थीय मेव ;सायणमाधवीयं सामभाष्यन्तु ततः पश्चात् प्रकाशितं मयेति।

अपि सायणज्येष्ठो माधवः खलु सायणपुत्रः ; देवराजीयो माधवस्तु वेङ्कटाचार्यतनयः ; दृश्यैव भूमिकायां 'श्रीवेङ्कटा-चार्यतनयस्य माधवस्य भाष्यकृतो'-इत्युक्तेः।

वेङ्कटाचार्यौ च द्वौ प्रसिद्धौ। तत्र, यद्ययं 'शुक्लमीमांसा'-कारः स्यात्, नूनं तर्ह्यासीत् हरिहरयोः समानभावेनैवोपासको ऽभेदधिषणः ; तत्र तथैव मङ्गलाचरणादिदर्शनात्। तथाहि तन्मङ्गलाचरणीयपञ्चमः श्लोक एषः—

'पारावारात् प्रोद्धृते चन्द्रलक्ष्मी, याभ्यां ग्रस्तौलिवत्तौ बुभूषे।
सर्वैर्लोकैः पूजिते सङ्गृहीते, वन्दे देवौ वामदेवाच्युतौ तौ॥"

"-इति श्रीमदद्वैतविद्याचार्यस्य ०—० सर्वतन्त्रस्वतन्त्रस्य ०—० श्रीवेङ्कटेश्वरदीक्षितस्य कृतिषु बौधायनशुक्लमीमांसायां प्रथमो-ऽध्यायः'-इत्येवमादयश्च तत्पुष्पिका द्रष्टव्याः। यद्ययं 'रहस्यत्रयसार'-कृत्, 'न्यासतिलक'-प्रणेता च स्यात्, नूनं तर्ह्यासीत् रामानु-जमतानुगो भेदधिषणश्च ; तत्र तत्र रामानुजमतस्यैव प्रतिपक्षवग-मात् ; न्यासतिलकस्य च व्याख्यानं रामानुजशिष्येण श्रीश्रीनि-वासदासेन सबहुमानकृत मिति दर्शनाच्च।

यद्युच्येत,— शुल्कमीमांसारचयिता, न्यासतिलकादिप्रणेता चाभिन्न एवेति, तदप्युपपद्येतैव; दृश्यत एव हि शुल्कमीमांसाया अन्तवाक्ये यथा वेङ्कटाचार्यस्य विशेषणं सर्वतन्त्रस्वतन्त्रस्येति, रहस्यत्रयसारस्यान्तेऽपि तथैव। तथाहि— 'इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटेशस्य वेदान्ताचार्यस्य कृतिषु श्रीरहस्यत्रयसारः समाप्तः'–इति। वेङ्कटाचार्यः, वेङ्कटनाथः, वेङ्कटेशः, वेङ्कटेश्वरः, वेङ्कटदीक्षितश्चैक एव स्यात्; एकस्मिन्नेव ग्रन्थे वेङ्कटस्य तस्य बहुविधायाः समाख्यायाः व्यवहारदर्शनात्। वेङ्कट इति व्यङ्कट इति द्विधा लेखशोपगम्यतेऽत्र सर्वत्र।

एकस्यैव अभेदवादित्वं भेदवादित्वं च कथ मुपपद्येतेति चेत्, अत्र ब्रूमः— कालान्तरतया मतपार्थक्यसम्भव इति। यावदासीत् सोऽभेदधिषणो यागभक्तश्च, तदैव प्रणिनाय शुल्कमीमांसादिकान्; यदा त्वभूत् रामानुजाभ्युदयवातादृतभेदधीः कैङ्कर्यव्रतः प्रपन्नः, तत एव विरचितवान् न्यासतिलकादिकानिति; अत्र किमस्ति वैचित्र्यम्।

यद्येवं कल्पना नानृता स्यात्, तर्ह्यवश्यं तत्पुत्रो माधवदेवो नैघण्टुकव्याख्यानकृतो देवराजस्य प्रायः समकालिक एव भवेत्। तथा सति समकालिकव्यक्तिकृताद् ग्रन्थात् प्रामाण्यतया पुनःपुनः व्याख्यानाद्युद्धृतिर्देवराजस्यामानुषीत्येव स्वीकार्यम्। न च ग्रन्थस्यौत्कर्ष मेव तत्र बीज मिति वाच्यम्; तदीयपूर्वापरविरोधप्रदर्शनेन तदौत्कर्षाभावबोधनात्। तद्यथा— 'मही मे अस्य ०—० इत्यत्र माधवस्य प्रथमभाष्यम् ०—० मांसत्वे अग्रनामैतत् ०—० ब्रह्म मांसतो ०—० इत्यत्र माधवः ०—० मांसतोर्वरणस्य ०—० इत्यभाषयत्; निरूपणीयम्'–इति (१. १४. १८ भा०) अस्तु

वा तत्तथैव ; परं देवराजकृत मिदं निर्वचनं यथा लब्ध मस्माभिः; कथं नैवं लभ्यन्ते तत्समसामयिककृतानि भाष्यनामानुक्रमण्यादीनि ? इत्यपि विचार्य मेव।

अस्मन्मते तु वेङ्कटाचार्यहयग्रीव एवाश्रयणीयः ; तत्रायजः मुख्यमीमांसाकारो वेङ्कटाचार्यस्वासीत् मीमांसको दीक्षितश्च, रामानुजात्तु का कथा भगवच्छङ्कराचार्य्याच्च प्राग्भवो मण्डनमिश्रादिसमसामयिकः सः ; तद्ग्रन्थालोचनात्तथैव प्रतीतेः। तत्पुत्रेणैव माधवदेवेन वेदभाष्यादीनि प्रणीतानि। देवराजकाले स्थितान्यपि तानि साम्प्रतं विलुप्तान्येव वा।

माधवपुत्रेण विनायकेन कृतं कौषीतकीब्राह्मणभाष्यं तु क्वचित् क्वचित् लभ्यत एव; परं स हि कौषीतकीब्राह्मणव्याख्याता विनायकोऽस्यैव माधवस्य पुत्र इत्यत्र तु नोपलभ्यते निःसंशयं मानम्। एवं विनायकशान्तिरितिप्रथिते क्षुद्रग्रन्थे सामगानां संहितातो ब्राह्मणाच्छंसिमन्त्राणां सङ्ग्रहः कृतो वर्त्तते। तस्य कर्त्ता विनायकश्च किमु स्वादस्यैव माधवस्य सूनुः ? तथा षड्गुरुशिष्यश्चैकं विनायक मन्यतमं गुरु माह। तथाहि—

'नमः षड्गुरवे तुभ्यं नमोऽस्मद्गुरवेऽपि च।
विनायकस्त्रिशूलाङ्को गोविन्दः सूर्य एव च।
व्यासश्च शिवयोगी च ये षट् तेभ्यो नमः सदा'–इति।

तत्र विघ्नविघातक-गणेशादि-पञ्चदेवताः पञ्चगुरवः, व्यासः षष्ठ इत्येवं षड्गुरव इति ये न मन्यन्ते, तेषाम् मते सोऽपि विनायकः किं मस्यैव माधवस्यात्मजः ? इमानीह विचार्याण्येव।

(९) भास्करमिश्रः— भट्टः। बभूवैको ज्योतिषशास्त्रीयग्रन्थानां प्रणेतातिप्रसिद्धो भास्कराचार्यः। नायं सः ; तस्य वेद-

विदांवरत्वेन प्रसिद्धभावात्। वेदान्तशास्त्रीयप्रकरणग्रन्थविशेषस्य सिद्धान्तसिद्धाञ्जनस्य रत्नतूलिकाख्यायाष्टीकायाः प्रणेतापि बभूवैको वेङ्कटयज्वनुत्रो भास्करः; स चाक्षाद् विभिन्न एव तत्रैव हि दीक्षित इति दत्तस्वपरिचयो न तु मिश्र इति। वैदिकग्रन्थेषु यैषा त्रिकाण्डमण्डनाख्यग्रन्थकारिकाः प्रणस्ताः, तासां प्रणेता बभूवापरो भास्करः; किञ्च वेदाङ्गच्छन्दःसूत्राणां मतिदुर्लभस्यात्युत्कृष्टस्य भाष्यराजाख्यस्य भाष्यस्य रचयिता च बभूवान्यो भास्करः। नून मनयोः कतरेणैव वेदभाष्यकारेण भवितव्यम्। न च त्रिकाण्डमण्डनकारो भाष्यराजकारश्चाभिन्नः; तयोः पितृपरिचयभेदात्। तद्यथा— त्रिकाण्डमण्डनकारस्य भास्करस्यजनकस्त्वत्र परिचितः कुमारस्वामी; स एव वा स्यात् कुमारिलस्वामी; भाष्यराजकारस्य तु गम्भीरराजः। तदत्र गम्भीरराजसूनुना कृतं तद् वेदभाष्यं सुत कुमारिलतनूजेनेति चिन्त्यते कुमारिलात्मजेनैव कृतं वेदभाष्यं दृष्टं देवराजेनेति प्रतीयते; नैघण्टुककाण्डनिर्वचने पूषेतिपदव्याख्यानावसरे 'सर्वार्थपोषणात् पूषा'–इति भट्टभास्करमिश्रः (१. १. १८.) इत्येव सुस्पष्टदर्शनात्; न हि गम्भीरराजसूनुर्भट्टः; अपि तु दीक्षित इत्येव परिचितस्तत्र भाष्यराजे; कुमारिलस्वामी तु भट्ट इति प्रसिद्ध एव मीमांसकानाम्। यदीद मनुमानं नानृतं भवेत्, तर्ह्यं भास्करमिश्रः प्रायः श्रीमच्छङ्कराचार्यसमसामयिक एव। सायणतोऽप्यूनवतः[1]यताब्दीपूर्वजोऽय मिति चानुमितं Burnell–महोदयेनापि (Catalogue pp. 12—14.)। एतत्कृतं रुद्राध्यायमात्रस्य भाष्यं मत्राभिर्दृष्टम्; परं कस्याप्येकस्य वेदस्य सम्पूर्णं भाष्यं नाद्याप्यस्माक मभवद् दृग्गोचर मिति।

(८) भरतस्वामी। एतत्कृतग्रन्थस्य एकत्रैक मेव क्षुद्रं निर्वचनवाक्यं सुकृतं देवराजेन ; ततोऽवगम्यते ,— तदानी मेवै-तत्कृतस्य सम्पूर्णस्य भाष्यस्यातिदुर्लभत्वम् ; इदानीं तु नैवप लब्धिसम्भावनापि। अतस्तस्यापि भरतस्वामिनः परिचयः सम्प्रत्यस्माक मप्येकल्प एव। पर मस्ति क्वचित् पुस्तकालये छन्दोगारण्यकमात्रस्यैव तत्कृतं भाष्य मतिजीर्णं मिति च नः श्रुतम्। ६२७-शाकीयतास्त्रशासन मस्यापि कालनिर्णये स्याद्वा निदान मिति।

अथास्य देवराजयज्वनोव्याख्यानशैली त्वजटिलेति प्रथस्यैव विपश्चिताम्। परं पौराणिकमतप्रबलकालप्रभवत्वादस्य बहुत्रैव पौराणिकमतानुसृता अपि व्याख्याः सन्दृश्यन्ते। तद्यथा— 'पञ्चाशत्कोटियोजनविस्तीर्णेति पृथिवी'-इति (१. १. ११.), पर्वतोऽपि पक्षच्छेदात् पूर्वं मन्तरिक्षे व्रजति स्म'-इति (१. १०. ११.), 'पक्षच्छेदात् पूर्वं पर्वतश्च'-इति (१. १०. १५.), 'उभय-त्रापि छेद्यच्छेदकभावेन सम्बन्धः ०—० तेषा मिन्द्रः पक्षानच्छि-नत्'-इति (१. १०. १.), 'पिनाकम् ०—० दण्डाकारं धनु-रुच्यते ; तच्च रूढितो महादेवीय मेव सामान्येन'-इति (३. २९. १६) च। नैरुक्तविज्ञानभावावगमे चासमर्थ एवासीत् स इति च गम्यते ऽत्रानेकत्र। तथाहि— 'विकृतत्वं ज्योतिषः शीतत्वात् कसहचिभ्यां वा ४. २. ६५)'-इत्येवमादीनि समालोच्यानि।

नैरुक्तशासनात्तस्य क्वचित् क्वचित् ज्ञाननैर्बोध्यलक्षणमपि प्रतीयते-ऽत्र। तद्यथा— 'यमः = मध्यस्थानवायुः'-इति (५. ४. १२), 'यमः ०—० = अस्तमयावस्था आदित्य उच्यते'-इति (५. ६. १७), विष्णुः = तीव्ररश्मिदारेण सर्वत्र व्याविशति'-इति (५. ६. ११),

'अदितिः ०—०=ऐतिह्यासिकानां मते देवमाता, नैरुक्तानां मते अदीनादिगुणा, आत्मपदे प्रकृतिः'–इति (४. १. ४८.) च। 'पञ्चजनाः'–इतिपदस्य व्याख्यानावसरे शूद्रस्य च यज्ञाङ्गकार्याधिकारित्वं निर्णीतम् (२. ३. २३)। 'यत्रैकार्थानां पदानां सन्निपातः, तत्रैकं तस्य वाचकं भवति; अन्येषां निरुक्त्या योजनं कर्त्तव्य मिति मर्यादा (१. १. ११)'–इत्यादिर्व्याख्योपदेशश्च तस्य नूनं मूल्यवानेव। 'रलयोरभेदः'–इति (१. १. १३), 'डळयोरेकत्वस्मरणात्'–इति (१. १. १५), 'बवयोरभेदः (४. ३. १२८)'–इत्येवमादयश्च तत्प्रदर्शितविधय औणादिकशब्दसाधने भवन्त्येव बहुत्र सहायकाः।

निघण्टुसमाम्नायविरुद्धा अपि भवन्ति पदपाठा इति चेदुच्यतेऽनिशम्। तथथा— 'सतीकम् ०—० अत्र स-शब्दे अवग्रहकरणं पदकाराणा मभिप्रायस्य वैचित्र्यात्'–इति (१. १२. ५८)। अस्माभिस्तु सतीक मित्यस्य तथैव निर्वचनं कार्य्यम्, यतो नैव विरुद्धेयत 'स। तीकम्'–इति पदग्रन्थः; तस्यापि संहितावत्त्वेन व्यपदेशात् तद्विरोधस्यानुपेक्षणीयत्वात्। वस्तुतो 'खृतीकम्'–इत्येवात्र नैघण्टुकम्; न पुनः सतीक मिति। एवं हिक मित्यादेर्निर्वचनावसरे यदुक्तम् एते निपाताः'–इत्येवं (३. १२. १–९), तदपि पदग्रन्थविरोधाविच्छिन्नीय मेव। तत्र खल्वस्माभिः 'एते नव निपातसमुदायाः'–इत्येव वक्तुं युक्तम्; अन्यत्राप्येवं समुदितपदद्वयस्य पदत्वेन परिगणनं दृश्यत एव हि निघण्टाविति। सायणाचार्यस्तु ऋग्भाष्यादौ हिक मित्यादीनां पदपाठरीत्येव व्याख्यान मलिखत्; न तु निर्वचनरीत्येति पश्यन्निदं स्वग्रन्थापमानं किल देवराजः।

व्योमशब्दनिर्वचनावसरे त्वेकत्र पदग्रन्थमर्यादाभङ्गभिया उणादिसूत्रस्य यास्कीयनिर्वचनस्यापि ध्वनितोऽनादरः। तथाहि—"उणादौ तु ०—० वीयते तद्वायुना व्योम। तथाच निरुक्तम्—'योनिरस्तरिक्षं महानवयवः परिवीतो वायुना'–इति (२. २. ४.) इदं निर्वचनमेतत्पदकारयोः शाकल्याक्षेययोरनभिमतम्; वीत्यस्मिन् अवगृह्यतत्वात्"–इति (१. ३. ३)। वस्तुतो यास्केनापि पदकाराभिमत मेव निरुक्तम्— व्योम व्यवन मिति ११. ४. ६ द्रष्टव्यम्; परिवीत इति तु नैव व्योमनिर्वचनम्, अपि तु तत्र प्रदर्शितनिगममन्त्रस्थं पद मेव; स एष महान् भ्रमो लक्ष्यतेऽस्माभिः देवराजस्येति।

इहानेकत्र निगमस्यान्वेषणीयता च प्रतिपादिता स्वकण्ठरवेणैव। तदिद मन्वेषणीयत्वप्रतिपादनं नैव दूषणीयं मन्यतेऽस्माभिः; 'न हि सर्वः सर्वं वेत्ति'–इति-प्रज्ञावत्त्वित्याद्यात्, लुप्तशाखीयनिगमानां लाभासम्भवाच्च; परं यदत्र ब्राह्मणवादा अपि निगमा इति प्रदर्शिताः "वैकुरानामासि जुष्टा–इति निगमः"–इति (१. ११. ५७), तदिदं न रोचतेऽस्माभ्यम्; निरुक्तमूलरूपस्य निघण्टुसमाम्नायस्य ब्राह्मणपूर्वभवत्वेन ब्राह्मणग्रन्थीयपदेषु लक्ष्यासम्भवात्, द्वादशाध्याय्यां निरुक्ते क्वापि तथाविधनिगमास्मरणाच्चेति। अपि वा ब्राह्मणग्रन्थेषु ये केचन मन्त्राः विद्यमानसंहिताश्रुताः श्रूयन्ते तेऽपि प्रायो विलुप्तशाखीया एव स्युरितिसर्वमवदातमिति।

अथ ऋग्वर्थानाम निरुक्तटीकाया प्रणेता दुर्गाचार्यः खलु निघण्टुव्याख्यातुर्देवराजयज्वनोऽवरजः, सर्ववेदभाष्यकृतः सायणाचार्यास्तु पूर्वज इति प्रतिपादित मेव पुरस्तात्। समाख्यते, सोऽप्यासीद्

दाक्षिणात्य एवेति ; तत्र नैसर्गिकगौडविद्वेषदुर्गन्थोपलब्धेः। तथथा— "वन्दनाः = वन्दितारः, लाडगौडादयः"–इत्यादि (निरु० ४. १. ३ भा०)। सायणाचार्योऽपि दाक्षिणात्य एव, परं न स दुर्गाचार्य इवापरिमार्जितरुचिः ; तेन हि वेदार्थप्रकाशे 'वन्दना'–इति पदस्य 'वन्दनानि, रत्नानि'–इति पौराणिक मतानुगत व्याख्यान मकारि। नन्वेवं ऋज्वर्थायाः पुष्पिकासु दृश्यमानस्य 'जम्बूमार्गाश्रमवासिनः'–इतिविशेषणस्य का गतिरिति चेत्, अत्र ब्रूमः—दक्षिणापथीयप्रदेशेभ्यो जम्बूदेशं गन्तुं प्रस्थितानां पान्थानां मार्गे एव स्थितस्तदाश्रमः, तत एव तत्र तथा विशेषण मुपपद्येतेति ; न चैतेन तस्य दाक्षिणात्यत्वं निरस्यते।

ऋज्वर्थायां निघण्टुनिरुक्तयोः कर्तृपार्थक्यं सुप्रतिपादितम्। तथाहि— "एतस्मिन् मन्त्रे 'अकूपारस्य दावने'–इत्यय मनयोः पदयोरनुक्रमः, समाम्नाये पुनः 'दावने अकूपारस्य'–इति मन्त्रपाठव्यतिक्रमेणानुक्रमः। तेन ज्ञायतेऽन्यैरेवाय मृषिभिः समाम्नातः, अन्य एव चायं भाष्यकार इति"–इत्यादि (४. १.२.) वायिन्द्रयोर्भिन्नाभिधत्वविचारोऽप्यत्र दर्शनीयः। तथथा— "वायु-वेंन्द्रो वेति किमेकस्य पर्यायवचनावेतौ शब्दौ उताभिधेयौ भिद्येते ?"–इत्यादिः (७. २. १ टी०)। तत्रैव "कस्मात् पुनर्मध्यमस्य शब्दद्वयेनोपदेशः क्रियते, पार्थिवोत्तमयोरेकेन ? (७.२.१टी.)"–इति विचारोऽपि भवेदेव प्रेक्षावता मभिधेयवचनः। "पात्रस्य इन्द्रपान मिति समाख्या (८. १. २ टी.)"–इत्येव-मादि व्याख्यानञ्च दुर्गाचार्यस्य तस्य याज्ञिकत्व मावेदयति। "नासु तनूनपादेवैकः ०—० नास्वेव नराशंसः ; तत्र नराशंसयाजिनां सौत्रामणीप्रयोगे कथं प्रयोगः ? (८. १. ७ टी.)"–इति

तेऽप्यस्मोद्भावनमपि प्रशस्य मेव। "आथर्वणे रोदसीत्यपरूढं पदम्, तदपेक्ष्यैकवचनेन भाष्यकारो निराह 'रोदसी रुद्रस्य पत्नी'-इति (१२. ४. १२ टी०)"-एषापि पङ्क्तिरस्य बहुमूल्यैव। "सा च पुनर्ऋक्या (७. ४. १ टी०)"-इत्याद्यनुक्रमणार्थवचनस्यास्य भवेदेव प्रशंसनीयम्। देवानां द्वैविध्यम् (१२. ४. ७ टी०), पितॄणां त्रैविध्यम् (११. २. ६ टी०), मन्त्रेषु देवतानिर्णयप्रकारोपदेशव्याख्यानं (७. १. ४ टी०) चेत्येवमादिकमपीह द्रष्टव्यमेव॥

अथ मन्त्राणां छन्दोनिर्णये क्वचित् क्वचिदिह छन्दोऽनुक्रमणीविरोधः परिलक्ष्यते। तद्यथा— 'सं मा तपन्त्यभितः (ऋ० सं० १. १०१. ८.)'-इत्यस्या ऋचो निर्णीतं तेन पङ्क्तिश्छन्दः; अनुक्रमण्यां तूक्तं यत्— "पाङ्क्ते मन्त्रा चिष्टुबष्टमी महाबृहती यवमध्या"-इति। एतदेव छन्दोऽनुक्रमणीमतं मनुसृत्य सायणाचार्येण च ऋग्भाष्ये निर्णीतं मियं यवमध्या महाबृहत्येवेति। तत्र हि मध्यपादस्य द्व्यक्षरन्यूनतैवैतादृशमतद्वैधे निदानमुपगम्यते। वस्तुतस्तु तादृशस्थले छन्दः सन्दिग्धत एव; प्रदर्शितायां हि ऋचो मध्यमः पादो दशाक्षरः श्रूयते, न च दशाक्षरमध्या द्विचत्वारिंशदक्षरा पञ्चपदा काचिदस्ति विराड्रा बृहती पङ्क्तिर्वेति; अतो नूनं चिन्तनीय मेवैतस्या ऋचो विराड्-यवमध्या नाम महाबृहतीच्छन्दः, उत स्वराट्पथ्या नाम पङ्क्तिच्छन्दः? इति। ईदृक्सन्देहापनोदनायैव स्तः पिङ्गलाचार्यसूत्रे— "आदितः सन्दिग्धे, देवतादितश्च (६, २१. ७, १.)"-इति। एवञ्चास्या ऋचः पाङ्क्तसूक्तमध्यपतितत्वात् पङ्क्तित्व मेव न्याय्यः। न जाने कथं मनुक्रमणीकारोऽस्या महाबृहतीत्व माख्यदिति। क्वचित् मूलानुरोधतोऽपि मन्त्रक्छन्दोऽनुक्रमणीविरोधो गलेकुठारन्यायेन स्वीकृत एव

दुर्गाचार्येण च । तथा— अनुक्रमण्यनुसारतः खलु "अभि न इला" –इति त्रिष्टुप्छन्दस्का , तत उत्तरा "सिषक्तु नः"–इत्येषा विराड्-छन्दस्का ; यास्केन त्वेतदवतरणा मुक्तम् 'एषा भवति'–इत्येक-वचनान्तम् ; ततश्च ज्ञायते तच्चते उभयोः ऋचोः एकत्व मिति । तदाह तत्र तद्व्याख्याया मेव दुर्गाचार्यः 'शक्वरी'–इति । सायणा-चार्येण तु ऋग्भाष्ये अनुक्रमण्यनुरोधतो नैरुक्तस्वरसोऽपि क्षुण्णा-यितः ? अपि वा न च तेन तदानी मेष निरुक्तग्रन्थः स्मृतः ? अन्यथा द्वीतदुल्लेखोऽपि कथं न तत्र कृतस्तेनेति । वस्तुतोऽत्र निरुक्तानुक्रमणीकारयोः प्रतीयत एव मतभेदः , तत् किङ्कर्तव्य-मूढ एवाभवदिह देवराजस्तथा सायणश्च ।

दुर्गाचार्यदृष्टनिघण्टुसमाम्नायपुस्तकगतलिपिकरप्रमा[illegible]दो-षतश्च क्वचित् क्वचिद् भ्रान्तिः प्रतीयते ऋज्वर्थायाम् । तथा —निघण्टौ नैगमे काण्डे जहित्याद्यखण्डे समाम्नात मेवै कत्रिंशत्तमं 'नू च'–इति ; तदवलम्ब्यैवोक्तं भगवता यास्केन "पुराणनवयोर्नू चेति च"–इति (४. ३. १.) ; निगमस्वोदाहृतस्तावेव तेन "नू च पुरा च सदनं रयीणाम्"–इति (ऋ० सं० १. ८६. ७.) । दुर्गाचार्य-स्त्विदाह "अयन्तु नूचिदित्येतस्यैवार्थसामान्यप्रसङ्गादसमाम्नात एवोदाहृतः (४. ३. १ टी०)"–इति । किमाश्चर्यमयास्कीयग्रन्थः पदपाठविरुद्ध इव लक्ष्यते । पदकारो हि 'नू । चित्'; 'नू । च'–इत्येव मवग्रहन्ति ; निरुक्ते तु 'नूचित्'–इति , 'नूच'–इति चैतौ अनवग्रहीयावेव निपातौ सूचिताविति गम्यते । निघण्टु-समाम्नाये तु द्वित्राण्यपि पदानि पदत्वेन परिगणितानि दृश्यन्ते "यं यो: (४. १. ४८.) , सोमो अस्मा: (४. ३. १३.)", देवो देवाच्या कृपा (४. ३. १९.)"–इत्यादीनि । तथा चैतं[illegible]

सन्देहनिरसनाय तादृशसमाम्नायपाठदर्शनञ्चाकिञ्चित्कर मेव। तदत्र टीकाकृतोऽत्र वचन मेव भवेच्छरण मस्मादृशाम्; दौर्भाग्य मेवास्माकं यदिह ऋज्वर्थाकृतो नैवौष्ठाधरप्रस्फुरणं दृश्यते! अहह एष विरोधः किमु तेन नैव लक्षितः? दशमेऽपि पुनः नूचिदित्यस्यैव 'नवं च पुराणं च'-इत्यर्थः कृतो यास्केन; तत्र तूक्तं दुर्गाचार्येण —"नू चित् इति नवपुराणाभिधायकौ निपातौ (१०. १. ३ टी०)"-इति। सायणाचार्येण तु तत्र नूचिदित्यस्य नवपुराणार्थतापि न स्वीकृता! अपि तूक्तम्—'नूचिदिति निपातौ निषेधेऽपि वर्त्तते'-इति। इद मेवोच्यते 'मुरारेस्तृतीयः पन्थाः'-इति। तत्त्वतः सायणाचार्यकृतं तद्व्याख्यानं तु निरुक्तविरुद्धं प्र. त्यविरुद्ध मिव च प्रतीयत एव।

क्वचिदिह मूलाद्दृष्टपदस्यापि व्याख्यानं कृतं गम्यते। तद्यथा — 'सहस्रियः'-इत्यादिः, 'वायव्ये मन्त्रे'-इत्यन्तो ग्रन्थः (४. ४. ५टी०) समालोच्यः। तदेवंविधं स्वकपोलकल्पितपदव्याख्यानं चातीव विस्मयावहम्।

क्वचित्तु मूलपाठेऽपि स्वसंशयः प्रकाशितोऽनेन। तद्यथा— 'भाष्य मत्र न सम्यगिव लक्ष्यते; तत्र सम्यक् पाठोऽन्वेष्यः, ततो योज्यम्'-इत्यादि (६. ६. ५ टी०)। तत्र तादृशाशङ्काया निदानोल्लेखस्य स्यादुचितस्यस्य; अन्यथा हि यस्तत्रवक्तव्यता-दोषो भवेदेव दुष्परिहार्यः। अस्माकं त्वल्पधियां न तत्रासम्यक्ता-बोध उपजायते। सायणाचार्येणाप्येतदेव नैरुक्तं व्याख्यान मुत्कृष्टं मत्वैव प्रशंसापूर्वकं सम्पूर्णं मुद्धृतं यथायथ मृग्वेदार्थ-प्रकाशे। तत् कथं मन्यामहे दुर्गाचार्यस्यैष नैरुक्तपाठसंशयो धीमतां विचारविषय इति।

मूलोल्लक्षणानां मुदाहरणेषु समन्वयाः खलु टीकाकृद्भिरवश्य दर्शनीयाः ; पर मिहानेकत्र न तथा दर्शिता दुर्गाचार्येण च ; तत्र ऽत्र बहुधैव भवेत् लक्षणसमन्वयसंशयस्य दुष्परिहार्यता च तथथा— परोक्षकृतानां मन्त्रां यल्लक्षणं मभिहितं मूले "परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य" इति (७. १. १.) ; एतस्योदाहरणान्यपि दर्शितानि तत्रैव "इन्द्रो दिव (१०. ८८. १०.)"-इत्यादीनि ; पर मुदाहृतेषु तेषु परोक्षकृतनिगमेषु न हि श्रूयन्ते सर्वा एव प्रथमपुरुषक्रियाः प्रत्युत 'अनूषत', 'गायत', 'अरंसत'-इति तिस्रो मध्यमपुरुष क्रियाश्च। तदिह कथं भवेल्लक्षणसमन्वयः ? इतीह वृत्तिकृतैवावधानीय मेव ! न च तथोक्तवितं दुर्गाचार्येण। किञ्च 'अनूषत'-इत्यस्य अभिष्टुतेति प्रतिशब्दादानं, तदनुगतं सर्वं तन्मन्त्र व्याख्यानं च तस्य व्याख्यापक्षस्य एवोद्भावयति। सायणभाष्ये 'अनूषत'-इत्यस्य स्तुतवन्त इति प्रतिशब्दः प्रदत्तः, तथा न चोप लभ्यते तत्र यूय मिति, स्फुट मप्युक्तं तत्साधनिकायां 'लुङि व्यत्ययेनात्मनेपदं झस्यादादेशः'-इति। अहो इदैतदपि विचार्य — अस्त्वेकस्यैवास्य दुर्गाचार्यस्य व्याख्याने दोषः, परं सर्ववेद भाष्यकारेण सायणेनापि 'गायत'-इत्यस्य व्याख्यायां कथं यास्कीयलक्षणोदाहरणमर्यादा परिरक्षिता ? गड्डलिकाप्रवाह एव किं मत्र बीज मिति विद्वद्भिरनुसन्धेयम्।

'एष चाख्यानसमयः'-इत्येतदैकस्मवचनस्य (७. २. ३. 'भारते चाख्यानसमये एष एव सिद्धान्त इत्यर्थः'-इति दुर्गाचार्य कृतव्याख्यानदर्शनाद् गम्यते नून मेतत्प्रक्षिप्तं महाभार निरुक्तात्र पुरैव प्रणीत मिति। तदेतद्ग्रन्थव्याख्यानं तु पौर्वापर्

ज्ञानविधुरेणैव ज्ञात मिति कालज्ञानज्ञतश्रमाणा मैतिहासिकानां भवेदास्याग्रद मेव। एव मन्यत्रापि बहुत्रैव विवेचनीयम्।

क्वचिद्विशेषतो व्याख्येयानि मूलवचनानि च नैव व्याख्यातान्येतेनाचार्येण; अमार्जनीय एवैष दोषो व्याख्यातृणाम्। न दृग्दोषास्तु मयोद्घोषिता बहुत्र तद्दीप्यन्ताम्। किञ्च यदिहानेकत्रोक्तं भगवता यास्केन— "इति सा निगदव्याख्याता"-इति, तेषां सर्वेषा मेव निगमानां विशेषतो व्याख्यानानि कर्त्तव्यान्येव इत्यभिप्रेतोऽस्य। अहो बत, तादृशानां व्याख्याकथा तु दूरे आस्ताम्, असकृच्छ्रुतस्य निगदव्याख्यातेति पदस्यापि व्याख्यानं न ज्ञातं तेन क्वचिदपि! वस्तुतस्तु यास्ककाले यासा सृचा मर्थबोध आसीदतीव सुगमः, तासां व्याख्यानं निष्प्रयोजन मिति मत्त्वैवाह तत्र तत्र यास्को निगदव्याख्यातेति। श्रूयन्ते चैवं निगदव्याख्याता मन्त्रास्तैत्तिरीयारण्यकादावपि। तथाहि— "अथ निगदव्याख्याताः, ताननुक्रमिष्यामः"-इति तै० आ० १प्र० ८अनु० ४ख०। 'निगद्यमानेनैव मन्त्रपाठेनैव ०—० विस्पष्ट माख्यातो भवति, तान् एतान् मन्त्रान् अनुक्रमेण कथयिष्यामः'-इति च तत्र तद्भाष्यं सायणीयम्।

क्वचिदहो त्रैकालिकाभावविशिष्टस्य मन्त्रकमलस्यापि सुगन्धोऽघ्रायि तेन; दृष्टश्च क्वचिच्चिराकार मपि साकारम्। अतिगम्भीरमूलजलधौ दिग्भ्रम एव तत्र तत्र तद्दीज मनुमीयते, नान्यत् किं मपि। तद्यथा निरु० ८. १. २.— "अथाप्यय मपरो हेतुरिन्द्रस्य द्रविणोदस्त्वे— 'अग्निं द्राविणोदस माह' मन्त्रदृक्। स मन्त्रो मृग्यः। केचित्तु 'द्रविणोदाः पिबतु द्राविणोदसः'-इत्येव मन्यन्ते। यस्यापत्यं द्राविणोदसोऽग्निः, स एव द्रविणोदा

इति'-इति। अस्माभिस्तु न खल्वत्र द्वाविंशोदरपदघटितमन्त्रोऽन्वेष्यः; अपि तु द्वाविंशोदा इन्द्र इति चेत् इन्द्राज्जातोऽग्निरिति यत्र श्रूयते एव मेव निगमो दर्शनीयः; दर्शयिष्यत्यनुपदञ्चात्र तथैव— "यो अश्मनो अन्तरग्निं जजान"-इति भाष्यकारः स्वयं मेव।

क्वचित् पदग्रन्थविरोधं मुररीकृत्य च कृतं नैरुक्तनिगमव्याख्यानं मैत्रेयेनातिपण्डितम्मन्येन। तद्यथा वराङ्गनिगमव्याख्यानावसरे त्विषेरूपं मिदं मिति मत्स्वैवोक्तम्— 'त्वेषितः = सन्दीपितः'-इति (५. १. ४टी०)। पदसंहितायां तु 'त्वाऽइषितः'-इति सावग्रहपाठः श्रूयते। तथाचावगम्यते बह्वृक्पदकारस्य शाकल्यस्यैवेर्नात्र त्विषेरूपं मिष्ट मिति। एवञ्चानयोर्विरोधः स्फुटम्। नूनं मवगतस्यैष विरोधस्तेनापि वेदार्थपटुना; अत एवानुपदमुक्तम्— 'नान्यथार्थं उपपद्यते'-इति। 'अन्यथा' पदकारमते 'त्वाऽइषितः'-इत्यवग्रहानुरोधतः त्विषेरूपं मिदं मिति स्वीकाराभावे इति च तद्भावः। एतच्च प्रौढ़िवादमात्रम्; सायणाचार्येण तु पदकारमतं मनुसृत्य कृतं एव हि त्वेषित इति पदस्य 'त्वया प्रेरितः'-इत्यर्थोऽसङ्गतः। वस्तुतोऽस्माभिः सर्वत्र तथैवार्थः कल्पनीयो यथा न विरुध्येत पदपाठः। आर्षं पदपाठं मवमत्यार्थकरणन्तु साहस मेवेत्यत्र कास्ति वक्तव्यता।

एव मनुक्रमणीकारस्य शौनकस्य, कल्पकारस्याश्वलायनस्य च मतविरुद्धं मिष्ट प्रतीकोपादानं मभिलक्ष्यते। तद्यथा—"आयन्त आसाम्"-इतिनिरुक्तोदाहृतनिगमस्य व्याख्यानाय तत्पूर्ववर्त्तिन्याः "अभि वो देवीम्"-इत्यस्याः (ऋ० सं० ७. ३४. ८.) प्रतीकोपादानम् (६.२.३.)। तदत्र शौनकाश्वलायनयोर्मते ये द्विपदे ऋचौ, त एवैते सम्भिल्य चतुष्पदीत्येका दुर्गाचार्यस्येति मतविरोधो व्यक्तः।

स्य वैज्ञानिकज्ञानाभावोऽपि द्योतितोऽत्र बहुत्र स्वयम् । तद्यथा — 'विकृतज्योतिष्कः'-इतिनैरुक्तपदस्य व्याख्यानायोक्तम्— "तत्र तस्य विकृतं ज्योतिः, शीतत्वात् ; इतराणि उष्णानि ज्योतींषि सूर्यादीनि, तान्यपेक्ष्य"-इति (५. ४. १टी०)। स्वभावस्यान्यथाभाव एवोच्यते विकारो नाम लोके ; तदयदि हि पूर्वं मुष्ण मनन्तरं चन्द्रमः-सम्बन्धात् शीत मिति स्याद् विज्ञानवेद्यं चान्द्रमसं ज्योतिः, तर्ह्येवोपपद्येत चन्द्रवाचकस्य 'हृक'-इति पदस्य यास्कीयं निर्वचनं 'विकृतज्योतिष्कः'-इति। स्वभावशीतस्य तु विकृतत्व मेव किन्नामेति संशयोऽपि नोद्भूतः किमु दुर्गाचार्यस्य ?

एवं यदा पौराणिकाख्यानघनघटाभिराच्छन्नं वैदिकं ज्योतिः, तादृशे एव निविड़ान्धकारग्रस्ते भारते यतोऽयं जातो दुर्गाचार्यः, ततोऽपीह ऋज्वर्थायां मूलाभिप्रायविरुद्धानि मूलासम्बद्धानि च बह्वन्याख्यानानि दृश्यन्ते। तत्र, मूलाभिप्रायविरुद्धं यथा— "एव मुक्तावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति"-इतिनैरुक्तवचनस्य व्याख्यानशेषे "मन्त्राणां द्रष्टारो भवन्ति, न तु कर्त्तार इत्यभिप्रायः"-इत्युक्तम् (७. १. ३टी०)। न चाय मभिप्रायो मूलकृतो यास्कस्येति गम्यते। तत्त्वतस्तु अनिर्दिष्टकालिकाना मतिप्राचीनानां मन्त्रादीनां दृष्ट इति, युगारम्भकालिकानां प्राचीनानां प्रोक्त इति, मध्यकालिकाना मतिप्राचीनाना मद्यतनीयानाञ्च कृत इति त्रय एव व्यवहाराः समार्थाः ; तथैव पाणिनिशासनात्। तथाहि — 'दृष्टं साम'-इति (४. २. ७.), 'तेन प्रोक्तम्'-इति (४. ३. १०१.), 'कृते ग्रन्थे'-इति (४.३.१.) चैतानि सूत्राणीहालोच्यानि। मूलासम्बद्धानि च यथा—'सप्त सिन्धून्, स्यन्दना आकाशनदीः, इला च इला चेत्येवमाद्याः'-इति (८.१.३टी०), "समारोहणे =

उदयगिरौ"-इत्यादि (७.१.२ टी०) च। तथा "इह कथं चन्द्रमा मध्यस्थानः?"-इति स्वारब्धविचारस्य समाधानमपि (११.१.६टी०) ततोऽधिकं चित्रम्।

एवमपि यास्कीयवचनव्याख्यानानुरोधात् तस्य बहुत्राविततथवादित्वमपीह व्यज्यते। तद्यथा देवतानामाकारविचारप्रकरणे— "तदाहुः 'नैतदस्ति यद्देवासुरम्'-इति। ०—० 'तद्यथा — अग्निः, वायुः, आदित्यः, पृथिवी, चन्द्रमाः-इति'। प्रत्यक्षत एतान्यपुरुषप्रकाराणि, इत्येतेषां मतोऽन्यथाभ्युपगमे दृष्टहानिः स्यात्! न चैतदिष्टम्। तस्मादपुरुषविधा अग्न्यादयः, तस्मान्मान्त्रादृष्टा इन्द्रादयोऽप्यपुरुषविधाः, न हि मनुष्यत्वे तुल्ये केचिदाकारिणः केचिदनाकारिणः इति, तथैव देवतानामपि हि न्यायः। तस्मादपुरुषविधा इति"-इति (७.२.३टी०)। एतेन अग्न्याद्यन्तःपुरुषरूपकल्पन मप्यपास्त मिति स्फुटम्। एवं भगवता यास्केन पृथिव्याः बहिःप्रभाशून्यत्वं वर्णितम्— "अपगतभास मपहृतभास मन्तर्हितभासं गतभासं वा"-इति (६.६.७.)। ततश्च दुर्गाचार्येण 'कृष्णच्छाया भवति पृथिवी'-इत्यप्यवगतम्।

एवं मध्यन्तःसारशून्यो वंशतरुश्चन्दनवनस्थोऽपि न कथं मपि चन्द्रनायते! दुर्गाचार्यः खलु देवतानां मपुरुषविधत्वं व्याख्यायाप्यनुपदं मनुससारैव पौराणिकमतम् "परे तु अधिष्ठातारः पुरुषविग्रहाः (७.२.३टी०)"-इत्यादिना। अपि नैव विगतः स्वान्तस्य पौराणिकराहुग्रासकथासंस्कारः। अहो कालप्रभावजो मतिविभ्रमः! वेदार्थप्रत्यक्षर्तुमशक्तो यास्कोऽपि मतं खर्वीकर्तुमिच्छत्ययम्!! एवं भगवत्पूज्यव्याख्यानादापि पौराणिकाख्यानमेवानुसृतम् (१.२.४टी०); न तु तत्त्वं व्याख्यातमेतेन।

क्वचिदिह व्याकरणप्रक्रियाख्यान मप्यपरिस्फुटम् । तद्यथा— 'अस्मे'–इति नैगमपदव्याख्यानाय यन्निरुक्तं भगवता यास्केन 'अस्मे तेबन्मुः'–इत्यादि । तत्र अस्मच्छब्दात् प्रथमादीनां सर्वासा मेव विभक्तीनां बहुवचनानां 'जस्-शस्-भिस्-भ्यस्-आम्-सुप्'–इत्ये-तेषां स्थाने "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः"–इति (७. १. ३९.) पाणिनीयेन सूत्रेण शे-आदेश एवेष्टः । तथाच 'अस्मे'–इत्येकरूपस्येव पदस्य वयम्, अस्मान्, अस्माभिः, अस्मभ्यम्, अस्मत्, अस्माकम्, अस्मासु इति सप्तविधा एवार्था भवितु मर्हन्ति, भवन्ति च यथास्थानं यथानुगम मित्येव मूलतात्पर्यम् । परं दुर्गाचार्येण त्वेषा वैयकरणप्रक्रिया नैव तत्र कण्ठरवेणोद्घो-षिता; अपि तूक्तं "'अस्मे'–इत्यस्य 'वयम्'–इत्येवम्प्रथमया विपरिणाम उपपद्यते"–इत्येवमादि (६. २. ३ टी०) ।

क्वचिदिह पाठकभ्रामिकोक्तिश्च लक्ष्यते । तद्यथा—'इह तूत्तमः (१२.३.१४)'–इत्युक्तिर्भ्रामयत्येव पाठकान् मध्यमस्याप्यन्वेषणाय ।

क्वचित्त्वेह यास्कप्रदर्शितनिगमार्थस्य चान्वेषणीयतोपदिष्टा । तद्यथा—"दयमानोऽडीयमानः काकोऽत्तरिचेणाधस्तात् मां सुप्तं दोषाया मबोधयत् । मृग्योऽत्र शेषः"–इति (४. ३. १टी०) । नून मिह उक्तातिरिक्तस्यार्थस्यैव मृग्यतोपदिश्यते; तत्त्वनुचितं वृत्ति-कृताम् । किञ्चात्र 'दयमानोऽडीयमानः'–इत्यशुद्धपाठस्तु स्यात्ले-खकप्रमादज एव; 'दयमान उड्डीयमानः'–इत्येवम्पाठेनैव भवि-तव्यम्; एवं 'दोषायाम्'–इत्यपि द्रष्टव्यम् ।

निगमान्वेषणीयता तु बहुत्रैवोपदिष्टा । तद्यथा— "जामि-शब्दस्य (अतिरिक्तार्थस्य) पर्य्येष्यो निगमः"–इति, ततः "एतस्य (वालिशार्थस्य) अपि पर्येष्यो निगमः"–इति च (४.३.४टी०)।

जामिशब्दस्यातिरेकवाचिशार्थयोर्मन्त्रात्मनिगमप्रदर्शने देवराजोऽप्य भवदसमर्थ इव (४. १. ४६.) । वस्तुतस्तु नैघण्टुकव्याख्यान मेव स्वासीन्निगमसङ्ग्रहे मुख्य मवलम्बनं प्रतीयते ; तत्र हि येषां पदान निगमा मेव दर्शिताः, इहापि न तेषां त उपलभ्यन्ते ; अपि तत्र खल येषां पदानां ये च यथा च निगमाः प्रदर्शिता देवराजेन, प्रायस्त एव तथैवेह च दृश्यन्ते । तथथा— तत्र क्रोधनामसु पठितस्य हरइति नैघण्टुकपदस्य 'निगमो ऽन्वेषणीयः'–इति व्याख्यान मुपसंहृतं देवराजेन (२. १३. २.) ; तथैह क्रोधनामनिरुक्तव्याख्यानावसरे दुर्गाचार्येणापि तन्निगमो नैवादर्शि (३.२.३टी०) । परं सायणीय-भाष्यदर्शनात्त्वस्माभिरवगम्यते एव क्रोधवाचिनोऽपि हरःशब्दस्य निगमः— "अवन्नाता हरसो दैव्यस्य"--इति (ऋ०सं०८.४८.२.) ; पुनस्तस्यैव हरःशब्दस्य ज्योतिर्दिनार्थयोः क्रमात् यौ निगमौ प्रदर्शितौ देवराजेन, तावेव ऋज्वर्थाया मपि ; किञ्च अस्तृगर्थे यथा मन्त्रात्मनिगमाम्नाम: सूचितो देवराजेन, ऋज्वर्थाया मपि तथैव ; अहो तत्रैव ततश्चोक्तं देवराजेन 'उदकलोकवाचिनिगमौ पर्येषी'–इति (४.१.३८.), तत एवानन्यगत्या दुर्गाचार्येणापीह (४.३.३टी०) मौग मेवावलम्बित मित्यलं पल्लवितेनेति शम् ॥

यत्प्रणीतं मया संवत् वसुवेदाङ्कसम्मिते ।
"निरुक्तालोचनं" नाम कालनैरुक्तदर्शनम् ।
तदेवाद्य त्रिषष्ठ्यब्दे संशोध्य च विलिख्य च ।
स्थितव्रताय पुत्राय पुनःकाव्याय दीयते ॥

इतिरियं श्रीसत्यव्रतश्रमैव्या मिति ॥

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY